नं. ५०१२ ख²

आश्वलायन श्रौत सूत्र
व्याख्या: उत्तरषट्कम्

श्री नारायण: ———

पत्र २६६ ——— सं. ४

सूत्र पद्धति:

॥ [illegible] ॥

श्रीगणेशाय नमः ॥ हरिः ॐ ॥ सत्राणां ॥ अधिकारोयं । आष्टमाध्यायपरिसमाप्तेर्यद्

क्ष्यति तत्सत्रेष्विति वेदितव्यं ॥ उक्ता दीक्षोपसदः ॥ ॥ एकाह [illegible] प्रभृत्यासंवत्सरा

द दित्यादिना यथा स्फुत्योपसं इत्येवमंतेन दीक्षाः सत्राणामुक्ताः । उपसदश्चतुर्विंश

तिः संवत्सर इति सत्राणामित्युक्ताः । तच्च वचनं प्रकृति प्राप्त दीक्षोपसदहः संख्या

निवृत्त्यर्थं तत्र सत्राणामिति वचनात् व्रतद्वादशाहशब्दयोरहीनसंबंधे सत्यविशे

षात्तापश्चितशब्दस्य च सत्रविशेषवाचित्वादहीनसंबंधाशंकानिवर्त्यते तस्यवि

धेः सत्रसंबंधार्थमिदं वचनं । इदं तूपसत्कृहणं दीक्षास्फुत्याशब्दयोः परिसंख्या

परत्वाशंकानिवृत्त्यर्थं ॥ ॥ एते नाहास्फुत्यानि ॥ ॥ उक्तः सोमयागश्चतुः संस्थो ज्यो १

तिष्टोमाख्यः प्रकृतिभूत एकाहाहीनसत्राणां तान्येकाहादीनि नवमदशमेकाद

शब्दादशेषुवक्ष्यंते। इदानीं सर्वेषां सत्राणामधिकारं कृत्वा सत्रधर्मा उच्यंते। गवामयनानु
सारेण चतुर्विंशादीनि च तदीयान्यहानि स्तुत्या द्यंते महाव्रतपर्यंतानि। प्रायणीयोदयनी
योतु ज्योतिष्टोमेनातिरात्रेण व्याख्याताविति कृत्वेदानीं नोच्येते एषामहां व्युत्पादने कृते
एकाहाहीनानामपि व्याख्यानलाघवं भवतीति। तेभ्योपि पुरस्तात्सत्राणामितीदं प्रकरण
मध्यायद्वयेनारब्धवानाचार्यः। एवं सूत्रप्रणयनेनास्मद्ब्राह्मणमनुसृतं भवति। इत्येषात्र
सूत्रसंगतिः। इदानीं सूत्रं व्याख्यायते। एतेनेति यः प्रकृतो दीक्षणीयाद्युदवसानीयांतश्चतुः
संस्थो ज्योतिष्टोमाख्यः सोमयागः स निर्दिश्यते स एव चाहन्युच्यते। कृत्स्नानीति प्रधानक
र्माण्युच्यंते सोमयागरूपाणि। तत्रायमर्थः। सत्रेषु यानि प्रधानयागकर्माणि तान्येतेना
हानि निर्दिष्टानीति। एतेन समुत्थानीत्येतावता सिद्धे हन्ति वचनमतिरात्रसंस्थस्याप्येकाहस्य

स०सू०उ० हणेन संग्रहणार्थं। अहोरात्रद्वयसंबंधे सत्यपीति॥ ॥प्रातरनुवाकाद्युदवसानीयांतान्यंगा
२ नि॥ ॥प्राप्ति प्रधानमंगाद्वितो प्राप्तायां यावत्तां गकांडस्य सकृत्कृतस्यापि प्रधानाविशेषसंबं
धेकारणेन गृह्यते तत्सकृदेव कृतं सर्वार्थं भवतीति नावर्तते। यस्य पुनरेव न संभवति तदा
2 वर्तते। तेन तद्द्विवेकार्थमिदं सूत्रद्वयं। यानि पत्नीसंयाजेभ्य ऊर्ध्वमंगानि तान्येतेष्वेवाहःसु
कृ सकृत्कृतानि सर्वार्थानि भवेयुः। यानि प्रातरनुवाकात्पूर्वाणि तानि पूर्वेष्वेवाहःसु सकृत्क
र्तव्यानीत्यर्थः॥ ॥पत्नीसंयाजांतानीतराणि॥ ॥इतराण्यनंत्यानीत्यर्थः। तानि पत्नीसंया
जांतानि तेष्ववभृथादिन कर्तव्यं। तेष्वेव यान्याद्यं तानि तेषु च प्रातरनुवाकात्पूर्वाणि न क
र्तव्यानि॥ ॥इडासमप्राशनसख्यविसर्जने त्वंत्य एव॥ ॥पत्नीसंयाजपर्यंतानां प्रातरनुवाक २
प्रभृतीनामंगानां सर्वेष्वहःसु आवृत्तिरुक्ता तद्वत्यं तभृतयोरयनयोरंत्य एवाहनि क्रि

यास्यादित्येवमर्थमिदं सूत्रं ॥ ॥ ऋचाः शस्त्राणामाम्नाताः ॥ ॥ आम्नायन्ते ये रित्याम्नाताः ये स्वय
वरूपैः शस्त्राण्युच्यन्ते तूष्णींशंसननिवित्सूक्तादिभिस्त आम्नाताः शस्त्राण्युच्यन्ते ते ऋचाम्नाता
इत्यर्थः। परिभाषाप्रयोजनं मध्यंदिन इत्युक्ते एते शस्त्रे प्रतीयादिति निष्केवल्यमरुत्वती
ययोः संज्ञां कृत्वा व्यवहरति। जनिष्ठा उग्र उग्रोजन्तु इति तत्रैताभ्यां सूक्ताभ्यां कृत्स्नयोः श
स्त्रयोरुद्धारे प्राप्ते सूक्तयोरेवोद्धारो नान्येषां प्रातिपदादीनामित्येवमर्थां परिभाषा। ॥ सूक्ता
न्येव सूक्तस्थानेष्वहीनेषु ॥ यानि प्रकृतौ सूक्तस्थानानि तेषु विधीयमानास्तृचादयोपि सू
क्तान्येव भवंति तैः समस्तस्य च सूक्तस्योद्धारो नैकदेशस्येत्यर्थः। एवकारान्न केवलं यत्र वि
हितानि तत्रैव सूक्तकार्यं कुर्वंति किं तर्हि निविद्दतिपत्तावप्येतानि सूक्तान्येव भवेयुरित्य
वगम्यते तेन सूक्तेषु निविद्दतिपत्तावेतेषु तृचेषु निविद्धेयाः एतेषु वा निविद्दतिपत्तौ सूक्तेषु

सू०वृ०उ० निर्विशेषेयत्स्येवमपिभवति। उदाहरणं। हिरण्यपाणिमूतयइतिचतस्रोमहीद्यौः पृथिवीचनो
२ युवानापितराषुनरितित्वृचाविव्येवमादि। अहीनेष्वितिवचनंहीनेषुसूक्तस्थानेषुविहिता
नां तृचानांसूक्तवत्कार्यमाभूदित्येवमर्थं। यथायेवाकत्रिवृतस्तोमाः स्युस्तृचाएवतत्र
सूक्तस्थानेष्विति। सूक्तस्थानेषुहानिर्विधीयतेतेनतानिहीनानिसूक्तस्थानानि। अतस्ता
निवर्जयित्वान्येष्वहीनेषुसूक्तस्थानेषुविहितानांतृचादीनांसूक्तवत्कार्यंभवति। नही
नेषुविहितानां। हीनेषुतुविहितानियदर्थंविहितानितत्कार्यमुक्त्वान्यत्किंचिदपिसूक्त
कार्यंनकुर्युः। सूक्तेषुनिविदइतिपत्नीवत्स्वेषुनिविदोनदध्यात्तेषुनिविदइतिपत्नीवत्स्वेवा
न्येषुनिविदोदध्यान्नान्येषुसूक्तेष्वितिसिद्धं॥देवतेनव्यवस्थाः॥यत्रसूक्तस्थानानिच ३
त्वारिसंतित्रीणिसूक्तानिविहितानिदृश्यंतेतत्रदेवतेनव्यवस्थाः कर्तव्याः। यथाचतुर्वि

प्रउगउष्यदेवःसविताहिरण्ययेतितिस्रस्तोहिद्यावापृथिवीयज्ञस्यवोरथ्यमितिवैश्वदेवमि
त्याद्यो॥ तृचाःप्रउगे॥ ॥प्रउगार्थंप्रतीकेषुगृह्यमाणेषुतृचाएवसर्वेग्रहीतव्याः॥ सर्वा
हर्गणेषुतायमानरूपाणांप्रथमादह्नःप्रवर्तेतेअभ्यासातिप्रैषौ॥ ॥तायमानंविस्तीर्य
माणमित्यर्थः।एवंभूतस्यक्रतोरूपंतायमानरूपंसेयमन्वर्थसंज्ञा।अष्टानामभ्यासादी
नामहरहःशस्यानां।तेषांमध्येअभ्यासातिप्रैषसंज्ञेद्वेतायमानरूपेसर्वेष्वहर्गणेषु
प्रथममहरारभ्यसर्वेष्वहःसुप्रवर्तेते।अहर्गणग्रहणंअहीनेष्वप्यस्यविधेःप्रापणार्थं।
सर्वग्रहणमेकाहेष्वपिद्व्यहत्र्यहचोदितेषुप्रवृत्त्यर्थं। अस्मिन्सूत्रेद्वावर्थौविधीयेते।स
र्वेष्वहर्गणेषुतायमानरूपाणिभवंतीत्येकोर्थः।तेषांमध्येद्वेप्रथममहरारभ्यसर्वेष्वहः
सुअभ्यासातिप्रैषौप्रवर्तेतेइत्यपरः।तेनसाकमेधत्र्यहेसर्वेषांतायमानरूपाणांमध्यमे

स्०स्०उ० हनिप्रवृत्तिः साधिताभवति। अहर्गणेषु सर्वेषां प्रवृत्तौ विहितायामितरेषां प्रवृत्तावुद्दितीयादि
४ ष्विति नियमार्थं न योः प्रथमारंभोर्थसिद्ध एव तत्र प्रथमादहनइति किमर्थमुच्यते। अस्येदं प्र
योजनं मित्रावरुणयोरयने मासि मासि सुत्याभवति नाहरः तत्र प्रथमेतिरात्रे हारियो
जनकालेति प्रैषेवक्तव्ये सति श्वः शब्देनाद्यशब्देन वा वक्तुं न शक्यते अनेकाह व्यवहित
त्वात्सुत्याकालस्य तत्रापि कथं चिच्छ्वः शब्दलोपेनात्यति प्रैषो वक्तव्य इत्येवमर्थं प्रथमा
दहन इति वचनं अति प्रैषस्वरूपमुक्तं। अभ्यासस्वरूपमाह॥ ॥अहन उत्तमे शस्त्रे परिधा
नीयाया उत्तमे वचन उत्तमं चतुरक्षरं द्विरुक्त्वा प्रणुयात्॥ ॥उत्तमस्य शस्त्रस्याहनइति
विशेषणादहन एवोत्तमे शस्त्रे अभ्यासः कर्तव्यो नागंतुके सोमातिरेकादिनिमित्त इति ८
गम्यते। तस्मिंछस्त्रे परिधानीयायास्तृतीये वचने य उत्तमं चतुरक्षरं तद्द्विरुक्त्वा प्रणु

मादिति वचनात्सर्ववचने प्रणवो न भवति। यज्ञारित्रैयज्ञारित्रौं ३ ऐरयेथा मैरयेथां ३
इत्येवमाद्युदाहरणं॥ ॥द्वितीयादिष्वृत्य मृषु वाजिनं देवजूतमिति तार्क्ष्यमग्रे निष्केव
ल्यसूक्तानां॥ ॥द्वितीयादिष्वहः स्वेतत्तायमानरूपं भवति। निष्केवल्यसूक्तानामग्रे स
मृषु वाजिनं देवजूतमिति सूक्तं तार्क्ष्यशब्दात्वेदवनत्सूक्तं तार्क्ष्यमित्युच्यते। तार्क्ष्यवच
नात्पादग्रहणेपि सूक्तमेवेदं भवति। पादग्रहणं तु सूक्तमपीदं तत्सूक्तग्रहणेन न गृह्य
त इत्येवमर्थं। अत्र समुच्चयार्थस्य चशब्दस्याभावादिदं निविक्षानीयं न भवति॥ ॥जात
वेदसे सुनवाम सोममित्याग्निमारुते जातवेदस्यानां॥ ॥द्वितीयादिष्वनुवर्तते। अग्रे
सूक्तानामिति च। आग्निमारुतमिति वचनमाज्यनिवृत्त्यर्थं। तत्रापि जातवेदस्यानिवि
त्संबंधिसूक्तसंभवाज्जातवेदस्यानामिति बहुवचनं जात्यभिप्रायं। इदमपि तायमा

स्०टी०उ१ नरूपं ॥ ॥ आरंभणीयाः पर्यासान्कद्दतोहरहःशस्यानीति होत्रकाद्वितीयादिष्वेव ॥ ॥
५ आरंभणीयाॠजुनीतीनइत्याद्याः प्रातःसवने। माध्यंदिने चापप्राचइत्याद्याः। पर्या
साः प्रतिवांसूरउदितइत्याद्याः। कस्तमिंद्रत्वावस्कमित्यादयः कद्दंतः प्रगाथाः। अ
5 हरहःशस्यानि सद्योहजातउउअत्नाण्यभितष्टेवेत्येतानि। एतेषामारंभणीयादी
नांचतुर्विंशेहनिशंसनमुक्तंस्थानंचसंज्ञांच। अत्रैतेषांद्वितीयादिष्वहःसुप्रवृत्ति
रुच्यते। तायमानरूपसंज्ञाच। एतान्यारंभणीयादीनिहोत्रकशस्त्रसंबंधितयैव
चतुर्विंशेहनिविहितानि तत्रा किमितिहोत्रकसंबंधः पुनर्विधीयते। उच्यते। नात्रहो
त्रकसंबंधः पुनर्विधातुमिष्टः कस्तर्हिविधीयते। एषांद्वितीयादिष्वहःस्रुप्रवृत्तिरे ५
वा होत्रकसंबंधस्त्वनूद्यते पर्यासविशेषणार्थं। तत्राहद्विविधाः पर्यासादृश्यंते। केचि

रात्रिपर्यायेषु केचिच्चतुर्विंशो। तत्र ये रात्रिपर्यायेषु उक्तास्ते होत्राहोत्रकेष्वसंबंधाः

।ये चतुर्विंशे होत्रकेरेवते संबंधाः। आरंभणीयादय्यश्च होत्रकेरेव संबंधास्तेनायम

र्थः। यान्यारंभणीयादीनि होत्रकाः शंसेयुरिति विधास्यति तानि द्वितीयादिष्वहः स्व

शंसेयुरित्यर्थः। द्वितीयादिष्विति वर्तमाने षुपुनर्द्वितीयादिति वचनं तानि सर्वाणि स

र्वत्रान्यत्राहरुत्तमादित्यत्र सर्वाणि सर्वत्रेति वचनाद्यदहर्विशेषेणासंयुज्य विहितं

तदुत्तममहर्वर्जयित्वान्यत्र सर्वत्र प्राप्नुयादधिकारमनपेक्ष्यात स्तान्निवृत्त्यर्थं द्विती

यादि वचनं ॥ ॥ तानि सर्वाणि सर्वत्रान्यत्राहरुत्तमात् ॥ ॥ यान्येतान्यभ्यासादीनि अ

हरहः शस्यां तानि तायमानरूपाण्युक्तानि तान्युत्तमादह्नोन्यत्र कर्तव्यानि न तान्यु

त्तमेहनि कर्तव्यानीत्यर्थः। सोयमत्रै कोर्थः। अपरस्तु तानि सर्वाणि सर्वत्रेत्ययमभि

स०८०३१ प्रायः। केषुचिदेकाहेषु त्रिवृत्तो हीनस्तोमेषु त्वचा एव स्तुक्तस्तानेषु विहितास्तान्येकाहानिक
६ दाचिदहर्गणं प्राप्नुवंति तत्राहरहः शस्यानामपि त्वचत्वं प्राप्नोतीति तन्निवृत्त्यर्थमिदं वच
नं। एतदुक्तं भवति। तानि सर्वत्र हीनस्तोमेपि सर्वाणि भवेयुः। सर्वाणि कृत्स्नानि अ
नवखंडितानीत्यर्थः। तेन हीनस्तोमेष्यहरहः शस्यानामनवखंडनमहरहः शं
सनं साधितं भवति प्रकृतेष्वप्येतेषु तानीति वचनमत्र वाक्यार्थद्वयमस्तीति सू
चनार्थं॥ ॥वैकल्पिकान्यग्निष्टोमे हर्गणमध्यगते॥ ॥तायमानरूपाणि प्रकृता
नि तानि कानिचित्प्रथममहरारभ्योत्तममहर्वर्जयित्वा सर्वेष्वहःसु भवंतीति ता
न्येव कानिचिद्द्वितीयादिषु तद्वर्जेष्विత्युक्तं। तत्राहर्गणेषु प्रकृतिभूतोग्निष्टोमः ६
कचित्कचिद्वचनात्प्रवर्तते सचोपदेशानिरपेक्षः शस्यं प्रतीत्युक्तं। तस्मिन्नहर्गणे

मध्यगतेग्निष्टोमेहर्गणांतर्भावनिमित्तं यच्छस्यजानं तस्यप्राप्तावग्निष्टोमस्वरूपवि
रोधात्तन्नकर्तव्यमितिकश्चित्प्रतिभासः। उपदेशावगतसकलधर्मस्यापिअन्यत्र
प्राप्तस्याहर्गणांतर्भावादनियततज्ज्ञैर्धर्मैः संबध्यमानस्य नातीवस्वरूपविरोधइ
त्यपिकश्चित्प्रतिभासः। अनयोः प्रतिभासयोः कः श्रेयानितिनिर्णेतुमशक्यमि
त्यभिप्रायेण वैकल्पिकानीत्युक्तवानाचार्यः। उद्देश्यत्वादस्यन्यायस्येत्यभिप्रायः
। आदिमध्यगतयोरप्यस्य वैकल्पिकत्वस्यविशेषाभावान्मध्यगतशब्दः प्रदर्श
नार्थः॥ ॥ अग्निष्टोमायनेषु वा॥ ॥ वाशब्दः समुच्चयार्थः। अग्निष्टोमायनेष्वेवं
र्णेयो२ निर्बधाभावादनुष्ठानविकल्पएवेत्यर्थः। अग्निष्टोमैरेवयेषु सत्रेष्वयनं गमनंभ
वति। तान्यग्निष्टोमायनानियेषुसर्वाण्यहानि अग्निष्टोमाएवतेषु सर्वेष्वित्यर्थः।

सू० टी० उ १॥ अन्यान्यभ्यासातिप्रैषाभ्यामिति कौत्सो विकृतौ तद्गुणभावात्॥ ॥यस्मिन्विषये प्रकृतानां प
७ दार्थानां करणाकरणयोर्निर्णयाभावादव्यवस्थोक्ता। तत्रैतेषां मध्ये द्वयोः पदार्थयोरसा
धारणेन हेतुना व्यवस्थोच्यते। अभ्यासातिप्रैषौ कर्तव्यावेव विकृताविति सत्रांतर्भावात्।
विकृतिभावमापन्नेऽग्निष्टोम इत्यर्थः। कुतस्तद्गुणभावात्तस्य गुणास्तद्गुणाः। तादिति श
णांतर्गतोऽग्निष्टोम उच्यते। गुणशब्देनोपकारकमंगमुच्यते। तद्गुणस्य भावस्तद्गुणभा
वः। तद्गुणभावस्तद्गुणभावात्तदुपकारकत्वादित्यर्थः। तस्याभ्यासातिप्रैषौ तस्योपकार
कौ। यस्मादुत्तराहः संतानमामंत्रणं च। ताभ्यां क्रियते तस्मात्तौ नियमेन कर्तव्यौ इतरथा त
स्याह्नः सत्रापन्नस्य वैगुण्यं स्यादिति। अत एव ताभ्यामन्यान्येव वैकल्पिकानीति कौत्स ७
आहेत्यर्थः॥ ॥नित्यानि होतुरिति गोतमः संघातादावनुप्रवृत्तत्वादच्युतशब्दत्वाच्च॥ ॥

एवं कोत्सेन द्वयोर्नित्यत्वे उक्ते गौतमस्तार्क्ष्याभ्यासजातवेदस्यानां नित्यत्वमाह। होतुरिहोत्र
ग्रहणं पदार्थत्रयोपलक्षणार्थं न तत्कर्तव्यतयात्र कश्चिद्विशेष इति। उक्तेन प्रकारेण याभ्या
यो सातिप्रैषैर साधारण्यं गच्छीमः। कर्तव्यतायामिदमप्यभ्यासे कारणमस्ति। संघातादाव
नुप्रवृत्तत्वादिति आद्यमेवाहरारभ्य प्रवृत्तत्वादित्यर्थः। नानाकर्मसमुदायत्वात्तत्रस्य
परस्परसंतानापेक्षत्वात्समुदायिनामभ्यासस्य चाहः संतानप्रयोजकत्वादाद्यमेवाहरा
रभ्य प्रवर्तते। तदंतर्भूतस्याग्निष्टोमस्यापि तत्प्रयोजनापेक्षात्तुल्येपि एवमयमस्मिन्नर्थे
हेतुः। तार्क्ष्यजातवेदस्ययोरच्युतशाब्दत्वं हेतुः। होत्रकाणामपि गायगारिर्नित्यत्वात्तत्र
धर्मान्वयस्य। अभ्यासादीनां चतुर्णां नित्यत्वमुक्तं। इदानीमारंभणीयादीनामपि नित्यत्व
मुच्यते। होत्रकग्रहणमपि पूर्ववदेव पदार्थचतुष्टयोपलक्षणार्थं। एतान्यपि नित्यं क

सं०वृ०उ१ र्त्व्यानि। सत्रधर्मान्वयस्यानित्यत्वात्सत्रेण सत्रधर्माणां समन्वयस्यानित्यत्वादयमभिप्रायः।
८ तेषां सत्राहः संबंधितया विधानमस्ति। क्वचिदपि निषेधो नास्ति। किमित्यग्निष्टोमेन्यस्मिन्वा
नाक्रियेरन्निति। एवमेषां करणे। नध्यवसायोपक्रमेणाध्यवसानमेवोपसंहृतवानाचार्यः।
अन्यत्र सिद्धस्वरूपस्यान्यत्रातिदेशेन प्राप्तस्य विकल्पकपदेशानुसारेण स्वरूपविपर्ययेन
कश्चिद्दोष इति साधयितुमिति॥ ॥प्रगाथतृचसूक्तागमेष्वैकाहिकं तावदुद्धरेत्॥ ॥एतेषा
मागमे ऐकाहिकं प्रकृतिप्राप्तं तावन्मात्रमेवोद्धरेन्न सर्वमित्यर्थः। त्रीणि वृत्यहान्यतिरात्र
इति अस्मिन्नतिरात्रे ऐकाहिकमेव शस्यं प्राप्तं तत्र कद्वत्सु गाथागमे नित्यानां तु प्रगाथा
नामेव उद्धारः। तथा तत्रैव प्रातःसवने पर्यासतृचागमे त्यानां तृचानामेवोद्धारः। तत्रैव ८
माध्यंदिने हरहः शस्यसूक्तागमे ऐकाहिकस्य सूक्तस्यैवोद्धारः। तावदिति वचनादहरहः

शस्यागमेपिएकस्यैवसूक्तस्योद्धारोनद्वितीयस्याप्यैकाहिकस्यान्यागमेउद्धारःसिध्यर्थो।यथा
संसदामयनगतेनिरुक्तएकाहेमैत्रावरुणशस्त्रेसूक्तानांपुरस्तान्निविशमानमपिअहरहः
शस्यमंत्यमप्यैकाहिकमेवबाधते।एवमन्यदप्येवंजातीयकमुदाहरणंद्रष्टव्यं।एषांप्रगा
थादीनामागंतुकानामैकाहिकैःप्रगाथादिभिःकार्यैक्यानवगमान्नात्रसमानजातीयपरि
भाषाप्रवर्तते इतिपरिभाषांतरमारब्धं॥१॥ ॥चतुर्विंशेहोताजनिष्टेत्याज्यं॥ ॥सत्रायामि
त्यनुवर्तते।सत्रेषुप्रथममहःप्रायणीयंनामतच्चज्योतिष्टोमातिरात्रःसचोक्तः।इदानीं
द्वितीयमहश्चतुर्विंशसंज्ञकमुच्यते।अत्रसर्वेष्वहःस्वेतेनाह्नाक्लृप्तानीतिदीक्षणीयादि
उदवसानीयांतोनिर्दिष्टस्तत्रवचनान्न्यायाद्वायावदपोद्यतेतद्वर्जमन्यत्सर्वंतदेवकर्तव्यं।
अतस्तदेवशरीरमाश्रित्याहन्यहनितस्यैवयावान्विशेषःसउच्यते।यन्नोच्यतेतदैका

सू॰वृ॰ ३१ हिकमेवेत्यर्थः। अस्मिंश्चतुर्विंशेऽहन्येतदाज्यं भवति ॥ आनोमित्रावरुणामित्रंवयंहवामहे
६ मित्रंहुवेपूतदक्षमयंवांमित्रावरुणासुरूरुणाचिद्ध्यस्तिप्रतिवांसूरउदितइतिषड्हस्तो
9 त्रियामैत्रावरुणस्य ॥ ॥ षड्हस्तोत्रियाइत्येतेषांसंज्ञा। षड्हशब्देनषड्ढ्याभिप्लवोउ
च्येते। तयोरिमेस्तोत्रियाइतिषड्हस्तोत्रियाः। एतत्तुप्रवृत्तिनिमित्तमात्रमुक्तं। संज्ञैवके
वलमत्रविवक्ष्यतेसंव्यवहारार्थं। स्तोत्रियशब्दवाच्यत्वंचत्वमेषांभवति। एतेमैत्रावरुण
स्य ॥ ॥ आयाहिसुषुमाहितइंद्रमिद्गाथिनोबृहदिंद्रेणसंहिदृक्षसआदहस्वधामन्विले
काद्ध्वेंद्रोदधीचोअस्थभिरुत्तिष्ठन्नोजसासहभिंधिविश्वाअपद्विषइतिब्राह्मणाछंसि
नः ॥ ॥ तृतीयस्तोत्रियःसमाहार्यः। एकयाद्वाभ्यांवाषड्हस्तोत्रियाइत्यनुवर्तते ॥ ॥ इंद्रा ६
ग्नीआगतंसुतमिंद्रेअग्नानमोबृहत्ताहुवेययोरिदमयंवामस्यमन्मनइंद्राग्नीयुवामिमे

यत्तस्याहिस्तु ऋत्विजेस्य छावाकस्य॥ ॥अत्रापि पूर्ववत्॥ ॥तेषां यस्मिन्स्तु वीरन्त्स स्तोत्रियः
॥ ॥तेषामिति होत्रकाः शास्त्रिण उच्यंते। यस्मिन्निति षडहस्तोत्रियाणां मध्ये यस्मिन्निति ग
म्यते। एतदुक्तं भवति। अनेन प्रकारेण चतुर्विंशउत्पं नानां षडहस्तोत्रियाणां मध्ये यस्मिं
स्तुचेस्तु वीरं छंदोगाः। अन्यस्मिन्वा कस्मिंश्चित्सतेषां होत्रकाणां स्तोत्रियो भवति। स्तोत्रि
यधर्मैः संबध्यत इत्यर्थः। तेनेतरेपि तृचा एव स्तोत्रियधर्मरहिता होत्रकाणां भवंतीति
गम्यते। अनेन प्रकारेण चतुर्विंशउत्पंनानां षडहस्तोत्रियाणां सत्राधिकारात्सत्रसंबंधि
होत्रकोद्देशेन विधानात्सर्वाहःसु प्राप्तिः साधिता भवति। एवं व्याख्यायमान एतत्सूत्रम
र्थवद्भवति। इतरथा तेषामिति होत्रकसंग्रहार्थं षडहस्तोत्रियसंग्रहार्थं च न वक्तव्यम
कृतत्वादस्मिन्नहनि तथा यस्मिन्नृक्तवीरन्त्स स्तोत्रिय इत्यापि न वक्तव्यं। अनुच्यमानेपि

स०हू०उ१ सएवस्तोत्रियोभवति छंदोगप्रत्ययत्वात्तस्येति। अतस्तदंप्यत्रनविधेयं। तेनषळहस्तोत्रिये
१० भ्योन्यस्मिंनपियाद्दिस्क्तयुश्चतुर्विंशोपि सएवस्तोत्रियः कर्तव्यः। एवमेतेषांसर्वार्थत्वप्रतिपा
10 दनपरमेवेदंसूत्रंव्याख्येयंनान्यथेतिसिद्धं। एवंसर्वेष्वहःसुप्रातःसवनेस्तोत्रियज्ञानो
पायउक्तः। अनुरूपज्ञानोपायंदर्शयितुमाह॥ यस्मिंश्वःसोनुरूपः॥ यस्मिंश्वःस्तुयुःसो
घानुरूपःकर्तव्यः। एवंसर्वेष्वहःसुद्रष्टव्यं। अत्रापिसत्राणामित्यनुवर्ततेतेनसत्रसंबं
धिषुसर्वेष्वहःसुप्रायणीयेपिश्वःस्तोत्रियएवानुरूपोभवतिनान्यःप्राकृतोलाक्षणिको
वा। एकस्तोत्रियेष्वहःसुयोन्योनंतरःसोनुरूपोनचेत्सर्वेहर्गणाःषळहोवा। श्वःस्तोत्रि
योनुरूपइत्युक्तंयदापुनरेकाःस्तोत्रियाण्यनेकान्यहानितदायावंत्येकस्तोत्रियाणिता १०
वद्भ्योनंतरंयदहर्भिन्नस्तोत्रियंतास्मिन्न्यःस्तोत्रियःसर्वेष्वेकस्तोत्रियेष्वनुरूपोभवति॥

अन्योनंतरइत्युभयविशेषणंएकस्तोत्रियेभ्योनंतरमेवयदापुनरन्यस्तोत्रियंतस्यैवयस्तो
त्रियःसर्वेष्वेकास्तोत्रियेष्वनुरूपोभवतीत्येवमर्थंएतदेकस्तोत्रियत्वंहोत्रकसंबंधितयै
वगृहीतव्यं।तेषांचैकस्यद्वयोसर्वेषांवायावन्मात्रमेकस्तोत्रियत्वंभवति।तावन्मात्रमेवा
यंविधिःप्रवर्तते।अन्यश्चस्तोत्रियएव।एवमयंविधिःप्रवर्ततेयदिसर्वोहर्गणएकस्तो
त्रियोनभवेत्षळहोवापृष्ठ्याभिप्लवाख्यःतत्रयदासर्वोहर्गणएकस्तोत्रियस्तदान्यस्या
नंतरस्याभावादयंविधिर्नभवति।षळहयोरेकस्तोत्रियत्वेपर्युदासादेवायंविधिर्नभव
ति।एकाहिकस्तथासति।यदासर्वोहर्गणएकस्तोत्रियःपृष्ठ्योभिप्लवोवाषळहस्तदै
काहिकएवानुरूपोभवति।नानंतरोहर्गणस्यसर्वस्यैकस्तोत्रियत्वेन्यस्यानंतरस्याभावा
देवानंतरोनभवति।एतत्किमिति।नचेत्सर्वोहर्गणइतितत्पर्युदासःकृतःतस्येदंप्रयो

सू०वृ०३१ जनं ऐकाहिकानुरूपविधेस्तस्यापि विषयत्वासिध्यर्थं। अथ कस्मिन्विषय एवं भवति कानि
११ त्रीणि चत्वारि वाहान्येकस्तोत्रियाणि तदनंतरं षष्ठ्योभिप्लवो वा षडहः पूर्वैः सहैक
स्तोत्रियः तदनंतरं च द्वित्राण्यहान्येकस्तोत्रियाणि ततो भिन्नस्तोत्रियः तत्र कथं भव
ति तत्रैवं भवति षष्ठहउत्तरेष्वनंतर एव भवति। षष्ठहऐकाहिक एव भवति। एवं च स
ति षष्ठहात्पूर्वेष्वप्यैकाहिक एव भवति। नानंतरः षष्ठहव्यवधानादित्येवमर्थं तदेति
वक्तव्ये तथा सतीत्युक्तं। अंत्ये च। अंत्ये चाहनि पूर्वयोर्विध्योः प्रवृत्त्यसंभवादैकाहिक
एव भवति। अतिदेशादेवायमर्थः सिध्यति। अपवादश्च नास्ति किमत्र वचनेनेति॥
अयमभिप्रायः वचनादेव सर्वत्रानुरूपो भवति नातिदेशेनेति ज्ञापनार्थं तत्प्रकटना ११
र्थमनुरूपाधिकारे द्वितीयमनुरूपग्रहणं कृतं अतस्तोत्रियस्तावच्छंदोगप्रत्यय एव

सर्वत्र अस्मद्वचनं प्रायिकमेव यत्पुनरनुरूपलक्षणाविधानं। तस्योत्तरे सवने वकाशः।
तस्यैवायमपवादः। प्रातःसवने स्तोत्रियानुरूपाभ्यामन्यद्देवातिदेशेन प्राप्नोति। अनु
रूपविधिप्रकरणमारब्धं॥ ॥ऊर्ध्वमनुरूपेभ्य ऋजुनीतीनो वरुण इंद्रं वो विश्वतस्परि
यत्सोम आ सुते नर इत्यारंभणीयाः शस्त्वा स्वान्स्वान्परिशिष्टानावपेरंश्चतुर्विंशमहा
व्रताभिजिद्विश्वजिद्विषुवत्सु॥ ॥ऋजुनीत्याद्याः आरंभणीयसंज्ञास्ता अनुरूपेभ्य ऊर्ध्व
मेकैकामेकैकः शंसेत्। प्रागादेवोर्ध्वमनुरूपेभ्यः शंसने सिद्धे। अनुरूपेभ्य इति वच
नं नियमार्थं। अनुरूपेभ्य ऊर्ध्वमेता एव शंसेयुर्नैकाहिकमिति। एताः शस्त्वा स्वान्स्वा
न्परिशिष्टानावपेरन्परिशिष्टानामपवृह स्तोत्रियेषु स्तोत्रियत्वेनानुरूपत्वेन वा गृ
हीताशिष्टान्। शस्त्वेति वचनमस्मिन्नपि क्रमे ऐकाहिकनिवृत्त्यर्थं स्वान्स्वानिति वचनं

स०वृ०उ१ छंदोगवशात् षळ्हस्तोत्रियेभ्यो व्यतिरिक्ता एव स्तोत्रियानुरूपाश्च यदि भवेयुः। तदावाप

१२ रिशिष्टत्वं नास्तीति नोच्यंते तदाप्यावापसिध्यर्थं। तेन परिशिष्टान्सर्वान्स्वान्स्वान्षळ्ह

स्तोत्रियानावपेरन्नित्यर्थः। अयमावापश्चतुर्विंशादिपंचस्वहःसु कर्तव्यः। प्रकृत

त्वेपि चतुर्विंशाग्रहणं परिसंख्याशंकानिवृत्त्यर्थं। सर्वस्तोमसर्वपृष्ठेषु च। सर्वस्तो

मानामयस्मिन्क्रतो त्रिवृदादयः त्रयस्त्रिंशपर्यंताः षळ्हस्तोमा भवंति। रथंतरादी

नि रेवतपर्यंतानि षड्सामानि यस्मिन्भवंति स सर्वपृष्ठ इत्युच्यते। सर्वपृष्ठेषु चा

यमावापः कर्तव्यः। अभिजितः सर्वस्तोमत्वाद्विश्वजितः सर्वपृष्ठत्वाद्देवावापेप्रस

क्ते पूर्वसूत्रेन तयोर्ग्रहणाभ सर्वस्तोमासर्वपृष्ठयोरपि प्रापणार्थं॥ ऊर्ध्वमावापसूत्र १२

दिते व्यंतरिक्षमतिरछ्यवाश्वस्य सुन्वतः इति त्वचाः पर्यासाः। ऊर्ध्वमावापादिति विव

त

वापात्प्रति

नं पूर्ववदैकाहिकशास्य निवृत्त्यर्थं। आवापादूर्ध्वं पर्यासास्तृचाः शंस्तव्याः। प्रति वां
सूर इत्याद्याः पर्याससंज्ञा भवति। अन्वर्थसंज्ञेयं पर्यासशब्दस्यांतवाचित्वात्तेनैव
मंतं शस्त्रं भवति। अत ऐकाहिकस्य क्वचिदपि प्रवृत्तिर्नास्तीति सिद्धं। समानजाती
यत्वादेभिः शस्त्रैरैकाहिकानि शस्त्राणि निवर्तंते ऊर्ध्वमेभ्य इति वक्तव्ये ऊर्ध्वमावा
पादिति वचनमिदमावापस्थानमिति ज्ञापनार्थं। तेनान्यदप्यावप्तव्यमस्मिन्नेव
स्थाने आवप्तव्यमिति सिद्धं। सत्वेव मैत्रावरुणास्य षष्ठहस्तोत्रिय उत्तमः सपर्या
सः। उत्तरविवक्षार्थोयमनुवादः। प्राप्तिभेदप्रदर्शनार्थश्च। तेनासति प्राप्तिभेदे वक्ष्य
माणो विधिर्न भवति। यथा ईळे द्यावीयमावर्तयेदित्येवमादौ। तद्देवतमन्यं पूर्वस्य
स्थाने कुर्वीत। पूर्वस्येत्युत्तमस्य षष्ठहस्तोत्रियस्येत्यर्थः। तद्देवतं मित्रावरुणदेवत

सू० वृ० उ० १ मन्यं तृचं कुर्वीत। गायत्रं प्रातःसवनमिति श्रुते र्गायत्रश्च स भवति आग्नेयं प्रातःसवनमि
१३ त्यस्यापवादो मैत्रावरुणं शंसतीति एवं मैत्रावरुणो सन्निधे यत्तद्दैवतग्रहणं करोति तज्ज्ञा
पयति दैवतैवात्रादरणीया नान्यानि नियमलिंगादीनिति। स चान्यस्तृचो यदद्यसूर इ
13 त्ययं स भवति यदा पुनस्तान क्षिपेत्यनुरूपः क्रियते तदा काव्येभिरदाभ्येत्ययं तृचः कर्त
व्यो न यदद्यसूर इति। अन्यत्रापि संनिपाते न तृचं सूक्तं वा नन्तर्हि तमेकासने द्विःशंसेत्।
न केवलं षष्ठहस्तोत्रियपर्याससंनिपात एवायं विधिर्भवति किं तर्हि अन्यत्रापि सर्वत्र
तृचस्य सूक्तस्य वा विधिद्वयेन प्राप्तस्य संनिपाते न द्विःशंसने प्राप्तेऽव्यवायेनैकासने
न द्विःशंसेत्। तृचसूक्तग्रहणमेकस्य द्वयोर्वास्त्वायं विधिः स्या [illegible] दित्येवमर्थं। अनंत १३
र्हितवचनाद्व्यवधाने न द्विःशंसनं न प्रतिषिध्यते। एकासन इत्यविवक्षितं। एकासनं भि

न्नासनं वास्त्व। अनंतर्हितं नद्धिः शंसेदित्यत्र तात्पर्यं। न त्वन्यत्र त्वचस्सूक्तयोः संनिपाते पूर्व
स्य स्थाने अन्यत्तद्देवतं कर्तव्यमित्ययमेवार्थः प्रकरणात् विधेयतयावगम्यते। द्धिः शंसन
प्रतिषेधस्यार्थिकत्वेनापि व्याख्यातुं शक्यते। कथमत्र द्धिः शंसनप्रतिषेधे तात्पर्योक्तिर्भव
ति। अत्रोच्यते। यद्यत्र पूर्वस्य तद्देवतविधिरभिप्रेतः स्यादन्यत्रापि संनिपाते त्वचस्सूक्तयो
रनंतर्हितयोः श्लेषस्त्वं प्रणेतव्यं स्यात् तथा न प्रणीतमतो द्धिः शंसनप्रतिषेध एवात्र ता
त्पर्येण विधीयते। तेन प्रकरणप्राप्त तद्देवतविधानं नियतमिति गम्यते। क्वचित्पूर्वस्य स्था
ने भवति। क्वचिदुत्तरस्य स्थाने क्वचिदेकस्य लोपः पूर्वस्य वोत्तरस्य वेति प्राप्तिप्रमाणबला
बलचिंतया योजनीयं। महावालभिदं चेच्छंसेदूर्ध्वमनुरूपेभ्य आरंभणीयाभ्यो वा नाभा
कांतस्यचा नावपेरन् गायत्रीकारं ॥ ॥ प्रातःसवनिकहोत्रकशस्त्रप्रसंगादिदमुच्यते। यस्मि

सू० ष्ट०३१ न्क्रतोस्तृतीयसवने मैत्रावरुणो महावाँ अभिद्युं शंसेत् तस्मिन्प्रातःसवने होत्रकाः स्वेस्वेशस्त्रे
१४ ऊर्ध्वमनुरूपेभ्य आरंभणीयाभ्यो वा नाभाकांस्तृचानावपेरन्। गायत्रीकारं शंसेयुस्ताः षट्
14 पदा जगत्यः द्वे द्वे गायत्र्यौ कृत्वा शंसेयुरित्यर्थः। नाभाका इत्यपि नाम्ना व्यपदेशस्तोमाति
शंसने तासां षट्पदानामेव ग्रहणार्थं न त्रिपदानामिति॥ ॥सक्षपः परिषस्वज इति मै
वा त्रावरुणो यः ककुभो निधारय इति पूर्वं पृष्ठ इंद्रोपमातय इति ब्राह्मणाच्छंसी ताहि मध्यं
भराणामित्यच्छावाकः॥ मैत्रावरुणस्य प्रतीको विकल्पः॥२॥ ॥ मरुत्वतीये प्रेतु ब्रह्म
णस्पतिरुत्तिष्ठ ब्रह्मणस्पत इति ब्राह्मणस्पत्या वावपते पूर्वौ नित्यात्॥ मरुत्वतीय इ
त्यधिकारार्थः। चतुर्विंशे यन्मरुद्ब्रह्मणस्पत इति ब्राह्मणस्पत्या वावपते पूर्वौ नित्यात्॥ १४
मरुत्वतीय इत्यधिकारार्थः चतुर्विंशे यन्मरुत्वतीयं शस्त्रं तस्मिं नित्या ब्राह्मणस्पत्यात्।

पूर्वावेतौब्राह्मणास्पत्यौभवतः। ब्राह्मणास्पत्यवचनादेतयोरपिप्रगाथत्वंगम्यते। आव
पतिग्रहणंप्राकृतस्याबाधनार्थं। सर्वत्रचावपतिग्रहणस्येदमेवप्रयोजनं। बृहदिन्द्रा
यगायतनकिःसुदासोरथमितिमरुत्वतीयाऊर्ध्वंनिस्यात्। आवपतइत्यनुवर्तते। क
याशुभेतिचमरुत्वतीयेपुरस्तात्सूक्तस्यशंसेत्। कयाशुभेतिचसूक्तंमरुत्वतीयेजनिष्ठा
उग्रइत्यस्मात्पुरस्ताच्छंसेत्। चशब्दोनिविद्धानीयत्वसमुच्चयार्थः। तेनतार्क्ष्यमनिवि
द्धानीयंभवति। तेनसमुच्चयार्थस्यचशब्दस्याभावान्मरुत्वतीयाधिकारेपुनर्मरुत्वती
याधिकारेपुनर्मरुत्वतीयग्रहणंप्रवइंद्रनिहवइत्यस्मिन्सूत्रेविशेषसिध्यर्थं। एवंस्थि
तान्प्रगाथान्पृष्ठ्याभिप्लवयोरन्वहंपुनःपुनरावर्तयेयुः। यथाचतुर्विंशएतेप्रगाथाःस्थि
ताएवमेवंस्थितानेतान्प्रगान्पृष्ठ्याभिप्लवयोःषळहयोरहन्यहन्यावर्तयेयुरित्यर्थः॥

स० वृ० ३१ आवर्तयेयुरिति बहुवचनमविवक्षितं। एवंस्थित एववचनमेषां षण्णामेवं। क्रमिकाणामे
१५ वप्रवृत्त्यर्थं। इतरथा ऐकाहिकयोस्तत्राविधानाभावात्तयोः प्रवृत्तिर्न स्यात्। प्रवृत्तौ च चतु
15 र्विंशोक्तेक्रमेन लभ्यते तेनोभयसिध्यर्थमेवंस्थितवचनं। अन्वहवचनमस्य विधेः षळ
हावयवभूताहर्धर्मत्वसूचनार्थं। तेन वैश्वदेव्याख्याने प्रथमं पृष्ठ्याहरित्यादौ षळहाव
यवभूताहरहन्यतिदिष्टेष्वयं विधिर्भवति। पुनःपुनरिति वचनं द्वयोः षळहयोस्त्रिष्व
हःसु प्रगाथपर्याये समाप्ते पुनः क्रियायां प्रमाणं नास्तीति। पुनःपुनरिति वीप्सावचनं पृ
ष्ठ्ये चाभिप्लवे च पुनः क्रियासिध्यर्थं। एकैकं ब्राह्मणस्पत्यानां। एते प्रगाथाः षळहयो
रहन्यहनि कर्तव्या इत्युक्तं। तत्र प्रत्यहं सर्वेषु प्राप्तेषु एकैको नियम्यते। षळहयोरेकैक १५
स्मिन्नहनि ब्राह्मणस्पत्यानामेकैक एव कर्तव्यः। एवं गरुत्वतीयानां। एवं मरुत्वतीयानां

मध्येकेकमेवकुर्यात्। ऋग्वइंद्रनिहवः। द्वितीयंमरुत्वतीयग्रहणमत्रसंबध्यतेतेनायम
र्थः। मरुत्वतीयेशास्त्रेइंद्रनिहवप्रगाथोऋग्वोभवति। ऋग्वशब्देनात्रप्राप्तितःप्रयोगतश्चा
विचालित्वमुच्यतेनसंज्ञामात्रंमरुत्वतीयग्रहणंउत्तरस्यसूत्रस्यसर्वार्थत्वायतेनसर्वेषु
शास्त्रेषुधाय्याऋग्वाभवंतिइतरथामरुत्वतीयाधिकाराद्धाय्याअपिमरुत्वतीयएवऋ
ग्वास्युर्नान्येषुशास्त्रेषुअतोद्वितीयंमरुत्वतीयग्रहणमेतदर्थंकृतंधाय्याश्च। गतार्थ
मेतत्। नेदंऋग्वत्वमत्रविधीयतेप्राप्तितःप्रयोगतश्चाविचालित्वमात्रमत्रअनूद्यते
तेनेंद्रनिहवधाय्याप्रकारमन्यदप्यघृदैवतदेवपत्नीहृच्चाद्यविचालिऋग्वशब्देनगृह्य
ते तेनाग्निस्तुतिविचालिशब्देनैवंप्रकारादन्यदेवग्रहीतव्यं। मरुत्वतीयमुक्त्वानिष्केव
ल्यंवक्तुमाह। बृहत्पृष्ठं। चतुर्विंशेहनिभवतीतिशेषः। रथंतरंवा। छंदोगप्रत्ययासिद्ध

स्तु०टी०५१ स्यवचनमुत्तरविवक्षार्थं। तयोरक्रियमाणस्ययोनिंशंसेत्। तयोर्बृहद्रथंतरयोर्यत्पृष्ठस्था
१६ नेनाक्रियते बृहद्रथंतरं वा। तस्ययोनिंशंसेत्। बृहतोयोनिस्त्वामिद्धिहवामहइतिऋचा
16 रथंतरस्ययोनि अभित्वाशूरनोनुमइतिऋचएवं ॥ वैरूपवैराजशाक्वररैवतानांच ॥ ॥
अक्रियमाणस्येत्यनुवर्तते। अस्मिन्नहनिनिष्केवल्येएषामपियोनीः शंसेदक्रियमा
णस्येत्यनुवृत्तिसामर्थ्याच्चतुर्विंशातिदिष्टविश्वजिदतिदेशाद्दशोर्यामेवैराजस्यपृष्ठ
स्थानेक्रियमाणस्ययोनिशंसनंभवतीतिगम्यते। चतुर्विंशवचनसामर्थ्यादसत्यप
स्वयोनिभावेएषांयोनिशंसनंकर्तव्यं। वैरूपादीनांयोनीर्दर्शयितुमाह। पृष्ठ्यस्तोत्रिया
योन्यः। पृष्ठ्येषळहेतृतीयादिष्वहःसुनिष्केवल्येषुस्तोत्रियायेविहितास्तावैरूपादीनां १६
योन्यइतिवेदितव्याः। अर्धर्चाः। तायोन्योर्धर्चशःशंस्तव्याः। पुनरादानन्संस्वादयोविका

रायो निःशंसने न कर्तव्या इत्यर्थः। तासां विधानमन्वहं। पृष्ठ्यस्तोत्रिया योन्य इत्युक्तं। पृष्ठा
नां बहुत्वात्कस्य पृष्ठस्यैतत्तन्निर्णयार्थमिदमुच्यते। यासां योनीनां यस्य पृष्ठस्तोत्रियस्य
निष्केवल्यस्य स्तोत्रियत्वेनान्वहं विधानमस्ति तासां योनीनामत्र शंसनं कर्तव्यं। स च पृ
ष्ठः तत्र हि तासां विधानमन्वहमस्तीति सिद्धं॥ ताभ्य ऊर्ध्वं साम प्रगाथान्। ताभ्यो योनि
भ्य ऊर्ध्वं साम प्रगाथाञ्छंसेत्। अस्यायं साम प्रगाथ इत्याह। उक्तो रथंतरस्य। यदु
क्तं पिबा सुतस्येति स रथंतरस्य। उभयं शृणवच्च न इति बृहतः। अयं बृहतो वेदितव्यः
। एवं चेत्स्वकृतावपि बृहतः प्रवेशो अयमेव साम प्रगाथः प्राप्नुयात्। अस्त्व इष्यत ए
वायमर्थः। एवं चेत्स्वकृतावेवायं प्रगाथः कस्मान्नोपदिश्यते येषु क्रतुषु रथंतरादिषड्
व्यतिरिक्तं यत्किंचित्साम पृष्ठ्यस्थाने भवति तेषु पिबवा नेव साम प्रगाथो भवतीत्येव

स॰ वृ॰ ३१ मर्थप्रकृतावनुपदेशः॥ ॥इंद्रत्रिधातुशरणंत्वमिंद्र प्रतूर्तिषु मोषुत्वा वा घतश्चनेति साद्वि

१७ पद्उपसमस्येद्विपदामिंद्रमिद्देवतातयइतीतरेषां॥ मोषुत्वावा घतश्चनेत्ययंप्रगाथोरा

यस्कामइत्यनयाद्विपदयासहवर्तते॥ तस्याश्वशंसनप्रकारः पूर्वस्मिन्नर्धर्चेप्रणवम

कृत्वार्धर्चांतेनवर्णेनद्विपदाद्यवर्णयथाशास्त्रंसंदध्यादर्थेन पादमादध्यू राय स्का

मइतिसोयमुपसमासः। एवंकृत्वाशंसेत्। एतेवैरूपादीनांसामप्रगांस्तानपिशंसेत्। था

एतेषांसामान्वयेनविधानात्तत्साम्निकृतोस एवभवतिप्रगाथः। पृष्ठ्यएवेकेकम

न्वहं। सामप्रगाथानांसामान्वयित्वेनविधानात्सार्ष्टिकेष्वहःस्वन्येष्वपिसर्वेष्वहः

स्वरथंतरादिषुसामस्कः पृष्ठ्यस्थानेनिविशमानेषुस्वस्वसामप्रगाथोभवतीत्यत्रसं १७

देहोनास्ति। वचनस्येदंप्रयोजनंपार्ष्टिकेष्वहःसुरथंतरादिष्वप्रयुज्यमानेष्वप्येते

सामप्रगाथा नियमेन कर्तव्या इति इत्येतत्॥ तद्दिशासेति च पुरस्तात्सूक्तस्य शंसेत्॥ इंद्र स्यनुवीर्याणीत्यस्मात्पुरस्तादित्यर्थः। चशब्दप्रयोजनमुक्तं। उक्थपात्रे चमसांश्चांतरा तिग्रात्यान्भक्षयंति निष्केवल्ये। निष्केवल्याधिकारे पुनर्निष्केवल्यग्रहणं सत्र संबंधि सर्वनिष्केवल्यसंप्रत्ययार्थं। तेनायमर्थः। सत्र संबंधिषु सर्वेषु निष्केवल्येषूक्थपात्रे भक्षिते चमसेषु अभिक्षितेष्वंतरा अतिग्रात्या नामग्रहाः संति तांस्तत्र भक्षयेयुः। नि त्योभक्षजपः। उत्तरसूत्रेण भक्षधर्मेषु प्राप्तेषु मंत्रस्यायमपवादः। षोडशिपात्रेणभक्षितः॥ षोडशिपात्रेणाभक्षिणो व्याख्याताः भक्षिषु विधीयमानेषु तद्विशेषणं भक्षणमपि विहितं भवति तत्र विधीयमानं सधर्मकं विधीयते अत एव मंत्रापवादः पूर्वसूत्रेक्त तः अनेन न्यायेन दधिघर्मेपि प्राणभक्षः सिद्धो भवति॥३॥ होत्रकाणां॥ माध्यंदि

स्०ष्टं०३१ नेसवनेहोतुर्विधिरुक्तः। इदानीहोत्रकाणांविधिरुच्यतइतिसंबंधः। इतिमैत्रावरुणस्ये
१८ तिब्राह्मणाछंसिनइति अछावाकस्येत्येतैरेवहोत्रकसंबंधे।सिद्धेहोत्रकाणामितिव
18 चनंचतुर्विंशेनैषांस्तोत्रियानुरूपाणांसंकोचनिवृत्त्यर्थंतेनसत्रसंबंधिनांहोत्रका
णांमाध्यंदिनेसवनेएतेस्तोत्रियानुरूपावेदितव्याः। ननुसर्वत्रछंदोगप्रत्ययएवस्तो
त्रियस्तत्रकिंवचनेनेति अनुरूपनियमार्थं। यदियच्चिद्धित्वेत्यत्रस्तुधुदामाचिदन्य
दित्ययमेवानुरूपोभवतिनान्योलाक्षणिकइति। एवंसर्वत्रप्रयोजनंद्रष्टव्यं॥ कया
नश्चित्रआभुवत्कयात्वंनऊत्यामाचिदन्यद्विशंसतयच्चिद्धिलाजनाइमइतिस्तोत्रि
यानुरूपामैत्रावरुणस्य॥ एतत्स्तोत्रियानुरूपयुगलद्वयंमैत्रावरुणस्य॥ तंवोदस्म १८
मृतीषहंतत्वायामिसुवीर्यमभिप्रवःसुराधसंप्रसुश्रुतंस्कराधसंवयंघत्वासुतावंतः

कईं वेद सुते सचा विश्वाः पृतना अभिभूतरं नरं तमिंद्रं जोहवीमि या इंद्र भुज आभर इत्ये
मदे काद्वे चेंद्रो मदाय वावृधे मदैँहि नो ददिः सुरूपकृत्नुमूतये शुष्मिंतमं न ऊतये श्रायंत इव
सूर्यं बण्महाँ असि सूर्ये उत्य दृशतं वपु रुउत्ये मधुमत्तमास्त्वमिंद्र प्रतूर्तिषु त्वामिंद्र य
शा असी इंद्र क्रतुं न आभर इंद्र ज्येष्ठं न आभरा त्वा सहस्रमाशतं ममत्वा सूर उदित इति ब्रा
ह्मणाच्छंसिनः ॥ एतान्येकादशायुगलानि चतुर्थस्यानुरूपः संहार्यः ॥ ॥ तरोभिर्वो विद
द्वसुं तरणिरित्सिषासति त्वामिद्धात्यो नरो वयमेन विद्धात्यो यो राजा चर्षणीनां यः सत्राहा
विचर्षणिः स्वादोरित्था विषूवत इत्था हि सोम इन्मद उभे यदिंद्र रोदसी अव यत्वं शतक्र
तो न किष्टं कर्मणा नशन्न त्वा वृहंतो अद्रय उभयं शृणवच्च न आ वृष स्वपुरूवसो कदा
चन स्तरीरसि कदाचन प्रयुछसि यत इंद्र भयामहे यथा गौरो अपाकृतं यदिंद्र प्रागपागु

सू०हृ०उ१ इग्यथा गोरोअपाकृतमित्यछावाकस्य॥ एतानिदशसुशुक्लानि स्तोत्रियानुरूपाणां रूपं। स्तोत्रि
१६ यानुरूपेस्कवीरन्स्तोत्रियोनुरूपः। स्तोत्रियानुरूपाधिकारेपुनस्तोत्रियानुरूपवचनं सर्वेषु
19 स्तोत्रियानुरूपेष्वस्यविधेःप्रापणार्थं तेन माध्यंदिने तृतीयसवने च [illegible] तुर्होत्रकाणांचा
ति यंविधिर्भवतीतिवेदितव्यं प्रातःसवनमेकस्यास्यविधेरुक्तत्वात्तत्रायंविधिर्नभवतीति।
॥ऊर्ध्वंस्तोत्रियानुरूपेभ्यः कस्तमिंद्रत्वावसुं कन्नव्योअतसीनां कद्न्वस्याकृतमितिकद्वं
तःप्रगाथाः। कद्वंतइति प्रगाथानां संज्ञा ते च होत्रकाणां यथासंख्येन भवंति॥ अपप्रा
चइंद्रविश्वां अमित्रान्ब्रह्मणा ते ब्रह्मयुजा युनज्म्युरुंनो लोकमनुनेषि विद्वानिति कद्व
त्य आरंभणीयाः॥ ।आरंभणीया इत्यासामृचां संज्ञा ता अपि यथासंख्येन होत्रकैः संब १६
ध्यंते कद्वत्य इति पंचमीदर्शनादूर्ध्वमित्यध्याह्रियते कद्वत्य ऊर्ध्वमारंभणीया भवंतीति।

॥ ऊर्ध्वमारंभणीयाभ्यः सद्योहजात इत्यहरहःशस्यं मैत्रावरुणो ऽस्माइदु प्रतवसे शासद्वह्नि
रितीतरावहीनसूक्ते ॥ आरंभणीयाया ऊर्ध्वं मैत्रावरुणः सद्योहजात इत्येतत्सूक्तमहरहःश
स्यसंज्ञकं शंसेत्। ब्राह्मणाछंस्यछावाकौ द्वावारंभणीयाभ्य ऊर्ध्वमस्माइदु प्रतवसे शासद्व
ह्निरित्येते सूक्ते अहीनसूक्तसंज्ञके शंसेयतां ॥ आसत्यो यात्वित्यहीनसूक्तं द्वितीयं मैत्राव
रुणा उदु ब्रह्माण्यभितष्टेवेतीतरावहरहःशस्ये। ॥ आसत्यो यात्वित्येतत्सूक्तमहीनसू
क्तसंज्ञकं च द्वितीयं मैत्रावरुणः शंसेत्। ब्राह्मणाछंस्यछावाकौ उदु ब्रह्माण्यभितष्टेवे
त्येते सूक्ते अहरहःशस्यसंज्ञके द्वितीयसूक्ते शंसेयातां। नूनं सा त इत्यंतमुत्तमं। एतेषां सू
क्तानां य उत्तमं सूक्तमभितष्टीयं तन्नूनं सा त इत्यंतं भवति। ऋगागमेप्युद्धाराभावादधि
कं भवति तेन श्रुनं हुवीयायां उद्धाराभावे सति सकृदिंद्रं निराहेति ब्राह्मणवचनमुपप

स०वृ०उ०१ न्नंभवति। अहीनसूक्तानिषळहस्तोत्रियानावपत्स्क। आसत्योयात्वस्माइदुप्रतवसेशास

२० द्वह्निरित्येतान्यहीनसूक्तानितेषांप्रवेशाविषयउच्यते। यावापसहचारिणीस्फक्तंभवति।

20 यान्यहानिषळहस्तोत्रियवंतितेष्वेतानिभवंतिचतुर्विंशासहचारिषुमहाव्रतादिष्वित्य

र्थः। षळहस्तोत्रियावापसहचारिणीस्फक्तंभवति। इदानींतृतीयसवनमुच्यते। उदुष्य

देवःसविताहिरण्ययेतितिस्रस्तोहिद्यावापृथिवीयन्तस्यवोरथ्यामितिवैश्वदेवं। आर्भव

मेकाहिकमेववैश्वदेवंशस्त्रंभवति॥ ॥पृक्षस्यवृष्णोवृष्णोशर्धाययज्ञेनवर्धतेत्याग्नि

मारुतं॥ एतदाग्निमारुतंशस्त्रंभवति। अग्निष्टोमइदमहः। एतच्चतुर्विंशमहरग्निष्टो

मसंस्थंभवति। आग्निमारुतांतमित्यर्थः। उक्थ्योवा। अयंचतुर्विंशउक्थ्यसंस्थोवाभवे २०

त्। अस्मिन्नहनियत्सत्यक्षसमाम्नातांत्वस्मादन्यत्सर्वमैकाहिकंभवति। एवंसर्वत्रप्रत्य

क्षमाम्नानादन्यत्स्वप्रकृतितोग्रहीतव्यं ॥ ४ ॥ अभिप्लवषष्ठ्याहानि। अभिप्लवश्च षष्ठ्य
श्चाभिप्लवषष्ठ्यौ तयोरहान्यभिप्लवषष्ठ्याहानि इत ऊर्ध्वं वक्ष्यंत इति संबंधः। अभिप्लव
स्य पूर्वनिपातो गवामयने तस्य पूर्वप्रयोग इत्यनेनाभिप्रायेण। रथंतरपृष्ठान्ययुजा
नि। अभिप्लवषष्ठ्याहान्यधिकृतानि तयोर्यान्ययुजानि विषमाणि तानि रथंतरपृष्ठा
नि भवेयुः। तेषु रथंतरं साम पृष्ठस्थाने भवतीत्यर्थः। बृहत्पृष्ठानीतराणि। इतराणि यु
ग्मानि समानि तेषामेव द्वितीयचतुर्थपृष्ठान्यधिकृतान्यहानि तानि बृहत्पृष्ठानि स्यु
स्तेषु बृहत्साम पृष्ठस्थाने भवतीत्यर्थः। तृतीयादिषु षष्ठ्यस्यान्वहं द्वितीयानि वैरूपवै
राजशाक्वररैवतानि। षष्ठ्यस्य यानि तृतीयादीन्यहानि चत्वारि तेषु वैरूपादीनि चत्वारि
सामानि यथासंख्येन रथंतरस्य बृहतश्च द्वितीयानि पृष्ठानि भवंति द्वितीयादीनीति व

सू०वृ०३१ चनं बृहद्रथंतरयोरबाधनार्थं। अन्वहवचनमेतेषामहर्धर्मत्वप्रतिपत्त्यर्थं। तेन पृष्ठ्याह
२१ रतिदिष्टेष्वप्येष धर्मो भवतीति गम्यते। तेषां यथास्थाने क्रियायां योनीः शंसेत्। पृष्ठ्याभिप्लु
21 वानि विषमाणि रथंतरपृष्ठानि समानि बृहत्पृष्ठानि पृष्ठ्यवत्तीयादीनि वैरूपादिभिः
पृष्ठानीत्युक्तं एवं यदि छंदोगाः कुर्युः अस्माभिरप्येषां साम्नां योनिभिर्निष्केवल्यानां स्तो
त्रियाः कर्तव्या भवंतीत्येतदवगतं। इदानीमिदमुच्यते। यद्येतानि निष्केवल्यस्य स्थाने
न कुर्युस्तदास्माभिस्तस्मिंस्तस्मिन्नहनि तदीया योनिर्योनिस्थाने शंस्तव्येति। यथास्था
नवचनं तस्मिन्नहनि पृष्ठ्यस्य स्थाने यात्यक्रिया सैव योनिशंसनस्य निमित्तं नाहः सं
बंधिनीत्येवमर्थं। तेन पृष्ठ्यस्थानादन्यत्र क्रियायामप्यक्रिया चेत्पृष्ठ्यस्थाने शंस्तव्यैव २१
योनिरिति वेदितव्यं। तयोरक्रियमाणस्येत्यत्र यथास्थानवचनमंतरेणापि सिध्यत्यय

मर्थः। तत्रैकैकस्यैव साम्नस्तत्कार्यसंबंधितयोक्तत्वात्क्रियमाणस्येत्युक्तेपि कार्यविशे
षसंबंधो गम्यत एव। तत्र पुनः केषांचिद्द्विसामताभ्यां संगताभ्यां वा तत्कार्यं कुर्युः।
एकेन वा तस्मिन्कार्ये कृतेन्यदन्यस्मिन्कार्ये कुर्युरिति कार्यविशेषसंबंधप्रायेणावगते
अक्रियायामित्येतावत्युक्ते सिद्धि साम संबंधिष्वनियतत्वात्कार्यस्याहृतः संबंधिन्यक्रि
येति कस्यचिद्भ्रांतिः स्यात्तदपनोदनार्थं यथास्थान वचनं कृतं। सर्वत्रस्वयोनिभावेन्य वा
त्राश्विनात्। तेषां योनीः शंसेदिति। अनुवर्तते सर्वत्रेत्यनेन पृष्ठ्याभिप्लवाभ्यामन्यत्रा
पि पृष्ठ्यस्थानादन्यत्रापीत्येतदुभयं गम्यते। तदेव स्पष्टयति। अन्यत्राश्विनादिति सा
म्न उत्पत्तिर्यस्यामृचि सा योनिरित्युच्यते। सा योनिः स्वयोनिः। न स्वयोनिः। तस्याभावः
अस्वयोनिभावः एतदुक्तं भवति। रथंतरादीनां षण्णां यत्र क्वापि हनि यत्र क्वापि कार्ये

सं० वृ० ३१ अस्वयोनिभावे सति तत्र तत्राह नि निष्केवल्ये योनिस्थाने योनिशंसनं कर्तव्यमित्यन्यत्रा
२२ श्विनात्। आश्विनार्थात्संधिस्तोत्रादन्यत्रैवं भवति। तत्र यो योऽस्य स्वयोनिभावः स न स्वयो
22 निशंसनस्य निमित्तं भवतीत्यर्थः। सर्वत्र योनिशंसनं निष्केवल्यस्य योनिस्थान एवाय
ण ज्ञायज्ञीयस्य त्वक्रियमांस्यापि सानुरूपां योनिं व्याहावं शंसेदूर्ध्वमितरस्यानुरूपात्।
यज्ञायज्ञीयस्याक्रियमाणस्यापि शब्दादस्वयोनिभूतस्य च योनिशंसनं विधीयते।
तस्यैव योनिशंसनस्य द्वाविमौ विशेषौ। ऊर्ध्वमितरस्यानुरूपादिति योनिशंसनस्थानं।
सानुरूपत्वे च स्तोत्रियानुरूपयोराहावस्थत्वं चेत्येते पंचार्थाः अस्मिन्सूत्रे विधीयंते।
व्याहावचनं सकृत्पृथग्वेति विकल्पनिवृत्त्यर्थं। अन्यद् यथाप्राप्तं विधीयते। ऊर्ध्वमितर २२
स्यानुरूपादिति यज्ञायज्ञीयस्य स्थाने यदन्यत्सविष्टं तस्यानुरूपादूर्ध्वमित्यर्थः। एकस्मा

एवयोनित्वे सत्यपि योनिशंसनेक्रियमाणेयत्साम गास्तृक्षप्रयोगकालेगीयते ताः स
मस्ताऋचः शंस्तव्याः। एकैकशस्तत्साम संबंधेन तत्साम संबंधिनीनामृचांविवक्षितत्वा
त्। होत्रकाः परिशिष्टानावापानुद्धृत्य। तत्स्थाने वक्ष्यमाणाऋचआवपेरन्निति शेषः।
होत्रकाणां प्रातः सवने शस्त्राण्येवं भवति। परिशिष्टानावापानुद्धृत्य तत्स्थाने वक्ष्यमाणा
ऋचः कृत्वा चातुर्विंशिकान्येवं भवति। एतेनाहाकृत्यानीति सर्वत्रैकाहिके शस्त्रे प्राप्ते
तन्निवृत्त्या चातुर्विंशिकप्रापणार्थं परिशिष्टानावापानुद्धृत्येत्युक्तं। मित्रंवयंहवामहे
मित्रंहुवेपूतदक्षमयंवांमित्रावरुणानो मित्रावरुणेति तृचाः प्रवोमित्रायेति चतुर्णां
द्वितीयमुद्धरेत्प्रमित्रयोर्वरुणयोरिति षड्का व्येभिरद्भ्येति तिस्रोमित्रस्यच
र्षणीधृत इति च तस्रो मेत्र्यो यच्चिद्धितेविशइति वारुणां मेत्र्यो वारुण्यामिति देवतानिर्दे

स०दृ०उ१ शस्येदं प्रयोजनं। मित्रावरुणदेवतत्वान्मैत्रावरुणस्यैतासामावापो मिश्रितानामेव कर्तव्य
२३ इति। तत्र मिश्रणे बकुत्वा द्वारुणीनां बध्यो वारुण्यो ल्पीयस्यो मैत्र्य इत्येवं मिश्रयेत्। एत
23 स्यत्वच मावपेत मैत्रावरुणो नित्यादधिकं स्तोमकारणात्। एतस्य ऋक्समाम्नायस्य
सकाशात्त्वचं गृहीत्वा परिशिष्टा वा परस्तान आवपेन्मैत्रावरुणः नित्यादित्युच्यत परि
शिष्टा वा पश्चातुर्विंशिकं शस्यं नित्यमित्युच्यते तस्मादधिकमित्यर्थः। नित्येनैव पंच
दशाख्यकेनास्तोमा अतिशस्ता भवंतीति। तथा तेष्वपि नियमेन नित्यादधिकमावपेते
त्येवमर्थं नित्यादधिकमित्युच्यते। स्तोमकारयादिति स्तोमातिशंसनप्रयोजनकारि
तोयमावाप इति दर्शयति। तेन पंचदशस्तोमेपि त्वचावापः कर्तव्यः। पंचसप्तदशो न २३
वैकविंशो द्वादश चतुर्विंशो। पंचदशत्रियां वे। एकविंशतिस्त्रिंशे द्वात्रिंशतं चतुश्च
त्रै

त्वारिंशे षड्विंशतमष्टाचत्वारिंशे। एकयाद्वाभ्यांवाप्रातःसवनइत्यनेनैवस्तोमानु
गुणाः ऋचः आवप्तव्याइत्येवंसिद्धेसंख्योपदेशस्येदंप्रयोजनंस्तोमातिशंसनेनाभाक्ता
नगणयितव्याइति। अतस्तेषुसत्स्वपितानगणयित्वास्तोमातिशंसनार्थेएतत्संख्याका
ऋचआवप्तव्याइत्ययमर्थःसिद्धोभवति। एकाल्पीयसीर्वा। एकयाहीनयावाव्यपेता। चत
स्रःसप्तदशे। अष्टावेकविंशे। इत्येवंप्रकारः। सप्तदशात्साकृतनेषुस्तोमेषुनित्यादधि
कमितिवचनात्तत्रएवनित्यमावाप्तव्यः। एकाहेष्वेकभूयसीर्वा। एतेष्वहःसुएकाहा
भवत्सुएकभूयसीर्वाआवपेत्। पूर्वोक्तावाषड्सप्तदशेद्वेएकविंशेत्येवंप्रकारोवैश्व ६
देवस्थानेप्रथमंषष्ठ्याहरित्येवमादिषु। अत्रप्रकरणात् आह। नारंभणीयानपर्यासा
अंत्याएकाहिकाःसूक्ताःपर्यासस्थानेषु। तायमानरूपाणामहर्गणधर्मत्वादेकाहेषुप्रा

सू०वृ०उ१ न्निर्नास्तितेनारंभणीयाः पर्यासाश्चतेषुनसंति।तत्रारंभणीयास्थानंशून्यमेवावतिष्ठते।प
२४ र्यासस्थानेष्वंत्याऐकाहिकास्तचाअस्मिन्नेवसत्रेविधीयंतेतेनैकाहिकेष्वेकयोनिशंस्यामिति
२५ युक्तमेतत्।ब्राह्मणाछंसिनःसुरूपकृत्नुमूतयइतिषड्सूक्तानि।सूक्तग्रहणमेतानिष
ड्सूक्तान्यत्रविहितानीषड्सूक्तान्यत्रविहितानीतिज्ञापनार्थं।इतरथापादग्रहणादृच
एवप्रतीयेरन्।एवंतर्हिकिमितिपादग्रहणंक्रियतेऋक्कुसंत्यप्रेयार्थं।अतोवगम्यते
एतेषुषड्सूक्तेषुयावतीभिर्ऋग्भिःप्रयोजनंतावतीऋचआवपेत्।नाखंडितानिषड्
सूक्तानीति।अत्रादहस्वधामन्वित्येताःषण्मारुत्यऋचस्तासुहारवचनाभावात्ताअपि सा
प्रयोक्तव्याः।षड्सूक्तवचनंमारुतीनामपरिवर्जनंसूचयति।अस्मादेववचनाज्ज्ञायते॥ २४
ताअप्यैंद्र्योमारुत्यस्तासुनिपातभाजइति।एवंसतितस्मादैंद्रंब्राह्मणाछंसीप्रातःसवने

ता

शंसतीत्यस्य श्रुतेरविरोधो भवति। आवाप उक्तो मैत्रावरुणेन। आवाप उक्त इत्येतावतैव
सिद्धे मैत्रावरुणेनेति वचनं यथा मैत्रावरुणस्य स्वदेवत्याभिर्ऋग्भिरावाप उक्तः। एवं अ
स्यापि निर्दिष्टा ऋचः स्वदेवत्या एव न मारुत्य इत्येतत्संदर्शनार्थं। इहेंद्राग्नी आगतं ऊ वेय इंद्राग्नी।
यो रिद्रमिति न वेयं वामस्य [illegible] मन्मन इत्येकादश यत्तस्य हि रुह इत्यछावाकस्य। आवाप
उक्तो मैत्रावरुणेनेत्यत्रापि संबध्यते। आयात्विंद्रोवस इति मरुत्वतीयमानइंद्र इति नि
ष्केवल्यं प्रथमस्याभिप्लविकस्य। प्रथमस्याभिप्लविकस्येत्ययमधिकारार्थः। प्रथमस्या
भिप्लविकस्याहन् एते निष्केवल्यमरुत्वतीययोः सूक्ते भवत इत्ययमर्थः। मध्यंदिन इत्युक्त
एते शस्त्रे प्रतीयातां। यत्र यत्र मध्यंदिन इति वक्ष्यति तत्र तत्र निष्केवल्यमरुत्वतीये शस्त्रे वि
द्यात्। अहीन [illegible] सूक्तरूपान एवाता मिंद्र यन्न इंद्रः कथा महामिंद्रः सूर्भिद्यएक इ घास्तिम

स्०वृ०३१ श्रृंगाइमाम्नाभिवेछंतिलाशासवाहिरितिसंपाताः।यान्येतानिनवसूक्तानिनिर्दिष्टानितेषांसंपाता
२५ इतिसंज्ञाविधीयते।तेचसंपातामाध्यंदिनेहोत्रकाणांशस्त्रेषुयान्यहीनसूक्तस्थानानितेषु
25 स्थानेषुभवंतीत्ययमप्यर्थोस्मिन्सूत्रेविधीयते।अहीनसूक्तस्थानइतिवचनादत्रापिचातु
र्विंशिकस्यप्राप्तिंदर्शयति।एकैकस्यत्रयस्त्रयः।प्रथमचतुर्थसप्तमादयस्त्रयःसंपाता
एकैकस्यभवंति।उक्तामरुत्वतीयेः।यथामरुत्वतीयाःप्रगाथाःपृष्ठ्याभिप्लवयोरहःसु
भवंतितथासंपाताअपीत्यर्थः।युंजतेमनइहेवेहेइतिचतस्त्रोदेवाकुवइतिवैश्वदेवं।
द्यावापृथिवीयमेकाहिकंएतद्वैश्वदेवंशस्त्रं।आज्यप्रउगेआग्निमारुतंचैकाहिकानि।
एतत्प्रथमस्याभिप्लविकस्याधिकारात्संपातास्तवाक्येनसवार्थाः॥५॥ ॥द्वितीयस्यच २५
तुर्विंशेनाज्यं।द्वितीयस्याभिप्लविकस्यहोताजनिष्टेत्याज्यंभवति।वायोयेतेसहस्रिणा

स इति द्वे तीव्राः सोमा आ गहीत्येको भादेवा दिविस्पृशेति द्वे शुक्रः । स्याद्य गवाशिर इत्येकाऽयं
पंच वां मित्रावरुणेति तृचाः । तृचग्रहणमृक्त्रित्वस्यार्थं । गार्त्समदं प्रउगमित्येतदाचक्षते । गा
र्त्समदं प्रउगमित्येतदाचक्षते । गार्त्समदशब्दस्तद्दर्शाणां भूयस्त्वात् । विश्वानरस्य वस्प
तिमिंद्र इत्सोमपा एक इति मरुत्वतीयस्य प्रतिपदनुचरौ । इंद्र सोमं पात उ तिरव मेति मध्यं
दिनः । निष्केवल्यस्योत्तमे विपरीते । निष्केवल्यस्य यत्तृकं यात ऊतिरिति तस्य ये उत्तमे
ऋचौ ते विपर्यस्य शंसेत् । भारद्वाजो होता चेत्प्रकृत्या । यदि होता गोत्रतो भारद्वाजः स्या
त्तदा प्रकृत्यैव शंसेरन् । होतृग्रहणाद्धोतुरेव भारद्वाजत्वमत्र विवक्षितं । न प्रतिनिधि
प्रवृत्तस्यापि तेना भारद्वाजोपि प्रतिनिधिप्रवृत्तः प्रकृत्यैव शंसेद्धोता चेद्भारद्वाजः स्यादि
ने ति । चातुर्विंशिकं तृतीयसवनं विश्वो देवस्य नेतुरित्येका तत्सवितुर्वरेण्यमिति द्वे आ विश्व

स०वृ०३। देवं सत्यातिमिति तु वैश्वदेवस्य प्रतिपदनुचरौ। अयं तु विशेषश्चातुर्विंशिकात्तृतीयसवना
२६ देतौ प्रतिपदनुचरौऽभिधीयेते इति। आज्यप्रउगे प्रतिपदनुचराश्चोभयोर्युग्मेष्वेवमभिप्लू
26 वे। अस्मिन्नहनि ये आज्यप्रउगे वैश्वदेवमरुत्वतीययोरुभयोः प्रतिपदनुचराश्चाभि
प्लवे यान्यहानि युग्मानि द्वितीयचतुर्थषष्ठानि तेते शुभवंति न केवलं द्वितीय एवेति सू
त्रार्थः। अभिप्लवाधिकारे पुनरभिप्लवग्रहणं उभयोरित्यस्य वचनस्य षडहविषय
तां व्यावर्त्य शास्त्रविषयत्वज्ञापनार्थं॥ ६॥ तृतीयस्य त्र्यर्यमा यो जात एवेति मध्यंदिनः।
आज्यप्रउगेऽैकाहिके होत्राणां प्रातःसवने माध्यंदिने चोक्तान्येवोभयोरपि षडह
योर्भवति। तद्देवस्य घृतेन द्यावापृथिवी इति तिस्रोनश्वो जातः परावतो य इति वैश्वदेवं। २६
वैश्वानराय धिषणां धारावरा मरुतस्त्वमग्ने प्रथमो अंगिरा इत्याग्निमारुतं। चतुर्थस्यो।

ओजस्त इति निष्केवल्यं। ऐकाहिकं मरुत्वतीयं। कया म्यग्निमस्य मेधावा छथि वीरइति ति
स्रस्त्तमे अपश्यति वैश्वदेवं। ऐकाहिकं वैश्वदेवं सूक्तं। वैश्वानरं मनसेतितिस्रः प्रये
शुभं तेजनस्य गोपा इत्याग्निमारुतं। आज्यप्रउगे प्रतिपदनुचराश्चद्वैतीयाः। पंचमस्य
कयाशुभा यस्तिग्मश्रृंग इति मध्यंदिनः। आज्यप्रउगे ऐकाहिक एव। कयाशुभीयस्य तुन
वम्युत्तमान्यत्रापि यत्र निविद्धानं स्यात्। अन्यत्रापीति वचनात्कर्मांतरेपि यत्रैतत्सूक्तं
निविद्धानीयं भवति तत्र न वम्युत्तमा कर्तव्या। अतो निष्केवल्यस्योत्तमे विपरीते मरुत्वती
यस्योत्तमे विपरीते इत्येवमादिषु तत्कर्मावधिक एवनादृशो विधिर्भवतीति वेदितव्यं
निविद्धानमिति। अत्र शब्दो न निविद्धानीयमिति। तेनैतत्साधितं भवति। बहुष्वपि नि
विद्धानीयेषु यत्रैतस्मिन्नेव सूक्ते निविद्धीयते तत्रैव न वम्युत्तमा न निविद्धानीयमात्र इत्ये

स०ह०उ१ तदेवगम्यत इति। घृतवतीभुवनानामभिश्रियेंद्रश्रुत्सुभिर्वाजवद्भिरितित्र्यचौकउग्रयाये

२७ तिवैश्वदेवं। सावित्रमैकाहिकमेव। प्रक्षस्यवृष्णोवृष्णोशर्धायनूचित्सहोजाइत्याग्निमा

रुतं। षष्ठस्यसावित्रार्भवेत्तृतीयेनवैश्वानरीयंचकतरापूर्वेंपासानक्तेतिवैश्वदेवंप्रथ

ज्यवइमंस्तोममित्याग्निमारुतं। आज्यप्रउगेप्रतिपदनुचराश्चद्वैतीयाः। अन्यदैका

हिकं ब्राह्मणस्यत्यमरुत्वतीययोरुक्तोविशेषः। इत्यभिप्लवः षळहः। षळह इतिवच

नमभिप्लवस्यषळहसंज्ञाविधानार्थं। अभिप्लवइतिवचनंपृष्ठ्यस्यापिषळहसंज्ञा

प्रापणार्थं। तेनषळहव्यवहारेद्वयोःसंप्रत्ययःसिद्धो भवति। तस्याग्निष्टोमावभि २७

तउक्थ्यामध्ये। अभिप्लवस्यसंस्थाविधिरेताभ्यांसूत्राभ्यांविधीयते। उक्थ्येषुस्तोत्रि

यानुरूपाः। वक्ष्यंतइतिशेषः। तेष्विति वक्तव्यउक्थ्येष्वितिवचनमास्मिन्सूत्रेप्रकरणे

येउक्थ्यास्तेषां सर्वेषां वक्ष्यमा योन विधिनासंबंधसिध्यर्थ्यं। मैत्रावरुणस्य। ७॥ एन्द्र
भुक्रवाणित आग्निरगामिभारतः प्रवोवाजा अभिद्यवो भि प्रयांसिवाहसा प्र मंहिष्ठाय
गायत प्रसो अग्ने तवो भ्द्रृ धंतमग्नेयंयज्ञमध्वरं यजिष्ठं त्वावहृमहेयः समिधायआ
हुत्यातेअग्नइधीमत्युभेसुश्चंद्रसर्पिष इतिद्वे एका चाग्निंतमन्येयोवसुरातेवत्सोम
नोयमदाग्नेरस्पूरं रयिंभर प्रेष्ठंवो अतिथिं श्रेष्ठंयविष्ठभारत भद्रोनो अग्निराहुतोयदी
घृतेभिराहुत आधायेअग्निमिंधत इमा अभि प्रणोनुम इति एतानि द्वयस्तोत्रिया
नुरूपयुगलानि षष्ठस्ययुगलस्यस्तोत्रियः समाहार्यः। अथब्राह्मणाच्छंसिनोभ्रात्य
व्योअनात्वंमातेअमाजुरोयथैवात्यसिवीरयुरेवात्यस्यसूनृतातंतेमदं गृणीमसित
म्वभिप्रगायतवयमुत्वामपूर्व्ययोनइदमिदं पुरेन्द्रायसाम गायतसखायआशिषा

स्व०वृ०३। महियएकइद्विदयतेयइंद्रसोमपातमएंद्रनोगध्येउमध्वोमादिंतरमेतोन्विंद्रंस्तवामसखा
२८ यस्तेहोइंद्रव्यश्ववत्त्वंनइंद्राभरवयमुत्वामपूर्व्ययोनइदमिदंपुरायाहीमइंद्रेवइतिसमा
28 हार्योनुरूपोभ्रात्व्योऽनात्वंमातेअमाजुरोयथेति।एतान्यपिदृश्रोवानवमस्यानुरू
पःसंहार्यः।आद्यस्यपुनर्वचनंसत्रादन्यत्राप्यस्ययुगलस्यपरस्परनियमार्थो।अ
थाच्छावाकस्येंद्रविश्वाअवीवृधन्नुकस्मिंद्रायशंस्यंश्रुधीहवंतिरश्च्याआश्रुत्कर्णश्रु
धीहवमसाविसोमइंद्रतइमामिंद्रसुतंपिबयदिंद्रचित्रमेहनायस्त्तेसाधिष्ठोवसे
पुरांभिंदुर्युवाकविर्वृषात्वसिराधसेगायंतित्वागायत्रिणआत्वागिरोरथीरिवेति
।एतानिषड्युगलानि।अत्राप्यनुरूपनियमार्थमेषांविधानं।सूक्तानामेकैकंशिक्षा २८
वपेरन्॥८॥ स्तोमेवर्धमाने।उक्थ्यशस्त्राणिप्रकृतानितेषुयद्यदंत्यसूक्तं।तत्तदेव

शेष्यस्तोमे वर्धमाने तद्दतिशंसनार्थं यावदर्थमृचो वक्ष्यमाणेभ्य ऋक्समुदायेभ्यो गृही
त्वावपेरन् होत्रकाः। इमा उ वां भृमयो मन्यमाना इतिति सृ इंद्राको वामिति सूक्ते ऋष्वीवां
यज्ञो असुवांनरा पुनीषे वामिमानि वां भागधेयानीत्येतस्य यथार्थं मैत्रावरुणः। यथार्थं
यथा प्रयोजनं यावतीनामृचामावापे सति त्र्यवराभिर्ऋग्भिस्तोमातिशस्तो भवति
तावतीरावपेतेत्यर्थः। यस्तस्तंभयोजाद्गिभिघ्नेद्दिव इति सूक्ते अस्तेव स्मप्रतरमाया
त्विंद्रः स्वपतिरिमांधियमिति ब्राह्मणाच्छंसी। एतस्य यथार्थमावपेतेति शेषः। विष्णो
र्नुकमिति सूक्ते परो मात्रेत्यच्छावाकः। अत्राप्यावपेतेति शेषः॥३॥ पृष्ठ्यस्याभिप्लवे
नोक्ते अहनी आद्ये आद्याभ्यां। अभिप्लवस्य ये आद्ये अहनी ताभ्यां पृष्ठ्यस्याद्ये अहनी
व्याख्याते। अभिप्लवस्य प्रथममहरेवं भवति। आज्यं तृतीयसवनं चातुर्विंशिकमि

सू० वृ० ३१ तरउक्तमेव। एवंपृष्ठ्यस्याद्ये अहनी भवतः। तृतीयसवनानि चान्वहं। न केवलमाद्ये एवाह्नी
२६ अभिप्लवातिदिष्टे स्यातां। उत्तरेष्वहःसु यानि तृतीयसवनानि तान्यभिप्लवस्योत्तरेषां अ क्राम
न्वहं तृतीयसवनानि तैरेवातिदिष्टानीत्यर्थः। उपप्रयंत इति तु प्रथमेहन्याज्यं। अग्निं दू
तमिति द्वितीये। आद्ययोरप्यकारयं विशेषः। एते तयोराज्ये भवत इति। तृतीये तु युक्ष्वाही
त्याज्यं। आज्याधिकारे पुनराज्यग्रहणं तृतीयशब्दस्य वैलक्षण्यप्रदर्शनार्थं। वैलक्षण्यं
चोत्तरत्राधिकारासिद्धिः। वायवायाहि वीतय इत्येका वायो याहि शिवा दिव इति द्वे इंद्रश्च वा
यवेषां सुतानामिति द्वयोरन्यतरा द्विरा मित्रं वरुणावयमश्विनावेह गच्छतमायात्यद्रिभिः
सुतं सजूर्विश्वेभिर्देवेभिरुत नः प्रिया प्रियास्वित्यो ब्राह्मं प्रउगं। आद्यः संहार्यो द्वितीयो २६
द्वाभ्यामभ्यासेन द्वितीयाभ्यासेन वा तृचः कर्तव्यः। ओ ब्राह्ममिति ब्राह्मणानुवादस्तस्य

विधायकत्वं मन्यमानस्यानुष्ठानमाह। उत्तमेन्हचमभ्यासाश्चतुरक्षरा। अन्हचं प्रत्यृच मित्यर्थः। चत्वार्यक्षराणि यस्मिन्नभ्यासे स चतुरक्षरोभ्यासः। ते च त्रयः सकृत्त्रय संबंधा त्। स चाभ्यासस्तृतीये पादे भवति। उष्णिक्संपादनस्याचिकीर्षितत्वात्। स्तोम्याभ्रूत्स्तोम्या भ्याभो३मिसेवं। नवा। वाशब्दः पक्षं व्यावर्तयति। तत्राभ्यासः कर्तव्यः। ओष्णिहशब्दस्य विधायकत्वं न संभवति। प्राप्तार्थत्वात्। ब्राह्मणग्रामण्छब्दप्रवृत्तिः संभवतीति। तृतीये भिन्नोष्णिके नोक्तो माध्यंदिनः। तं तमिद्राधसे महे त्रयइंद्रस्य सोमा इति मरुत्वतीयस्य प्र तिपदनुचरौ। वैरूपं चेत्पृष्ठं यद्याव इंद्र ते शतं यदिंद्र यावतस्त्वमिति प्रगाथौ स्तोत्रिया नुरूपौ। निष्केवल्यस्यातिशेषः। रथंतरं चेदुक्तो। १०॥ चतुर्थेहनि प्रातरनुवाकप्रतिपद्य र्धर्चाद्योर्न्यूंखः। पार्ष्णिके चतुर्थेहनि यस्मात्प्रातरनुवाकं तस्याद्यायाः ऋचो यावदर्धर्चयोरा

स्र॰वृ॰उ॰१ दीतयोर्न्यूंखोभवतिअहरधिकारेपुनरहनीतिवचनंअहर्धमेर्ययंन्यूंखइतिप्रदर्शनार्थं॥
३० तेनात्रयान्यूंखभाजऋचस्तासामन्यत्रवचनादृतेन्यूंखोनभवति।द्वितीयंस्वरमोकारंत्रिमात्र
30 मुदात्तंत्रिः।इदानींन्यूंखस्यलक्षणमुच्यते।तयोरर्धर्चयोर्योद्वितीयःस्वरःसंहितावस्थायां
तमोंकारंत्रिमात्रंकृत्वात्रिर्ब्रूयात्।सछोर्धर्चशऋक्शइतिसर्वत्रशंसनविधानात्।संहिता
वस्थानामेवमंत्राणांशंसनमुक्तंभवति।अतःसंहितावस्थायामित्युक्तं।पूर्वसूत्रेर्धर्चयो
रित्याद्ययोरक्षरयोर्न्यूंखोविहितः।इहतुद्वितीययोर्विधीयते।कथमनयोःसंबंधइति।पू
र्वस्यायमभिप्रायः।ब्राह्मणोक्तोयोन्यूंखविधिरेकाक्षरद्व्यक्षरत्र्यक्षरचतुरक्षरैरिति।सो
यमर्धर्चाद्योरित्यनेनसूचितोभवति।यस्तुखलुपक्षस्तत्रैवसिद्धांतितः।तस्मात्तस्माद्य ३०
क्षरेपिवन्यूंखयेदिति।तमेवपक्षमंगीकृत्येदानींन्यूंखोविधीयते।द्वितीयंस्वरमित्यादिना॥

ष्टादपरि

तस्यतस्यचोपरिँमितान्पंचवार्धौकारानुदत्तान्।तस्यतस्यौकारस्योपरिष्टादधौकारान
नुदात्तानपरिमितान्त्रीन्चतुरःपंचवाब्रूयात्।यत्रसंख्याविशेषंनिर्दिश्यापरिमितशब्दं
ब्रवीतितत्रनिर्दिष्टात्संख्याविशेषादुपरिष्टापरिमितशब्दार्थोग्रहीतव्यः।यत्रपुनरुपरिष्टा
त्संख्याविशेषोनिर्दिष्टस्तत्रप्रागेवसंख्याविशेषाद्बहुत्वेसत्येवानियतिर्ग्रहीतव्योसिद्धं।अ
र्धंचतदौकारइतिकर्मधारोयंसमासः।उत्तमस्यतुत्रीन्।उत्तमस्यौकारस्योपरिष्टात्त्रीने
वार्धौकारान्ब्रूयात्।पूर्वमक्षरंनिहन्यतेन्यूङ्ख्यमाने।निहन्यतइत्यनुदात्तीक्रियतइत्य
र्थः।न्यूङ्खाधिकारेपुनर्न्यूङ्ख्यमानेइतिवचनंप्रथमेद्वितीयेतृतीयेचतुर्थेवाक्षरेन्यूङ्ख्यमा
नेपितस्मात्पूर्वमक्षरंनिहन्यतइत्येवमर्थं।तदपिनिदर्शनायोदाहरिष्यामः।उक्तलक्षण
स्यापिन्यूङ्खस्यार्धौकारस्वरूपस्यालौकिकत्वादन्यदप्येवंजातीयकंसंदेहंव्यावर्तयितुं

सू०वृ०उ१ निदर्शनं क्रियते। आपो २ ॐ ॐ ॐ ॐ ॐऽ ॐ ३ ॐ ॐ ॐ ॐ ॐऽ ॐ ३ ॐ ॐ ॐ।

२१ रेवतीः क्ष यथाहि वस्वः क्रतुं च भद्रं बिभृथामृतं च। रायो २ ॐ ॐ ॐ ॐ ॐऽ ॐ ३ ॐ

31 ॐ ॐ ॐ ॐऽ ॐ ३ ॐ ॐ ॐ श्वरुघस्वपत्यस्य पत्नीः सरस्वती तद्गृपाते वयोधो ३

मापो। आपो ३ प्लुतः। रायो ३ प्लुतः। वयोधो ३ मापो ३ प्लुत इत्येवं न्यूङ्खपुनरावृत्तिप्रदर्श

नं प्रत्यावृत्तिन्यूङ्खप्रापणार्थं। अयमेव पाठः। अविछिंनसंप्रदायागतः। यस्तु पुनः संहि

तारूपे या पाठः। स प्रमादकृतत्वात्त्यक्तव्यः। आग्निं न स्ववृक्तिभिरित्याज्यं। पादग्रहणे यो

गीदं सूक्तमेव। आज्यस्थाने विधानात्। अत्र पादग्रहणस्य प्रयोजनमन्वेषणीयं। तस्यो

त्तमावर्जं तृतीयेषु पादेषु न्यूङ्खो निनर्दश्च। तस्य सूक्तस्य याः पुरस्तात्प्रागुत्तमाया ऋचः। २१

तासां तृतीयेषु पादेषु न्यूङ्खो निनर्दश्च कर्तव्यः। उत्तमायां न्यूङ्खनिनर्दरहितां शंसत्येव।

उक्तोन्यंखः। उक्तसंकीर्तनमुत्तरविवक्षार्थं। स्वरादिरं तओंकारश्चतुर्निनर्दः। तृतीयेसुपा
देष्वनिनर्दउक्तस्तेषु कस्मिन्प्रदेश इत्युच्यते। पादंते स्वरादिः स्वरो वाटिप्रदेश इत्यर्थः। स
ओंकारश्चतुष्कृत्वो वक्तव्यः स निनर्द इत्युच्यते। तस्यैव विशेषमाह। उदात्तौ प्रथमोत्तमौ।
अनुदात्तावितरौ। उत्तरोनुदात्ततरः। मध्यमयोरुत्तर इत्यर्थः। प्लुतः प्रथमो मकारांत उत्तमः।
तदपि निदर्शनायोदाहरिष्यामः। अत्रापि टिप्रदेशोपमर्दश्च निनर्दोनुपमर्दश्चेत्येवमादि सं
देहनिवृत्त्यर्थं निदर्शनं। आग्निंन स्ववृक्तिभिः। होतारं त्वा वृणीमहे। यज्ञो ३ ओं ओं ओं
ओं ओं १ ओं २ ओं ओं ओं ओं ओं १ ओं २ ओं ओं ओं यस्तीर्णबर्हिषे विवो मदो ३ ओं ३ ओं
२ ओं ३ शीरं पावकशोचिषं विवक्षसे ३ माग्निंन स्ववृक्तिभिः। होतारं त्वा वृणीमहे। पूर्व
स्मिन्नर्धर्चे यो विग्रहः स आज्याद्यत्वकारितो न न्यंखनिनर्दकारितः। तेन द्वितीयादिष्व

स०वृ०उ१ क्तमसनभवति। आवृत्तिप्रदर्शनार्थं पूर्वस्यार्धर्चस्य पुनः पाठः। सर्वत्र संहितापाठोपभ्रंश एव।
३२ ओ३ओ ओ ओ ओ ओ ओ ५ ओ ३ओ ओ ओ ओ ओ ५ ओ ३ओ ओ ओ मदेथमदेवो ३ओ ओ ओ
32 मोथामोदेवमित्यस्य प्रतिगरः। न्यूंखनिनर्दाभ्यां प्रणवेन संबंधात् द्वितीयेर्धर्चेयं प्रतिगरो
द भवति। पूर्वस्मिन् प्लुतादिरेव। अपिवोदात्तोनुदात्तं स्वरितमुदात्तमिति चतुर्निनर्दः। निन
र्दरूपस्योकारचतुष्टयस्य यथासंख्येन स्वरविशेषो नेन विधीयते। पूर्वोक्तस्यायं विक
ल्पः। तथाभूतशास्त्र निनर्दसति प्रतिगरानिनर्दे पि तथाभावं निदर्शनेन दर्शयन्न्यूंखेन वि
नातदर्शनाशक्तेस्तत्सहितमेव दर्शितवानाचार्यः। तदपि निदर्शनायोदाहरिष्यामः। ॥
अग्निं न स्ववृक्तिभिः। होतारं त्वा वृणीमहे। यज्ञो ३ओ ओ ओ ओ ओ ५ ओ ३ओ ओ ओ ३२
ओ ओ ५ ओ ३ओ ओ ओ यस्तीर्णबार्हषे विवो मदो ३ओ ओ ओं ३शीरं पावकशोचिषं

विवस्वसो३माग्निं नस्ववृक्तिभिः। होतारं त्वावृणीमहे। ॐ ३ॐ ॐ ॐ ॐ ॐ ऽॐ ३ॐ
ॐ ॐ ॐ ॐ ऽॐ ३ॐ ॐ ॐ मदेथमदैवो ३ॐ ॐ ॐ मोथामोदैवोमित्यस्य प्रतिग
रः। गतार्थमेतत्सर्वं। प्रथमादर्धर्चकारादध्वर्युर्न्यूंखयेत्। अवसाने प्रणवे च प्रतिगरो व
क्तव्यः। तत्र प्रतिगरां तर्वर्तिनः। प्रणवस्य ऋगंतवर्तिना प्रणवेन समानकालता संपाद
नार्थं प्रतिगरांतं कालश्चतुर्भिः सूत्रैर्विधीयते प्रथमात्। द्वितीयाद्वा। काललक्षणार्थमे
तदुभयं प्रथमस्याद्वितीयस्य वार्धर्चकारस्य यः कालस्तत्र प्रतिगर आरब्धव्यः। एतौ वि
धी वृषाकप्यादिष्वल्पाक्षरेष्वभवतः। तयोस्तत्र संभवाद्दक्ष्यमाणो तु बह्वक्षरेषु भवतः।
सुपरमं हेके। अस्मिन्पक्षे न्यूंखेन सह न्यूंखमारभ्य विविधमुपरभ्योपरम्य न्यूंखेन न्यू
खं निनर्दे न निनर्दं प्रणवेन [illegible] प्रणवं संपादयेत्। उपरमणं चात्र विलंबनमुच्यते।

सू० टी० ऊ १ नावसानं।अस्य पक्षस्याभिमतत्वसूचनार्थं हशाब्दं पठितवानाचार्यः। यथावा संपादयिष्यंतोम
३२ न्येरन्। एवमारब्धे प्रणवेन प्रणवः संपादयितुमशक्य इति मन्यंते चेत्तथारंभः कर्तव्यः। वा
33 वायोश्शुक्रोअयामितेविहिहोत्राअवीतावायोश्शतं हरीणामिंद्रश्चवायवेषांसोमानामा
चिकितानस्कृक्तत्रआनोविश्वाभिरूतिभिस्स्यमुवोअग्रह्णामपत्संहृजिनंरिशुमंबितमे
नदीतम इत्यानुष्टुभंप्रउगं।अत्रा प्यानुष्टुभवचनंब्राह्मणानुवादः। अत्रतुविशेषोप्य
स्तिवैश्वदेवस्तृचओष्णिहः। तत्रद्वादशाक्षराणिन्यूनानिपरिधानीयहतीतस्यास्त्रिभि या
ऽ वैचनैर्द्वादशाक्षराणि अधिकानीतिसर्वाआनुष्टुभएवेति। एकपातिन्यःप्रथमः। तृचस्य
त्रिप्रतीक इत्यर्थः। तंत्वायज्ञेभिरीमह इदं वसोस्कृतमंध इति मरुत्वतीयस्यप्रतिपदनुचरौ ३२
।प्रतिपदनुचरयोः सहचारित्वादेकोनप्राप्नोतीति। प्राकृतस्यानुचरस्यविधानं। ऋधीह

वमिंद्र मरुत्वाँ इंद्रेति मरुत्वतीयं सूक्तं। तत्र किं द्वयोः सूक्तयोर्निर्विशेषयो ते कस्मि
न्निति संदेहः। यद्येकस्मिंस्तदा पूर्वस्मिन्नुतापरस्मिन्नुतापरस्मिन्निति। एवमन्यत्रापि सू
क्तबहुत्वेपि संदेहः स्यात्तन्निवृत्त्यर्थमाह। अंत्ये निविदं दध्यादनेकभावे सूक्तानां। सर्वार्थी
यं परिभाषा। वैराजं चेत्स्तुष्टं पिबा सोममिंद्र मंदतु त्वेति स्तोत्रियानुरूपौ। स्तुह स्तुष्ठे उक्तावेव।
कुह श्रुत इंद्रो युध्मस्य त इति निष्केवल्यं श्रुधी हवीयस्य तु त्वं च आद्येर्धर्चादिषु न्यूंखः। अ
स्य सूक्तस्याद्ये त्वचे र्धर्चेषु न्यूंखः। आदिग्रहणं न केवलं द्वितीय एवाक्षरे न्यूंखः कर्तव्यः। क्व
तर्हि। आद्ये द्वितीये तृतीये चतुर्थे वा कर्तव्यो न्यूंख इति गम्यते। एवं कुह श्रुतीयस्य। एवमि
त्यनेन तत्र च आद्येर्धर्चादिषु न्यूंख इति गम्यते। विराजां मध्यमेषु पादेषु। विराज इति पिबा
सोममिंद्र मंदतु त्वेति षड् ऋच उच्यन्ते। तासां मध्यमेषु पादेषु न्यूंखः कर्तव्यो द्वितीय एवाक्ष

सू०वृ०उ१ रोऽत्रादिशब्दाभावात्। नित्य इह प्रतिगरो न्यूंखप्रकरणे नित्य एव प्रतिगर ओथामोदैवेति।
३४ स एव न्यूंखादिर्भवति। तस्य यद्यद्यमक्षरं तास्मिंनेव न्यूंखः कर्तव्य इत्यर्थः। प्रणवांतः प्रणवे कु
34 हश्रुतीयानां। कुहश्रुतीयानां द्वितीयेऽर्धर्चे यः प्रतिगरो न्यूंखादिः स प्रणवांतश्च भवति।
यः पुनः कुहश्रुतीयानामेव चतुर्थ्यादिष्वृक्षु द्वितीयेऽर्धर्चे प्रतिगरः स तु मादिरेवाप्र
णवांतः प्रणवे कुहश्रुतीयानामित्येतदुपपादयति। अर्धर्चशः शंसेन उत्तमावर्जं उत्त
मा त्रिष्टुप्छंदः शस्याः। अन्यास्त्विह त्वोनुष्टुभश्चता अर्धर्चशः शस्याः। तेन प्राप्तमेवान्य
तो प्रणवांतत्वोपपादनार्थमतो हि शब्दस्थाने च शब्दो द्रष्टव्यः। न ते गिरो अपि मृष्ये तु
रस्य प्रवो महे महि वृधे भरध्वमिति च तस्त्र स्तिस्त्रश्च विराजः। विराज इति वचनं विराज ३६
एवैता भवंति। नैतास्तु विराड्धर्मो न्यूंखादिरित्येवमर्थं। तथा चोक्तं। न न्यूंख्या विराज इ

ति। तासामूर्ध्वमारंभणीयाभ्यस्तृचानावपेरन्। एताः सप्तऋचउक्ताः। एतासामेवसप्तानां
चतुर्थेहनिमाध्यंदिनेसवनेहोत्रकाःस्वेस्वेशस्त्रेआरंभणीयाभ्यऊर्ध्वंएकैकंतृचमावपे
रंनित्याह। अत्रप्रकारमाह। आद्यंमैत्रावरुणस्तस्योत्तमादिशस्तानांतृचंब्राह्मणाछंसी।
तस्येतितेनेत्यर्थः। तेनमैत्रावरुणेनशस्तानामुत्तमामृचमारभ्ययस्तृचस्तंब्राह्मणाछं
स्यावपेतेत्यर्थः। तस्यचाछावाकः। तस्येतिपूर्ववत्। शेषश्चपूर्ववदेव। यजामहइंद्रंवज्र
दक्षिणमितिद्वितीयानेवमेव। द्वितीयवचनमेषांतृचानांपूर्वैस्तृचैःसमुच्चयार्थं। एव
मेवपूर्ववत्सप्तभिर्ऋग्भिस्त्रयस्तृचाःकर्तव्याइत्येवमर्थं। पंचमेहनियाश्चिच्छिसत्यसोम
पाइत्येकैकमेवमेव। अस्मिन्नेवसूत्रप्रसंगेग्रंथलाघवार्थंपंचमषष्ठयोरप्यह्नोस्तेष्वे
वशास्त्रेषुतस्मिन्नेवस्थानेवस्थानेएकैकंतृचंविदधात्यत्रस्थएंभगवान्सूत्रकारः। षष्ठेह व

सू०वृ०३१ नीशाय हि घोरस्करो ऽजनम्न तेत्येवमेव। एवमेवेति पूर्ववदित्यर्थः॥११॥ स्तोमे वर्धमाने कौ
३५ अघनर्यौ वनेनवायआयात्यर्वाङिति त्यष्टर्चौ न्यावपेरन्नुपरिष्टात्पारुच्छेपीनां। माध्यंदि
35 नेहोत्रकाणां आवापऊर्ध्वंआरंभणीयाभ्योधिकृतः। अथेदानीं स्तोमवृद्धिनिर्वृत्तआवा मि
प[illegible] उच्यते। तेषामेव होत्रकाणां तेष्वेवश
स्त्रेष्वेतानि त्रीणि सूक्तानि त्रयाणां एकैकमेकैकस्य यथासंख्येन भवंति। अष्टर्चवचन
मेतेषां कृत्स्नावापसिध्यर्थं। तेनात्रावापस्यानिमित्ते सति यथार्थावापो न कर्तव्यः। [illegible]
आवापाधिकारेष्वन्नरावपेरन्निति वचनं बहुवचनविवक्षार्थं। तेनैकस्यावापनिमि
त्ते सति [illegible] द्वयोर्वा सर्वे होत्रका आवपेरन्निति साधितं भवति। उपरिष्टात्पारुच्छेपी ३५
नामित्ययं ऊर्ध्वमारंभणीयाभ्य इत्यस्यापवादः। पारुच्छेपिग्रहणं पूर्वोक्तानामावापा

नां प्रदर्शनार्थं। तेनायमर्थो विगर्तेर्भवति। त्वं चापवत्स्व हः सुत्वचो ऊर्ध्वमतिशंसनावाप
स्त्वन्यत्रा आरंभणीयाभ्य ऊर्ध्वमिति। तैरप्यनतिशस्तै ऐंद्राणि त्रैष्टुभान्यमरुछब्दान्या
वपेरन्। तैरष्टर्चैः शस्यमानैरपि स्तोमो यद्यनतिशस्तो भवेत्। तदैंद्राणि सूक्तानि मरुछ
ब्दवर्जितान्यावपेरन्। त्रिष्टुप्छंदस्कानि अस्माद्वचनाद्देतेत्र यो र्था अवगम्यंते। अष्ट
र्चानामप्यतिशंसनार्थत्वात्तैरनातिशस्तै ऐंद्राणामावापो नाष्टर्चावापनविनाऐंद्रैरे
वातिशंसनमिति। तेनाष्टर्चावापेकृते तैरप्यनतिशस्ते स्तोम ऐंद्रदेवत्यानि मरुछब्द
वर्जितानि त्रैष्टुभानि सूक्तान्यावपेरन्। अन्यत्रापर्युक्तान्यनुपर्युक्तानि च। अभूरेक
इत्येवंप्रकाराणि। त्रैष्टुभवचनं व्यूहलादिषु गायत्रं माध्यंदिनमित्येवमादौ वचने सत्य
पि त्रैष्टुभानामेवावापसिध्यर्थं। आवपेरन्निति पुनर्वचनं अहरहं तरेष्वप्यस्याविधेः

जागतं माध्यंदिन

स्०सू०उ१ प्राप्यार्था। तेनायमावापः सत्रेषु सर्वेष्वहःसु स्तोमातिशंसनार्थं भवति। नत्वेतान्यनोप्यातिशं
३६ सनं। एतान्यष्टर्चान्यनोप्यान्यैः अतिशंसनं नैव कर्तव्यं। एकाहाहीनेष्वपीत्यनेन सूत्रेणाष्टर्चा
36 तं नां सर्वार्थत्वं विधीयते। पूर्वसूत्रे यत्सर्वार्थत्ववचनं तत्सत्रेष्वेवाहरंतरेषु प्राप्त्यर्थतयाप्युपपद्य
त इत्यनेनैवाष्टर्चानामेकाहाहीनेषु प्राप्तिर्विधीयते एतदेवात्र विधित्सितं नान्यदिति। एकया
द्वाभ्यां वा प्रातःसवने। अतिशंसनमुक्तं तदेतावतीभिरित्युच्यते। एकया द्वाभ्यां वा ऋग्भ्यां प्रातः
सवने स्तोमातिशंस्तव्यः। अपरिमिताभिरुत्तरयोः सवनयोः। त्रिप्रभृतिभिर्ऋग्भिः उत्तरयोः
सवनयोरतिशंसनं कर्तव्यमिति। अस्मिन्सूत्रे उत्तरयोः सवनयोरिति वचनादेव पूर्वसूत्र
स्य प्रातःसवनविषयत्वे सिद्धे यदि यत्पूर्वसूत्रे प्रातःसवनग्रहणं करोति तज्ज्ञापयति। प्रा ३६
प्त्यो विधिद्वयं नावदस्ति अनवानं प्रातःसवने यजेदित्युक्त्वा अनंतरमेकांशेन स्तोममति

शंसेदित्युक्त्वा अपरिमिताभिरुत्तरयोः सवनयोरित्येको विधिः। अपरस्त्वेकाद्धेनद्वयोः सवनयोः

स्तोममतिशंसेदित्युक्त्वापरिमिताभिस्तृतीयसवन इति विधिद्वयस्य वचनस्येदं प्रयोजनं माध्यं

दिने सवने एकया द्वाभ्यां वा प्रातःसवने परिमिताभिर्वातिशंसनं कर्तव्यमिति। पंचमस्येममू षुवो

अतिथिमुषर्बुधमिति न वाज्यं। पार्ष्णिकस्य पंचमस्याह्न इममू षुव इति न वर्चमाज्यं भं आनो

यज्ञं दिविस्पृशमिति द्वे आ नो वायो महे तन इत्येका रथेन पृथुपाजसा बहवः स्तरं च सस द्

माउ वां दिविष्टयः पिबा सुतस्य रसिनो देवं देवं वो वसे देवं देवं स्तुहि उ गायिषे वच इति बार्हतं

प्रउगं। प्रथमस्तृचो द्विप्रतीकः। एवमस्य बार्हतत्वं द्वितीयं तृचमुक्त्वान्येषु षट्सु तृचेषु द्वि

तीयाः सतो बृहत्य उत्तमे तृतीया च ताः सप्त संति। उत्तमायास्त्रिर्वचनेन नव संति। नव सु बृ

हत्या अतिरिक्तानि षट्त्रिंशदक्षराणि तानि द्वितीये गायत्रे तृचे प्रक्षिप्य सर्वबार्हतं तृचं भ

सं० वृं० उ १ य वति। अतेरप्यमेवाभिप्राय। प्रगाथानेके द्वितीयोत्तमवर्जं। द्वितीयोत्तमोत्थैचौ वर्जयित्वान्ये
३७ द्वचा एव भवंतीत्येकेषां मतं। प्रगाथशब्देनात्र द्व्यचत्वमेवेष्यते। न प्रगाथधर्मः। आहावादि:
37 पुरोरुग्भ्य आक्रयीतेति। अत्र नियमात्। यस्यां च जन्यया विशेंद्र इत्सोमपा एक इति। मरुत्व
तीयस्य प्रतिपदनुचरौ। अविता सीत्याहो इपिबतुभ्यमिति मरुत्वतीयं। इदं त्रि सूक्तं। शाक्कर
वेत्यष्ठ महाना[illegible]म्न्यस्तोत्रियस्ता अध्यर्धकारं नव प्रकृत्या तिस्रो भवंति। ताः महा
नाम्नीरध्यर्धकारं शंसेत्रिभिरर्धर्चैरवसानं प्रणवं च कुर्यादित्यर्थः। ता अध्यर्धकारं शं
सेद्यथा प्रकृत्या नव सत्यस्ता एव तिस्रो भवंतीति सूत्रार्थः। ताभिः पुरीषपदान्युपसंतनुया
त्। ताभिर्महानाम्नीभिः पुरीषपदान्युपसंतनुयात्। महानाम्न्यो नाम नवर्चो नव च पदा ३७
नि पुरीषपदसंज्ञानि तासामृचामंत्येन प्रणवेन प्रथमं पुरीषपदं संधाय ततः सर्वाण्यपि य

थापठितानिशंसेदित्येप्रणवंकृत्वानुरूपमुपसंतनुयात्। तत्राद्येषुपंचसुशंसनविशेषउच्य
ते। पंचाक्षरशः पूर्वाणिपंचः। एवान्त्येवैवेत्यवसायपंचपदानिशंसेदुत्तराणियथापठित
मेव। अपवादाभावात्। अंत्येचप्रणवः कर्तव्यः। एवंसर्वाणिवायथानिशांतं। सर्वाणिवान
वपदानियथापठितमेवशंसेत्। नपंचाक्षरशः पंचपदानीति। पंचानांपंचाक्षरशः शंस
ननिवृत्तिपरमेतत्सूत्रं। नपरेषांशंसनंतद्विशेषंवाविदधाति। अन्यतएवतस्यार्धस्यसि
द्धेरिति। योनिस्थानेतुयथापठितंशंस्तव्याइत्यर्थः। अस्मिन्नपिपक्षेउत्तमेपदेप्रणवंकृत्वा
नेनोत्तरसंदध्यादस्यविधेःप्रणवनिषेधापरत्वादुत्तमेपिपदेप्रणवनिषेधशंकास्यात्।
तन्निवृत्त्यर्थमुत्तमेनसंतानइत्युक्तं। स्वादोरित्थाविषूवतउपनोहरिभिःसुतमिंद्रंविश्वा
अवीवृधन्निति त्रयस्तृचाअनुरूपः॥ अनुरूपत्वादेताअप्यध्यर्धकारमेवशंस्तव्याः॥

सू०वृ०उ१ प्रेदं ब्रं प्रेदं शो मस्वायसत्रामरवासइतिनिष्केवल्यं।इदमापिबेति सूक्तमेव।पांक्ते पूर्वे सूक्ते मरुत्वतीये
३८ ।पांक्ते निष्केवल्ये।द्वयोः शस्त्रयोर्मध्ये सूक्ते पांक्ते एव।आद्ये तु शाक्वराति जागते तयोरपि
पांक्तत्वविधानं पंक्तिशंसनप्राप्त्यर्थं।तेन तयोरपि प्रत्यृचमवसानद्वयं भवतीति गम्यते।
अवसानस्थानमुत्तरत्र वक्ष्यति।आद्ये तु त्रिष्टुब्वृत्तमे।तत्र तत्र द्वे पांक्ते ये उक्ते तयोर्या आ त
द्ये सूक्ते तयोरुत्तमे त्रिष्टुभौ भवतः।त्रिष्टुब्वृत्तमा यस्य तत् त्रिष्टुब्वृत्तमं।तद्द्वे इति त्रिष्टुब्वृत्त
मे श्यावाश्वस्य सुन्वतः श्यावाश्वस्यारभत इत्येते ऋचौ अक्षरतस्त्रिष्टुब्जगत्योः साधारणे इ
ति त्रिष्टुब्वचनं तथा श्रृणुत्वमेक इदनयोः पादौ।तयोरवसाने शंक्रतो समस्फुजिदिति म त
रुत्वतीये।अविता सील्यत्रावसाने शतक्रतो समत्सु जिदिति।शचीपते नेद्यतिति निष्केव ३८
ल्ये निष्केवल्ये।प्रेदमित्यत्रावसाने शचीपते नेद्यति।१२।इत्याश्व०सू०वृ०उत्तरष०प्रथमो०॥

हरिः ॐ ॥ षष्ठस्य प्रातः सवने प्रस्थित याज्यानां पुरस्तादन्याः कृत्वोभाभ्यामनवानं तोयजंति ॥ एतच्चोधिकृतस्तस्य षष्ठमहरिदानीमुच्यते ॥ तस्य षष्ठस्याह्नः प्रातः सवने याः प्रस्थित याज्या स्तासामयं विशेषः ॥ एकैकस्याः पुरस्तादेकैकामन्यामृचमुक्त्वा उभाभ्यामनुष्ठ्वसं तो यागं कुर्युः ॥ अन्या इति प्राकृतीभ्यां न्या वक्ष्यमाणा इत्यर्थः ॥ उभाभ्यामिति वचनं उभयोः संगतयो रेव याज्यात्वसिध्यर्थं नैकैकस्या अपीति ॥ अनवानं त इति वचनमुभयोः सर्वत्रानवानसि ध्यर्थं ॥ वृषन्निंद्र वृषपाणास इंदवः सुष्ठुमायात मद्रिभिर्वनोतिहि स्फन्वन्क्षयं परीयासो मो षुवो अस्मदभितानि पौंस्योष्टयो अग्ने श्रृणुहि त्वमीळितो ग्निं होतारं मन्ये दास्वंतं दध्यङ्ह मे जनुषं पूर्वो अंगिरा इति ॥ सप्तैता ऋचः प्रस्थित याज्याश्च सप्तैव साछावाकानां तेन तासां यथासंख्येन भवंति ॥ एवमेव माध्यंदिने ध्यर्धां तु तत्रानवानं ॥ तत्र माध्यंदिने सवने प्रस्थित

स्०वृ०३२ याज्यानामध्यर्धमेवानवानं ब्रूयात्। पूर्वामनुष्टुभं संतुत्का उत्तरां संधाय तस्या अर्धर्चे वसाय य
३९ ष्टव्यमित्यर्थः। तत्र ग्रहणं तत्रैव माध्यंदिने अध्यर्धानवानं भवति। उत्तरसूत्रविहितानामृतुया
ज्यानां पूर्वोक्त एवोभाभ्यामनवानंत इत्ययमेव विधिर्भवतीत्येवमर्थः। पिबा सोममभिंद्र सुवान
मद्रिभिरिंद्राय हि द्यौरसुरो अनम्नतेति षट्। एताः सप्त माध्यंदिने आगंतवः प्रस्थितयाज्याः
। उपरिष्टात्स्युश्च ऋतुयाजानां। अन्याः कृत्वोभाभ्यामनवानं तायजंतिप्रेष्यंतिचेति शेषः।
प्रेषमृते सोयजमृचंचानवानमुत्का। ऋगंते रसोयजेतिप्रेष्येत्। ऋतुप्रैषान्होतर्यजेदि
त्यादिशब्दरहितानुत्का। तेर्ऋचः संधाय ऋगंते होतर्यजेत्यादिशब्दान्संधायते मैत्रावरुणः
प्रेष्यति। एवमेव यजंति। एवं क्रमात्तयोरेव होतायक्ष्यद्सोयजयोस्थाने आगूर्वषट्कारौ ३९
कृत्वा यजंतीत्यर्थः। तुभ्यं हिन्वानो वसिष्ट गा अप इति द्वादश। एता ऋतुयाज्यानामृचः॥

अयंजायतमनुषोधरीमणीत्याज्यं।एतत्सूक्तमस्याह्न आज्यंभवति।आज्यकार्यस्यप्रकृ
तौसूक्तसाध्यत्वात्तादग्रहणेपिइदंसूक्तमेवभवति।पादग्रहणंब्राह्मणानुवादः।एकेनद्वा
भ्यांचविग्रहः।आज्याद्यायाः प्रथमेर्धर्चेविग्रहः प्रकृतिप्राप्तः।अत्रप्रथमार्धर्चस्यत्रिपा
दत्वात्कथंविग्रहइतिसंशयनिवृत्त्यर्थमिदमुच्यते।पूर्वमेकःपादःपश्चाद्द्वौपादौयथाभ
वतितथाविग्रहःकर्तव्यइत्यर्थः।त्रिभिरवसानंचतुर्भिःप्रणवोयत्रार्धर्चशःपारुछेप्यः
।सप्तपदानांपारुछेपीनामर्धर्चबहुत्वादवसकृदवसानेप्राप्तेइदमुच्यते।त्रिभिरवसा
नंचतुर्भिःप्रणवइति।अतएवायंविधिःपारुछेपीनांसप्तपदानामेवभवतीत्युक्तं।अतः
असप्तपदानांत्रिभिरवसानंचतुर्भिःप्रणवोनसंभवतीति।पछःशस्यानामुपरिष्टाद्धी
यमानत्वाद्यत्रपछःपारुछेप्यइत्युक्तेप्यर्धर्चस्यविषयएवायंविधिर्भवति।तत्रकिमर्धर्च

सं०वृ०३२ शब्दउच्यते। तस्येदंप्रयोजनं। यदाशुनरयारुचेतिपारुच्छेप्योग्रावस्तोत्रंप्राप्नुवंतितदाप्यवसा
४० नप्रणवयोरयमेवविधिर्भवतीत्येवमर्थमर्धर्चशइतिवचनं। स्तीर्णंबर्हिरितित्वचोसुषु
40 मायातमद्रिभिर्युवांस्तोमेभिर्देवयंतोअश्विनावमेहइंद्रवृषन्निंद्रास्कश्रौषव्कोऋणोअग्ने
श्रुणुहित्वमीळितोयेदेवासोदिव्येकादशस्थयमददादभसमप्याच्युतमितिप्रउगंद्वेचेका
चपंचमएकपातिन्यउपोत्तमे। त्वचइत्यभयत्रशेषः। उत्तमेन्तृचमभ्यासविशेषयां। अ
न्यपदार्थत्वाद्बहुव्रीहेः पुंल्लिंगंभवति। उत्तमेत्वचेइयमददादित्येतस्मिंस्त्र्यृचमंततो
यान्यष्टावक्षराणितानिद्विरुक्त्वाप्रणवःकर्तव्यइत्यर्थः। नवा। वाशब्दःपक्षंव्यावर्तयति।
नैवाभ्यासःकर्तव्यइति। श्रुतावतिछंदःशब्दस्यविधेयत्वंमन्यमानेनाभ्यासउक्तः। तस्य ४०
विधेयत्वंनसंभवति। प्राप्तार्थत्वात्सारुच्छेपीषुत्वचेषुअंतोवाददतेवात्रावगतानत्येकः

शब्दः प्राप्तमनुवदत्यप्राप्तं च विदधाति। तेनात्र प्रउगेति छंदः शब्दः पारुछेप शब्दस्य प्रा
प्तप्राग्रामशब्दवत्। प्रयुक्ताविति सिद्धौ। स पूर्व्यो महानां त्रयइंद्रस्य सोमा इति मरुत्वतीय
स्य प्रतिपदनुचरौ यं त्वं रथमिंद्र सयो नृषेंद्र मरुत्व इतिति स्त्र इति मरुत्वतीयं। अंत्येन त्व
चेन सह त्रीणि सूक्तान्यत्र। एकेनाग्रे वसाय द्वाभ्यां प्रणुयात् द्वाभ्यामवसाय द्वाभ्यां प्रणु
याद्यत्र पछः पारुछेप्यः। यत्र विषये त्रिष्टुब्जगत्यादीनां चतुष्पदानां पछः शंसनं वि
हितं। तत्र पारुछेपीनामेवं भवति। एकेन पादेनाग्रे वसाय ततो
द्वाभ्यां प्रणुयात्। पुनर्द्वाभ्यामवसाय द्वाभ्यामेव प्रणुयात्। अत्र अग्रग्रहणं पारुछेपीनां स
प्तपदामेवायं विधिः स्यादित्येवमर्थं। एतदुक्तं भवति। यास्वृक्षु एकेनाग्रे वसाय ततो द्वा
भ्यां प्रणुयात्पुनश्च द्वाभ्यामवसाय द्वाभ्यामेव प्रणवः संभवति ता रूपारुछेपीष्वयं विधि

स०व्र०उ२ र्भवति। यत्र पच्छः पारुच्छेप्य इति सार्वत्रिको यं विधिरिति दर्शयति। तेनइंद्रायाहि द्यौरसुर इत्ये
४१ वमादिष्वपि भवति। स नो नव्येभिरित्येवमादिष्वसमपदत्वान्न भवति। रेवतं चेत्पृष्ठं रे
41 वतीर्नः सधमादे रेवाँ इद्रेवत स्तोतेति स्तोत्रियानुरूपौ। निष्केवल्यस्य स्तोत्रे यदि रैवतं
सामस्यादित्यर्थः। छंदोगप्रत्ययत्वादनित्यवचनं। एंद्र याह्युप नः प्रधान्वस्याभ्र रेक इ
ति निष्केवल्यं। इदमपि त्रिसूक्तं। अभि त्यं देवं सवितारमोण्योरित्येका तत्सवितुर्वरेण्य
मिति द्वे दोषो आगाद्बृहद्गाय द्युमद्गेत्याथर्वण। स्तुहि देवं सवितारं। तमु ष्टुत्यं तः सिंधुं सू
नुं सत्यस्य युवानं। अद्रोघवाचं सुशेवं। स धानो देवः सविता साविषद्वसुपतिः। उभे सुक्षि
ती सुधातुरिति वैश्वदेवस्य प्रतिपदनुचरौ। एकाग्रहणामृचं पादग्रहणमित्येवमादीना
मेतच्छास्त्रोक्तानां परिभाषाणां खिलेष्वप्रवृत्तेः। तत्सवितुर्वरेण्यमित्यनयोरभिप्लवप्रा

मयोरथ्यसतिपुनर्वचनेचतस्रएवर्चः।प्रतिपदनुचरौस्यातां।तत्राभित्यमित्येषाऋक्
त्रिरभ्यस्ताप्रतिपत्स्यात्।अन्यथावास्यात्।अतस्तन्निवृत्त्यर्थंपुनर्वचनं।इदंचैकाग्रह
णस्यपुनर्वचनस्यचप्रयोजनं।एतास्तिस्रएवर्चःप्रतिपत्स्यात्।उपरितनाश्चतिस्रएवा
नुचरःस्यादित्येवमर्थं।इतरथाविश्वोदेवस्यनेतुरित्यस्याअनैकाहिकत्वात्उद्धारोनस्या
दिति।उध्यस्वचोत्तमंसूक्तंत्रीणि।अभिप्लवातिदेशाञ्ज्ञातानांसूक्तानांयउत्तमसुषासा
नक्तेत्येतत्सूक्तंउध्यस्वत्यतत्स्थानेत्रीणिसूक्तानिवक्ष्यमाणानिभवंतीत्यर्थः।कानितानिके
नवाक्रमेणाशंस्तव्यानीत्येतत्संशयनिवृत्त्यर्थमाह।इदमित्थारौद्रमिति।एतदेकंसूक्तंशं
स्तव्यमित्यर्थः।प्रागुत्तमायायेयज्ञेनेत्यावपते।इदमित्थेत्येतस्यसूक्तस्यउपोत्तमायाः
प्राक्येयज्ञेनेत्येतत्।द्वितीयंसूक्तमावपेत्।तस्यार्धर्चशःप्रागुत्तमायाऊर्ध्वंचतुर्थ्याः।

सू०वृ०उ२ तस्यपेथत्तेनेत्यस्य चतुर्थ्यांऽऊर्ध्वमुत्तमायाः शाकल्याः षडृचः ताऽअर्धर्चशः शंस्तव्याः विरूपा
४२ सइत्येवमाद्याः प्राक्छंदांसीत्यनेनैव प्राप्तस्य पुनर्वचनं विछंदसामुद्धारसूक्तं न्यायशंस
नयोराश्विन एव प्रवृत्तिर्नान्यत्रेति प्रकटनार्थं। शिष्टे शस्त्वा स्वस्तिनो मिमीतामश्विनाभ
गइति तृचः। शिष्टे इतीदमित्यस्योपोत्तमयोत्तमे सग्रहणान इत्यादिके अयं तृचस्तृतीयं
सूक्तं भवति। शिष्टे शस्त्वा एतं तृचं शंसेत्। उद्धृत्येति वचनमुपासानक्तेत्यस्य ऐकाहिक
स्यापि समुच्चयनिवृत्यर्थं। त्रीणीत्यर्थस्य सिद्धस्यास्य पुनर्वचनमुत्तमं सूक्तमुद्धृत्यत
त्स्थाने त्रीणि सूक्तानि भवंतीत्येवमर्थं। इतरथा उत्तमं सूक्तमुद्धृत्य इदमित्येतस्य प्रागुपो
त्तमायाः शंसेदित्येवमाद्याः श्रोतयः स्युरिति। आवपतिग्रहणामन्यत्रापि। अनयोः सू ४२
क्तयोः प्राप्तो प्रागुपोत्तमाया एव एतत्सूक्तमावप्तव्यमित्येवमर्थं। इति वैश्वदेवं॥१॥ वैश्व

देवाधिकारेपुनर्वैश्वदेवग्रहणंविस्पष्टार्थं॥१॥ होत्रकाणांद्विपदास्विहोक्थ्येषुस्तुवते
।इहपार्ष्णिकेषष्ठेहनितृतीयसवनेहोत्रकाणांउक्थ्यसंज्ञकेषुशस्त्रेषुद्विपदास्वृक्षुछं
न्दोगास्तुवते।होत्रकाणामित्ययमधिकारार्थः।तस्योपयोगमुत्तरत्रवक्ष्यामः।द्विपदा
ग्रहणंलक्षणतोद्विपदात्वेसिद्धेपिसमाम्नायप्रसिद्धेर्बलीयस्त्वार्थं।इहेतिविस्पष्टार्थं।
उक्थानीतितातृयसवनिकानांहोत्रकशस्त्राणांसंज्ञा।शंस्यविशेषविधानार्थः।परक
ल्पकस्तवनोपदेशः।अतऊर्ध्वमनुरूपेभ्योविकृतानिशिल्पानिशंसेयुः।तेहोत्रकाअनु
रूपेभ्यऊर्ध्ववालखिल्यादीनिशिल्पसंज्ञकानिविहरणन्यूंखनिनर्दादिभिर्विकृतानि
शंसेयुः।शंसेयुरितिवचनंहोत्रकाएवानुरूपेभ्यऊर्ध्वंशिल्पानिशंसेयुः।होतात्वन्यत्रे
तिज्ञापनार्थं।तेननाभानेदिष्ठस्यापिशिल्पत्वंसाधितंभवति।ऊर्ध्वमनुरूपेभ्यइतिशिल्पा

स०वृ०उ२ गांस्थानविधानं।विकृतानीतिवचनंविकृतान्यविकृतानि चेतिशिल्पानां द्वैविध्यज्ञापनार्थं।ते
४२ नएतेषु त्रिषु शास्त्रेषु विकृतानि शिल्पानीति विद्यात्।यानिपुनः प्रकृत्या शिल्पानि शंसेयुरि
त्यारभ्योक्तानि तान्यविकृतानीति विद्यात्।द्वैविध्यप्रदर्शनस्य प्रयोजनं शिल्पान्यविकृतानि
शंसेयुरित्यत्राविकृतानामेव प्रापणार्थं।मैत्रावरुणस्याग्ने त्वं नो अंतम अग्ने भवषुसुमिधा
समिद्ध इति स्तोत्रियानुरूपौ।अथ वालखिल्याविहरेत्।अथास्मिन्नवसरे वालखिल्याऋ
चो विहरेत्।ताश्चाभिप्रवः सुराधसमित्येवमाद्याः।तदुक्तं षोडशिना।तद्विहरणं षोडशिना
व्याख्यातं पादान्व्यवधायेत्येवमादिना।तस्यैव विशेषं वक्तुमाह।सूक्तानां प्रथमद्वितीयप
च्छः।यास्ता वालखिल्यसंज्ञका ऋचस्ता अष्टौ सूक्तानि तेषां ये प्रथमद्वितीये सूक्ते ते परस्परं ४२
पच्छो विहरेदित्यर्थः।तृतीयचतुर्थे अर्धर्चशः ऋक्शः पंचमषष्ठे।व्यतिमर्शं वा विहरेत्॥

अयमन्योपि विहारप्रकार उच्यते। व्यतिमर्शस्य व्यतिमर्शस्य वा विहरणं कर्तव्यं। व्युत्क्रमेणेत्यर्थः।
तमेव विवृणोति। पूर्वस्य प्रथमामुत्तरस्य द्वितीयया। पूर्वस्य सूक्तस्य प्रथमामृचमुत्तरस्य
सूक्तस्य द्वितीयया ऋचा विहरेत्। उत्तरस्य प्रथमां पूर्वस्य द्वितीयया। उत्तरस्य प्रथमामृचं पू
र्वस्य द्वितीयया ऋचा विहरेत्। एवं प्रथमद्वितीययोः सूक्तयोर्द्वयोर्द्वयोरृचोर्विहार उक्तः। अ
थेदानीं तयोरेव सूक्तयोरन्यासामृचामेवंप्रकारस्य व्यतिमर्शविहारस्य प्रापणार्थमाह। त
योर्नानर्चा ऋचामिति शेषः। तयोः सूक्तयोः शिष्टानामृचां मध्ये एकैकामृचं व्युत्क्रमरूपम
नेन प्रकारेण व्युत्क्रमरूपात्पृथक्पृथग्विहरेदित्यर्थः। प्रथमद्वितीयाभ्यां पादाभ्यामवस्येत्प्र
थमद्वितीयाभ्यां प्रणुयात्। तृतीयोत्तमाभ्यामवस्येत्। तृतीयोत्तमाभ्यां प्रणुयात्। ऋग्व्यति
मर्श उक्तः। पादव्यतिमर्शश्च कर्तव्यः। स एतैश्चतुर्भिः सूत्रैरुच्यते। प्रथमद्वितीयाभ्यामित्येते

सू०वृ०उ२ शब्दाः ऋग्द्वयापेक्षया कल्पनीयाः प्रथमद्वितीययोः सूक्तयोर्व्यतिमर्शो विहार उक्तः । अथे
४४ दानीमुत्तरेषामाह । एवं व्यतिमर्शमर्धर्चश उत्तरे । एवं व्यतिमर्शमृक्श उत्तरे । व्यतिमर्शा
धिकारे पुनर्व्यतिमर्शग्रहणं प्रथमद्वितीयाभ्यां पादाभ्यामवस्येत् । प्रथमद्वितीयाभ्यां प्रणु
यादित्येवमादिनिवृत्त्यर्थं । अतस्तृतीयचतुर्थयोः सूक्तयोः प्रथमेनार्धर्चेनावस्येत् । द्वि
तीयेन प्रणुयात् । पुनश्च प्रथमेनावसाय द्वितीयेन प्रणुयादिति । इदं च ऋग्विषयमे
व । पंचमषष्ठयोः प्रथमां शस्त्वा द्वितीयां शंसेत् । पुनश्चैवं । विपरिहरे द्वेवोत्तमे सूक्ते गाय
त्रे सर्वत्र । ये वालखिल्यानां सप्तमाष्टके सूक्ते तयोर्विपर्यासं कृत्वा शंसेत् । अष्टमं पूर्वं श
स्त्वा पश्चात्सप्तममित्यर्थः । एवकारो विपरिहार एवात्र तयोः कर्तव्यो न विहार प्रतिगर इत्ये ४४
वमर्थः । उत्तमवचनमष्टावेव सूक्तानि वालखिल्यशब्दवाच्यानि इत्येवमर्थं । गायवचन

मुक्तमायाः पंक्तेः पङ्क्तिशंसननिवृत्त्यर्थः। अतोसावर्धर्चशः शंस्तव्याः। सर्वत्र वचनमस्यवि
धेः पूर्वस्मिन्नपि विहारे प्रापणार्थं। इमानि वां भागधेयानीति प्रागुक्तमाया आहूय हरोहणं
रोहेत्। वालखिल्याभ्य ऊर्ध्वमिमानि वां भागधेयानीत्येतत्सौपर्णसूक्तं शंसेत्। तस्य प्रागु
क्तमाया ऋच आहूय हरोहणं रोहेत्। आहावोयमपूर्वो विधीयते। हरोहणमिति वक्ष्यमा
णाविषयस्य शंसनस्य संज्ञा रोहेदिति शंसेदित्यर्थः। तच्छंसनमारोहणमवरोहणास्वरूपं
इति कृत्वा रोहेदिति शंसेदित्यर्थः। तदिदानीमुच्यते। हंसः शुचिषदिति पच्छोर्धर्चशस्त्रि
पद्याः चतुर्थमनवानमुक्त्वा प्रणुत्यावस्येत्। पुनस्त्रिपद्यार्धर्चशः पच्छ एव सप्तमं। एतामृ
चमित्थं शंसेत्। प्रथमं पच्छः द्वितीयमर्धर्चशः। तृतीयं त्रिभिः पादैरवसाययदुक्तमेन पादे
वे नप्रणुत्य चतुर्थमनवानमुक्त्वा प्रणवमावस्येत्। एतदारोहणं। अथावरोहणं। पुनस्त्रि

स्त०वृ०उ०२ पद्येत्येवमादिनोक्तं पंचमां। अर्धर्चशः षष्ठं। पुनः पच्छः सप्तमं। एतद्दूरोहणं भवति। सप्तम
४५ वचननियमेन ऋक्सप्तकत्वेऽभ्यस्ताद्दूरोहणामिति ज्ञापनार्थः। एवकारः पौनर्वचनिकः। एत
45 द्दूरोहणं। दूरोहणामिति प्रकृते पुनर्दूरोहणावचनं द्विविधं दूरोहणमस्तीति प्रदर्शनार्थं। तेन
स्वर्गकामस्य चतुरभ्यस्तैव दूरोहणं भवति। तथा च श्रुतिः। अथ य एककामास्युरित्यादि॥
आ वां राजानावितिनित्यमैकाहिकं। दूरोहणानंतरं अस्य सूक्तस्योत्तमां शस्त्वा आ वां राजा
नाविति शंसेत्। अन्यदैकाहिकमर्थलुप्तं भवति। ऐकाहिकस्यानिवचनात्। अनैकाहिक
मनित्यमिति दर्शयति। तथा च श्रुतिः। तं यदि दर्प एवं विंदेदिति। इतिनु होंडिने। यावेताउ
क्तौ विहारौ तौ हौंडिन संज्ञकावित्यर्थः। अथ महावाल्भित्। अथानंतरं महावाल्भिन्ना
मैकोविहारो वक्ष्यत इत्यर्थः। एतान्येव षट् सूक्तानि व्यतिमर्शं पच्छो विहरेद्व्यतिमर्शमर्धर्चे ४५

शः। व्यतिमर्शमृक्शः। वालखिल्यानामादितः षट्सूक्तानि त्रिप्रकारं विहारेदित्यर्थः। एव
कारः पौनर्वचनिकः। प्रगाथांतेषु चानुपसंतानमृगावानमेकपदाः शंसेत्। वालखिल्यानां
षट्सूक्तानि अष्टाविंशतिः प्रगाथाः। तेषामंतेष्वनुपसंतानमृगावानमुक्तं वक्ष्यमाणा
एकपदाः शंसेत्। अनुपसंतानंच ऋगावानं च अनुपसंतानं। ऋगावानं। विशृन्निरत्र छंद
सी। अनुपसंतानमृगावानशब्दयोर्द्वंद्वैकवद्भावः। तौ चैकपदानां शंसनक्रियाया विशे
षणत्वेन संबध्येते। तेनानुपसंतानविशिष्टं ऋगावानविशिष्टं च प्रगाथप्रगाथे समाप्ते
ता एकपदानामेकैकां शंसेदित्यर्थः। अनुपसंतानत्वेकपदानामृगावानवचनादेवोत्तरैः प्र
गाथैर्नविधानत्वाभवति। अतः पूर्वैः प्रगाथांतैरेव संबध्यते। तस्य चैकपदानां शंसनवि
शेषणत्वे नोपादानान्नायं संतानप्रतिषेधपरः। नाप्यवसानविधिपरश्च। अतो यः प्रगा

सू०वृ०उ२
४६ 46

थांते प्रणवः सत्रिमात्र एव भवति। ऋगं तत्वात्प्रणवस्य प्राप्तिरस्ति। अवसानविध्यभावच्चतु
र्मात्रिता नास्तीति सिद्धं। इंद्रो विश्वस्य गोपतिरिंद्रो विश्वस्य भूपतिरिंद्रो विश्वचेततींद्रो विश्व
स्य राजतीति च तत्स्त्रः। एताश्च तस्मादृशमेहनि शंसतादुत्सन्ना अप्येता आचार्येणात्रैव पठि
ता। एकां महाव्रतादाहरेत्। इंद्रो विश्वं विराजतीत्येतामित्यर्थः। त्रयो विंशतिमष्टाक्षरान्या
दान्महानाम्नीभ्यः सपुरीषाभ्यः। महानाम्नीषु सपुरीषपदास्वपि कर्षयोष्टाक्षरास्त्रयोविं
शतिरेकपदाः संति तान्सर्वानाहरेत्। तैः सहाष्टविंशतिरेकपदा भवंति। षोडशिनोक्तः प्र
तिगरोन्यत्रैकपदाभ्यः। विहृतां तद्वर्तिनामेकपदानां विहृतप्रतिगरप्रतिषेधार्थमिदं सूत्रं।
अवकृष्येकपदा अविहरंश्चतुर्थं शंसेत्। एकपदाश्च वर्जयित्वा चतुर्थं शंसेत्। अविहरन्नि ४६
ति विस्पष्टार्थं। समानमन्यत्। स्तोत्रियानुरूपाविमानि वामित्येतत्समानं। पूर्वाभ्यां विहाराभ्या

मित्यर्थः ॥ २१ ॥ ब्राह्मणाच्छंसिन इमानुकं भुवना सीषधामेति पंचायावाजं देवहितं सनेमेति
स्तोत्रियानुरूपौ । इमानुकमिति पंचद्विपदाः । अयावाजमित्येकाद्विपदा । एतौ ब्राह्मणाच्छंसि
नस्तोत्रियानुरूपौ । अपप्राच इंद्रेतिसुकीर्तिः । इदं सूक्तं सुकीर्तिर्नामवेदितव्यं । अस्याः संज्ञा
याः प्रवृत्तिनिमित्तं । नतच्छब्दवत्वमित्येतत्प्रतिपादनार्थं सूक्तादिग्रहणं । तस्यार्धर्चशश्च
तुर्थः । सुवंस्करामममित्यस्यां अनुष्टुप्त्वादेवार्धर्चशंसने प्राप्ते पुनरर्धर्चशंसनवचनं प्राप्ता
नुवादः पुनः प्रदर्शनार्थः । एवं प्रकारायां अन्यशस्यमध्यगतायां अर्धर्चशः शंसनं स्वच्छंदो
न्यायेन शंसनं भवतीति । अथ वृषाकपिं शंसेद्यथाहोताज्याद्यां चतुर्थी विहिसोतोरित्येत
त्सूक्तं वृषाकप्यार्षत्वाद्वृषाकपिरित्युच्यते । अस्य शंसनोपायः पार्ष्ठिके चतुर्थे हनि आज्या
द्यां यथा होता शंसेत् । तथा वृषाकपिं ब्राह्मणाच्छंसी शंसेत् तस्यां ये धर्मास्त इह कर्तव्या इत्यर्थः ।

स्०वृ०उ२ अर्धर्चशंसनं विग्राहं त्रिरभ्यासो न्यूंखो निनर्दः प्रतिगरश्चेति तस्यां धर्माः। तत्र विग्रहः सर्वाज्या
८७ द्यायाः सामान्यधर्मः। अर्धर्चशंसनं चास्या एव धर्मस्त्रिरभ्यासश्च तादृश एव न्यूंखनिनर्दा
वपि। न केवलं तस्या एव। उत्तरासामपि साधारणत्वात्तयोरतिदेशो तु येन यत्रातिदेशः कृ
तस्तस्य वैशेषिकधर्मास्त एवातिदिश्येरन्। न तत्र प्रयुज्यमानाः सामान्यधर्मा अपि एवं सि
द्धे यद्धोतृग्रहणं करोति तस्येदं प्रयोजनं चतुर्थेहन्याज्याद्यायां ये धर्माः प्रयुज्यंते साधार
णा वैशेषिकाश्च ते सर्वेत्रातिदिश्येरन्निति। एतच्च होतृशब्दस्य कर्तृविशेषवाचित्वात्कर्तु
श्च प्रयोगानुबंधभूतत्वाल्लभ्यते। एवं त्रिरभ्यासोपि प्राप्तोपि तत्कुतः। उक्तं होतृग्रहणं प्र
योगप्रत्यभिज्ञानार्थमिति। तेनाज्याद्याया आद्योयः प्रयोगः स्तावन्मात्र एवातिदेशो सिद्धे ८७
पुनरभ्यासस्य प्रापकं नास्तीति सिद्धं। पंक्तिशंसं त्विह। पंक्तित्वादेव पंक्तिशंसने प्राप्ते पुन

W7

म र्वचनमाज्याद्यायां प्रयुज्यमानत्वादर्धर्चशंसनेऽपि प्राप्नोतीति तन्निवृत्त्यर्थः। तुशब्दो विशेष
द्योतकः। अयमत्र विशेषः पंक्तिशंसनमिति। इहेति प्रसिद्धोऽयमर्थ इति दर्शयति। यस्माद
यं वृषाकपिः पंक्तिछंदास्तस्मादिह पंक्तिशंसनमेवेति। अनेनैतत्साधितं भवति। अतिदे
शेनान्यछंदःशंसनमन्यछंदसो न प्राप्यत इति। अप्रणवांतश्च प्रतिगरो द्वितीये पांक्ता
वसाने। आज्याद्यायामतिदेशे सति न्यूंखं निनर्दविकृतप्रतिगरोऽपि प्राप्त एव। तस्यार्ध
र्चशः शस्यत्वात्। प्रतिगरस्य च प्रणवांतत्वेन पठितत्वात्तत्र प्रणव एव प्राप्तो संपद्यते। इह
पुनः पंक्तिशंसनत्वान्न्यूंखादिविकृतः प्रतिगरोऽवसाने संपद्यत इत्यप्रणवांत इत्युच्यते।
अप्रणवांतश्च प्रतिगर इत्येतावतैवासिद्धे द्वितीये पांक्तावसान इति वचनं प्राप्तोऽयमर्थ इति
दर्शयति। यस्मादस्मिन्नवसाने प्रणवो नास्ति तस्मादत्रास्मिन्नवसाने प्रणवांत एव प्रतिग

सू०ह०उ २ रइति प्राप्तिविवेकस्येदं प्रयोजनं। योयंन्मं स्वादिविकृतः प्रतिगरः सप्राकृत एव प्रतिपत्तव्य
४८ मिति। तेन एतत्साधितं भवति। प्राकृतकार्यकरत्वात्प्राकृतस्य पुनः प्रयोगो न कर्तव्य इति।
48 तस्मादूर्ध्वं कुंतापं। तस्माद्वृषाकपेरूर्ध्वं कुंतापं शंसेत्। तस्मादूर्ध्वमिति वचनान्माध्यंदिने
वृषाकपौ। प्रविष्टे तदनंतरं कुंतापः स्यात्। असति प्रवेशे तृतीयसवनेपि तस्य प्रवेशो नास्ती
ति गम्यते। तस्यादितश्चतुर्दश विग्राहं निनर्दं शंसेत्। तस्य कुंतापस्यादितश्चतुर्दश ऋ
चो विगृह्य निनर्द्य निनर्द्य शंसेत्। विग्राहाः प्रागुक्ता एव। निनर्दोयं पूर्व इति तस्य स्वरूप
निदर्शनमाह। तृतीयेषु पादेषूदात्तमनुदात्तपरं यत्प्रथमं तं निनर्देत्। तृतीये पादे द्वा
दितो यदक्षरं तदनुदात्तं कृत्वा ब्रूयात्। तस्मात्परं यद्द्वितीयं तदुदात्तीकुर्यात्। एतदुक्तं ४८
भवति। तृतीयेषु पादेषु प्रथममादित इत्यर्थः। आदितो ये द्वे अक्षरे तयोः पूर्वमनुदात्तं

यथाभवेत्तस्मात्स्वरंद्वितीयंउदात्तंयथाभवेत्तथानिनर्दैत्।नितरांब्रूयादित्यर्थः।तदेवमुच्चा
रणंनिनर्दशब्देनोच्यतइत्यर्थः।तदपिनिदर्शनायोदाहरिष्यामः।इदंजनाउपश्रुतान
राशंसस्तविष्यते।षष्टिंसहस्रानवतिंचकौरमआरुशमेषुदद्महे।३।षकारोनुदात्तःष्टि
कारउदात्तः।अन्यदेकश्रुतिः।ओंथामोदैवोमित्यस्यप्रतिगरः।प्रतिगरेस्वादितोयदक्ष
रद्वयंतयोःपूर्वमनुदात्तंउत्तरमुदात्तंकृत्वाब्रूयात्।एतस्मात्पाठादेवलभ्यते।अयंप्रति
गरःप्रणवेअवसानेप्राकृतएवास्यप्रतिगरइति।निनर्दसहितस्यार्धर्चस्येत्यर्थः।च
तुर्दश्यामेकेनद्वाभ्यांचविग्रहः।उपप्रोनरएमसीत्येषाचतुर्दशी।सापंक्तिस्तस्याःप्रथ
मोर्धर्चस्त्रिपात्तत्रविग्राहेक्रियमाणेएवंभवति।पूर्वमेकेनविगृह्यततोद्वाभ्यामवस्ये
दित्यर्थः।चतुर्दश्यामृचोयःशेषःसोर्धर्चशःशंस्तव्यः।पंक्तिशंसनेप्राप्तेइदमुच्यते॥

सू०दृ०उ२ एता अश्वा आप्लवंत इति सप्ततिं पदानि। सप्ततिवचनं शाखांतरे कचित्सहस्रसप्ततिपदानि संतती
४६ वा तिप्रदर्शनार्थं। अष्टादश वा। एतावंति पदानि शंसेत्। तान्येतानीत्याह। नव वा यानि। आदितो न
५९ व पदानि। अलाबुकं निखातकमिति सप्त यदीहन्नकथं हनस्यर्थाकारं पुनः पुनरिति चैते।
एते चर्द्दे। एतान्यष्टादश पदानि संपाद्य शंसेत्। सप्ततिं वेति विकल्पः। वितनोकिर यो ह्यावि
तिषळनुष्टुभः। षङ्ग्रहणं [illegible] शाखांतरे भूयांसि संतीति प्रदर्शनार्थं। अनुष्टुब्ग्रहणं विस्प
ष्टार्थं। दुंदुभिमाहननाभ्यां जरितरोथामो [illegible] दैव रजनि ग्रंथेर्थानां जरितरोथामो दै
वो पानहि पादं जरितरोथामो दैवोत्तरां जनीमां जन्यां जरितरोथामो दैवोत्तरां जनीव र्मन्या
त जरितरोथामो दैवेति प्रतिगराः अवसानेषु। प्रणवेष्वप्या कृताएवा इहेत्यप्राग पाद्युद्गि ४६
ति चतस्रो द्विधाकारं प्रणवेनासंतन्वन्। चतस्र इति वचनं पादशः पठिता अपि नाष्टावे

ना कपदाः। चतस्र एवैताद्विपदाः द्वेधाकारं पठिता अपीति प्रदर्शयेर्थं। ताः पच्छः शंस्तव्याः प्रणवे
नासंतन्वन्। अत्र आर्थिकत्वादवसानस्य त्रिमात्राएव प्रणवाभवेयुः। असंतन्वन्निति सं
तानप्रतिषेधादेवं प्रणवेनेति वचनमासां ये चत्वारः प्रणवास्तैः सर्वैः संतानो न कर्तव्य
इत्येवमर्थं। तेन एतत्साधितं भवति। प्रवह्लिका नामं त्साया याः यः प्रणवस्तेनाजितासेन्या
नामाद्यथासंतानो भवतीति। अलाबूनि जरितरोथामोदैवो३म्। पृषातकानि जरितरो
थामोदैवो३म्। अश्वत्थपलाशं जरितरोथामोदैवो३म्। पिपीलिकावटो जरितरोथामो
दैवो३म्। अवसानेषु प्राकृता एव। इति प्रतिगराः प्रणवेषु भुगित्यभिगत इति त्रीणि प
दानि सर्वाणि यथानिशांतं। सर्वाणि यथानिशांतमिति वचनादत्रोत्तमेपि पदे प्रण
यथानि। वो न कर्तव्य इति गम्यते। तेनात्र त्रीणि पदानि शांतं शंस्तव्यानि। श्वा जरितरोथामोदैवप

थामोदैवहोताविष्टीमेनजरितरो २

स०ए०उ२ पर्थशब्दोजरितरोथामोदैव गोशाफोजारितरोथामोदैवेति प्रतिगराः। वीमदेवा अर्कंसतेत
५० त्यनुष्टुप्। अनुष्टुब्ग्रहणं विस्पष्टार्थं। पत्नीयायस्यतेजरितरोथामोदैवेति प्रतिगरो।
द्वितीयः प्रतिगरः। प्रणवेष्वप्रणवांतएव। पाठसामर्थ्यात्। आदित्याहजरितरंगिरोभ्यो
दक्षिणामनयन्निति सप्तदश पदानि। ॐहजरितरोथामोदैव। तथाहजरितरोथामोदै
वेति प्रतिगरो व्यत्यासं मध्ये। मध्यशब्देन मध्यवर्तीनि पदानि अभिधीयते। व्यत्यासमि
तितेषु पंचदशसु पदेषु एतौ प्रतिगरौ क्रमेण व्यत्यस्य प्रयोक्तव्याविर्त्यर्थः। एतौ मध्यशब्द
वचनादाद्ये पदे प्राकृत एव प्रतिगरो भवेत्। उत्तमे तु प्रणवो विहित एव प्रतिगरत्वेनाप्र
प्यावउत्तमः। उत्तमे पदे प्रणव एवात्र प्रतिगरो भवेदित्यर्थः। त्वमिंद्रशर्मरिणातिभूतेछ ५०
दः। भूतेछदइत्यासामृचानामधेयं। तिस्र एता अनुष्टुभः। यदस्या अंहुभेद्याः। इत्याहन

स्याः। आहनस्या इति नामधेयं। आज्याद्ययोक्ताश्चतुर्थी। ता आहनस्या आग्निं नस्वोक्तिभि द
रित्यानयार्चा व्याख्याताः। यथा शंस्तव्या एवमेता अपीत्यर्थः। कथं नरो यदस्य प्राचीरज
गंतेति वैते। एते अप्यृचावेतयेव व्याख्याते इत्यर्थः। ई३ इ३इ३इ३ इ३इ३० ई३ इ३इ३ इ३ इ३इ३० ई३ इ३इ३इ३
किमयमिदमाहो३ ओ३ ओ३ ओ३ मोथामोदैवोमित्यासां प्रतिगरः। आसां दशानामृचा
मयं प्रणवेषु प्रतिगरो भवति। अवसानेषु प्राकृत एव। दधिक्राव्णो अकारिषमित्यनु
ष्टुप्। सुता सोम मधुमत्तमा इति च तिस्रः। शब्दादिमा अप्यनुष्टुभ एव। अवद्रप्सो अंशुम च
तीमतिष्ठदिति तिस्रः। एतास्त्रिष्टुभः पच्छः शंस्तव्याः। अच्छा म इंद्रमिति त्र्यमेकाहिकं। उ
क्तार्थमेतत्। ३। अथाच्छावाकस्य प्र व इंद्राय वृत्रहंतमायेति स्तोत्रियानुरूपौ। एताः ष
ड्द्विपदाः। अच्छावाकस्य स्तोत्रियानुरूपौ। अथैवया मरुदुक्तो वृषाकपिना। प्र वो महे मत

सू०वृ०उ०२ योयंतुविष्णावइत्येतत्सूक्तमेवयामरुन्नामकंतद्वृषाकपिनाव्याख्यातं।यथावृषाकपिः
५१ शंस्तव्यएवमेवएवयामरुन्नामकमपीति।नात्रपंक्तिशंसनंअतिजागतोयमेवयाम
51 रुत्संक्तिशंसनंपुनःपंचपदास्वेवपंक्तिष्वित्युक्तं।वृषाकप्यतिदेशास्त्वक्षरलाघवा
दिदमप्युक्तं।अतिदेशेनान्यछंदसःशंसनमन्यछंदसोनप्राप्नोतीति।इममेवाभिप्रा
यंभगवान्सूत्रकारःस्वयमेवप्रकटयन्प्रथावांतमेवप्रतिगरंपठितवानाचार्यः।तस्यपा
ठस्यभ्रांतिमूलताकल्पयितुमयोग्या।अविगानात्।ॐ३ॐॐॐॐॐऽॐ३ॐ
ॐॐॐॐऽॐ३ॐॐॐमदेमधोमर्दस्यमदिरस्यमदेवो३ॐ३ॐ३ॐ३मोथा
मोदैवोमित्यस्यप्रतिगरः।ऋतुर्जनिमित्यस्यप्रतिगरः।ऋतुर्जनित्रीतिनित्यान्यैकाहिका ५१
नि।नित्यैकाहिकशब्दयोःप्रयोजनमुक्तं।एवमुक्तानिप[illegible]त्रयत्राद्विपदासु[illegible]स्तुवीरन्॥

अत्रोक्तः शब्दः शिल्पविषयः। श्रुतौ तथा प्रयोगदर्शनात्। एतानि वा अत्रोक्तानि नाभाने
दिष्टो वालखिल्या इत्यादौ एवं शिल्पानि भवंति। पार्ष्णिकात्। षष्ठादहोन्यत्रापि यत्र यत्र
होत्रकाणां तृतीयसवने द्विपदास्वछंदोगा यद्दिस्कवीरन्। एतदुक्तं भवति। एकाहाहीन
सत्रेषु यस्मिन्कस्मिंश्चिदहनि तृतीयसवने होत्रकाणां सर्वेषां यदि द्विपदासु स्कवीरं छं
दोगास्तत्र सर्वत्राहान्येवं शिल्पानि कर्तव्यानि भवंति। नैवं सर्वेषामपीति। कुत एतल्लभ्य
ते। एकस्य द्वयोर्वा द्विपदास्तवने शिल्पान्येवं न भवंतीति। एतदतो लभ्यते। होत्रकाणां द्वि
पदास्विल्यतो होत्रकाणामितीद बहुवचनमुक्तं इहानुवर्त। तस्यैतत्स योजनं। यदा सर्वे
षां द्विपदास्तवनं तदेव शिल्पान्येवं भवंति। नित्याः शिल्यं त्विदमह्नः। इदं षष्ठमहर्नित्यशि
ल्पं भवति। शिल्पैरविनाभूतमित्यर्थः। नित्सवचनात्तदति दिष्टानामयं धर्मो भवत्येवेति

सर्वेषां

स०वृ०उ२ गम्यते। विश्वजित्त्वा। एतदपि नित्यशिल्पं भवति। शिल्पानां प्रवृत्तौ होत्रकाणां तृतीयसवने द्वि
५२ पदास्तवनं निमित्तमित्युक्तं। षष्ठविश्वजितो नित्यशिल्पावित्येतदप्युक्तं। एवं स्थिते षष्ठवि
52 श्वजितो यद्यग्निष्टोमसंस्थौ स्यातां तथापि तृतीयसवने होत्रकाणां सर्वेषां द्विपदास्तवनं न
स्यात्तदा कथं तयोर्नित्यशिल्पत्वमापादनीयमिति। तत्र निर्वाहमाह। तौ चेदग्निष्टोमौ यदि
वोक्थ्यौ स्याद्द्विपदास्कस्तवीरन्माध्यंदिन एवोर्ध्वमारंभणीयाभ्यः प्रकृत्या शिल्पानि शंसेयुः।
यद्येवं तदा माध्यंदिन एव सवने आरंभणीयाभ्य ऊर्ध्वं प्रकृत्या न्यूंखादिविकारवर्जितानि
शिल्पानि शंसेयुः। माध्यंदिन एवेत्यवधारणं। यद्येकस्य द्वयोर्वा तृतीयसवने द्विपदास्क
स्तवीरन्। न सर्वेषां। तथापि माध्यंदिन एव सवने सर्वे शंसेयुरित्येवमर्थं। बार्हतान्येव ५२
सूक्तानि वालखिल्यानां मैत्रावरुणः। यदा माध्यंदिने शिल्पानि शस्यंते तदैतावदनेनेति

पंक्ति

त्रयाणांनियमः क्रियते। वालखिल्यानां यानि बार्हतानि षट्सूक्तानि तान्येव मैत्रावरुण्याः शंसेत्। नान्यं कंचिच्छिल्पमित्यर्थः। कृकीर्तिब्राह्मणाच्छंसी। वृषाकपिं च पंक्तिशंसं। तस्मादूर्ध्वं कुंतापमित्यनेन कुंतापस्य वृषाकपेर्नंतरवर्तितायां प्राप्तायां तन्निवृत्यर्थं पंक्तिशंसनवचनं यावान्वृषाकपिः शंसनार्हस्तावदेव शंसेत्। न तत्संबंधि कुंतापमपीत्यर्थः। घोनेयइंद्रेत्यच्छावाकः। इदं सूक्तं अच्छावाक आरंभणीयाया ऊर्ध्वं शंसेत्। अस्मिन्पक्षे इदमप्यस्य शिल्पं भवतीति। प्रत्येवयामरुद्दित्येतदाचक्षते। एतत्सूक्तं प्रत्येवयामरुदिति श्रुतो। प्रसिद्धमित्यर्थः। होतैवयामरुतमाग्निमारुते पुरस्तान्मारुतस्य पच्छः समासमुक्तमेपदे। अस्मिन्पक्षे आग्निमारुते शस्त्रे मारुतस्य सूक्तस्य पुरस्तादेवयामरुतं होता शंसेत् पच्छः। पच्छः शंसनविधानं सर्वार्धर्चेवा चतुष्पदा इत्यर्धर्चशंसने प्राप्ते पच्छः शंसने पंचपदे

स्०वृ०उ२ इति। उत्तमे पदे समस्य प्रणुयादित्यर्थः। होतृग्रहणमच्छावाकनिवृत्त्यर्थं। अत इदमवगम्यते।
५३ अच्छावाकसंबंधमप्येतत्स्तुक्रमागतत्वेनास्मिंश्छस्त्रे विधीयते। नामारुतनिविद्धानीयत्वे
नेति। तेन एतत्साधितं भवति। धाय्यानंतरं प्रवेशादाहावस्याभावाः मारुतस्य च निविद्धा
53 नीयत्वादिति। षष्ठे त्वेव पृष्ठ्याहन्यहरहः शस्यस्यैकभूयसीः शस्त्वा मैत्रावरुणो दूरोहणं
रोहेत्। एवं माध्यंदिने सवने शिल्पेषु नीयमानेषु नीयमानेषु पार्ष्णिके षष्ठेहन्ययं विशेषः।
दूरोहणमपि रोहेदिति। एवकारोऽवधारणार्थः। अस्मिन्पक्षे षष्ठ एवाहनि दूरोहणं रोहे
न्न विश्वजितीत्यवधारणार्थः। पृष्ठ्याधिकारे पुनः पृष्ठ्यग्रहणादिदं दूरोहणं पूर्वस्माद्दू
रोहणादन्यद्दूरोहणमिति ज्ञायते। यदि पूर्वविहितस्यैवावधारणाद्विश्वजिद्व्यावृत्तिर्विधि ५३
त्सिता स्यात्तदा तस्य पार्ष्ठिक एव संभवात्पुनः पृष्ठ्यग्रहणं न कुर्यात्। करोति च अतो ज्ञाय

तेहूरोहणांतरमेतदिति। अनेनएतत्साधितंभवति। अस्यहूरोहणस्याहावविध्यभावाद्दा
हावोनकर्तव्यइति। अहरहःशस्यस्यपंचर्चत्वात्त्रिस्त्रःशस्त्वेत्येतावतैवसिद्धेएकभूयसी
रितिवचनंसंपातसूक्तेष्वेतस्यन्यायस्यप्रापणार्थं। संपातसूक्तएकाहाभवन्तु। अस्मिन्ष
डहनिएकाहाभवतिसतिसंपातसूक्तेकथामहामहद्धदित्यस्मिन्हूरोहणंरोहेत्। तस्या
च र्धर्चेएकभूयसीःशस्त्वाएकाहाभवन्त्वितिबहुवचनंयदापुनरिदमहरहीनेषुचाद्यं
भवतितदातत्रतायमानरूपाणामभावादनेकाहा अप्येकाहवद्भवति। तत्रयदिमाध्यंदि
नेशिल्पानितदाहरहःशस्यस्याभावात्संपातसूक्तएवहूरोहणंकर्तव्यमित्येवमर्थं। श
स्त्रेषुमाध्यंदिनेहोत्रकाणांशस्त्राण्येवंभवंति। स्तोत्रियानुरूपौकस्तमिंद्रेतिकद्वानप्रभा
वइंद्रेत्यारंभणीयासद्योहजातइत्यहरहःशस्यंआसत्योयात्वित्यहीनसूक्तं। एवंमैत्रा

सू०वृ०उ२ वरुणस्य। ब्राह्मणाच्छंसिनः स्तोत्रियानुरूपौ कन्नव्यो अतसीनामिति कद्वान्ब्रह्मणा ते ब्रह्म
५४ युजेत्यारंभणीया। अस्मा इदु प्रतवस इत्यहीनसूक्तं। उदु ब्रह्माणीत्याहरहःशस्यमेवं ब्रा
54 ह्मणाच्छंसिनः। अथाच्छावाकस्य स्तोत्रियानुरूपौ कद्रून्वस्याकृतमिति कद्वानुरुं नो लोक
मनु नेषि विद्वानित्यारंभणीया॥ शासद्वह्निरित्यहीनसूक्तं। अभि तष्टेवेत्याहरहःशस्यमे
वं। एतानि षट्प्रतीकानि चतुर्विंशादिष्वहःसु भवंति। षळहेषु षळहप्रकृतिषु चायं
विशेषो भवति। अहीनसूक्तस्थाने संपातसूक्तानि भवंति। मैत्रावरुणस्य। एवा त्वामिं
द्रेति प्रथमचतुर्थयोरह्नोः। यन्न इंद्र इति द्वितीयपंचमयोः। कथा महामवृधदिति तृती
यषष्ठयोः। एवं ब्राह्मणाच्छंसिनः। इंद्रः पूर्भिद्य एक इद्यास्तिग्मशृंग इत्येकैकं पूर्ववत्॥ ५४
एवमच्छावाकस्याप्येतानि सूक्तानि भवंति। इमामूष्विछंतित्वा शासद्वह्निरित्येतान्येते

ष्वहःसु सत्रविषयेषु शस्त्राणि भवंति। एकाहीभावे कृत्तानामारंभणीयानामहरहःशस्या
नामभावः। अतः संपातसूक्ते ह्रोहणमित्युक्तं। नत्वेकाहीभवत्स्वहरहःशस्यानि। नारंभ
णीयानकृत्तः। एकाहीभवत्स्विति प्रकृते पुनर्वचनमधिकारार्थं। वक्ष्यमाणो विधिःसा
त्रिकेष्वहःस्वेकाहीभवत्स्विति वेदितव्यं। तेष्वहःस्वेकाहीभवत्स्वहरहःशस्यान्यारंभणीयाः
कृत्तश्च न संति। हि शब्दः प्रसिद्धौ। प्रसिद्धश्चायमर्थो यस्मात् धर्मा एकाहेषु न प्रवर्तंत इ
ति। अतस्तत्कल्पन्यायानां तार्क्ष्यजातवेदस्यादीनामेकाहीभवत्सु प्रवृत्तिनिषेधः सिद्धो भव
ति। कृत्तांस्थाने नित्यान्प्रगाथान्छस्त्वा संपातानेव संपातवत्स्वहीनसूक्तानीतरेषु ततो
त्यान्येकाहिकानि। सात्रिकेष्वहःस्वेकाहीभवत्सु एवं शस्यं भवति। कृत्तांस्थाने नित्यानैका
हिकान्प्रगाथान्छस्त्वा घृष्वाभिधृवं प्रकृतीषु संपातांछंसेयुः। इतरेषु चतुर्विंशादिषु प्र

स्०वृ०ऽ २ कृतिषु प्रगाथानंतरं अहीनसूक्तानि शंसेयुः। ततउभयेष्वहःस्वंत्यान्येकाहिकानिसूक्ता
५५ नि शंसेयुर्माध्यंदिनेसवनेहोत्रकाइति। नित्यानांनिवर्तकेषु कद्वत्स्वप्रतिषिद्धेष्वप्राप्ता
एवनित्याः प्रगाथाः किमितितेषुपुनर्विधीयंते। यत्पुनर्विधानंयत्रापुनरेतेषुसामप्र
55 गाथाएकाहेषुप्राप्नुवंतितदातैर्नित्यानांबाधोनस्यादित्येवमर्थं। किंचान्यत्प्रगाथानंत
रंमैत्रावरुणस्यापिसंपातोहीनसूक्तंवाभवेन्नैकाहिकमित्ययमेवचक्रमःसिद्धेदि
त्येवमर्थंच। एवंहिसत्रेषुमैत्रावरुणस्यचक्रमः प्रगाथानंतरमहरहःशस्यंततःसं
पातोहीनसूक्तंचेति। तत्राहरहःशस्यंपूर्वस्यैकाहिकस्यस्थानेविहितंतत्प्रतिषिध्यत
पूर्वमेवैकाहिकंप्रतिप्रसूतंस्यात्। अतस्तदपनीयतत्स्थानेसंपातोहीनसूक्तंवाभवेत्। ५५
अंत्यमेवैकाहिकंप्रतिसूतमास्त्वित्ययंयत्नः क्रियते। एवंचेदंत्यानांविधानमदृष्फलंभ

वेत्। अस्त्त। तथाशुत्तरार्धं कर्तव्यमेव। संपातवत्कृतु सर्वस्तोमेषु प्राकृते वैकाहे हीहा
नसूक्तानि। आदितस्तृतीयानि। तुशब्दो विशेषविध्यर्थः। अयमस्मिन्सूत्रे उपरितने च
सूत्रे विशेषः। सर्वार्थीयं सूत्रद्वयोक्तो विधिरिति। एकाहीभवतामन्येषां च साधारणइ
त्यर्थः। यदा पुनः संपातवंत्याहानि सर्वैस्त्रिवृदादिभिस्त्रयस्त्रिंशांतैः षड्भिः स्तोमैः युक्
क्तानि भवंति। प्राकृतो वा एकाह एभिः स्तोमैर्युक्तो भवति। तदा अहीनसूक्तान्यादितइत
रेषां सूक्तानां भवंति। आदितइत पुरस्तादित्यर्थः। तृतीयानि च भवंति तृतीयवचनं प्र
कृतो द्विसूक्तत्वान्निमित्तवशेन प्राप्तस्यापि संपातस्याहीनसूक्तस्य वा लोपः स्यादिति
समुच्चयसिध्यर्थं। अत्र क्रमः। अहीनसूक्तं अहरहः शस्यं संपात इति सत्रेषु मैत्रावरु
णस्य इतरयोरहीनसूक्तं संपातोहरहः शस्यमिति विशेषः एकाहीभवत्सु मैत्रावरुण

स्०वृ०उ२ स्यइतरयोश्च न विशेषः। अहीनसूक्तां संपातो त्यमैकाहिकमिति। यदा पुनः प्रकृतिभूतोऽज्यो
५६ तिष्टोमः सत्रमहीनमेकाहं वा प्राप्तः यदा प्रथमस्य तूर्ध्वं चतुर्थात्सर्वस्तोमोतिरात्र इति
56 सर्वस्तोमश्च भवति। तत्रायं क्रमः। सर्वेषांच स्वंस्वमहीनसूक्तं ततऐकाहिके चद्वेद्वेसू
क्ते इति पूर्वयोः। अछावाकस्याहीनसूक्तं भूयइत्। अभितष्टीयमेव महर्गणप्राप्तोए
काहत्वे अहीनसूक्तानि द्वे द्वे चैकाहिके सर्वेषामिति। सामसूक्तानि सप्रगाथानि सर्वपृ
ष्ठेषु पृष्ठानि। आदितस्तृतीयानीति च उभयं निवृत्तं। सामसूक्तानि पुरस्तात्सूक्ताना
मिति देशविधानादादित इति निवृत्तं। एकयोग निवर्तनादन्यदपि निवृत्तं। यदा पुनः सं
पाताहीनसूक्तैरैकाहिकानि त्रिप्रकाराण्यहानि भवंति तदसामसूक्तानि भवंति। तेषांस्त्ता ५६
नं स्वरूपं चोत्तरत्र वक्ष्यते। तेष्वेव शास्त्रेषु शाक्वरवैरूपरैवतानि सामानि च पृष्ठकार्ये

भवंति। तेषां साम प्रगाथाश्च भवंति। तदेतत्सामसूक्तानि पृष्ठानि च तानि सप्रगाथानीत्ये
तत्त्रयं सर्वपृष्ठनिमित्तं अस्मिन्नेव सूत्रे अयं च विधिरेकाहे। भवतामन्येषां च साधारणः।
एवमत्र क्रमः। संपाताहः सुशाक्करादीनां स्तोत्रियानुरूपाः सामप्रगाथाः कद्वंत आरंभ
णीयाः सामसूक्तान्यहीनसूक्तान्येतावत्सर्वेषां समानं ततो हरहः शस्य संपातो मैत्रावरु
णस्य। इतरयोः संपाता अहरहः शस्य इति। अहीनाहः स्वेवं भवति। सामसूक्तेभ्योनंतर
महरहः शस्यमहीनसूक्तं मैत्रावरुणस्य। इतरयोरहीनसूक्ते अहरहः शस्ये इति। वि
श्वजिति तु विशेषः अनुरूपेभ्य ऊर्ध्वं वामदेव्यादीनां योनिशंसनमिति प्रकृतो ज्योति
ष्टोमे हर्गणागते सामसूक्तान्यहीनसूक्तानि सर्वेषां ततो अहरहः शस्यमंत्यमेकाहिकं
मैत्रावरुणस्य। इतरयोः पूर्वे एकाहिके। ततो हरहः शस्य इति। एवं त्रिप्रकारेष्वहः सुस

स्र०पृ०३२ वे पृष्ठेषु माध्यंदिने सवने होत्रकाणां शस्त्राणि भवंति। एषामेवं त्रिप्रगाथाणां महत्वां एका
५७ हाभावे सर्वपृष्ठत्वे सत्येवं शस्यं भवति। कद्वतां स्थाने नित्याः प्रगाथास्ततः सामसूक्तानि।
57 अहीनसूक्तानि संपाता अंत्यान्यैकाहिकानीति संपाताहःसु। अहीनाहःसु तान्येव सं
पाता वर्जितानि त्रीण्येव सूक्तानि ज्योतिष्टोमिके तु सामसूक्तानि द्वे द्वे चैकाहिके इति स
र्वेषामविशेषः। ततोंत्यान्यैकाहिकाहीनीत्येतदुत्तरार्थमित्युक्तक्रमास्मिन्सूत्रे उपकरो सूत्रेऽस्मिंश्च सूत्रे
ति। प्रकृतेर्द्विसूक्तत्वात्तदंत्यैकाहिके विनापि द्विसूक्तत्वसिद्धेरैकाहीभवत्स्वप्यहःस्व
प्राप्ते त्यानामपि लोपे तेषामलोपार्थं तद्वचनं। पृष्ठ्ये संस्थाः। वक्ष्यत इति शेषः। संस्थाग्रह
णं परप्रत्ययत्वात्संस्थानियतेः स्वशास्त्रोक्तेः प्रापिकत्वप्रतिपत्त्यर्थं। अग्निष्टोमः प्रथ ५७
मं। षोडशी चतुर्थः। उक्थ्या इतरे। एवं संस्थः पृष्ठ्यो भवति। इति पृष्ठ्यः। इत्येवं गुणवि

शिष्टः प्रकृतोयः पृष्ठ्यः सः अयुजेषुरथंतर पृष्ठः। युक्षु बृहत्पृष्ठः। तृतीयादिषु वैरूपा
दिभिः समुच्चित पृष्ठ्योयः स प्रत्यक्ष पृष्ठ संज्ञकः पृष्ठ्यो भवतीत्यर्थः। अन्यैः परोक्ष पृष्ठः।
एतेभ्योन्यैः सामभिर्यत्र पृष्ठकार्यं क्रियते पृष्ठ्ये स परोक्ष पृष्ठ संज्ञको भवति। एतैर्वो
पसृष्टैः। उपसृष्टैरिति ऋगंतर संबद्धैरित्यर्थः। एतैर्बृहद्रथंतरादिभिः स्वयोनिभ्योन्य
योनि संबद्धैः पृष्ठकार्यं। यत्र पृष्ठे क्रियते स च परोक्ष पृष्ठः। वैरूपादीनामभावे पृष्ठ्यस्तो
मः। यदि बृहद्रथंतरे एव केवले क्रियेते न वैरूपादयः। तदा पृष्ठ्य स्तोम संज्ञको भवति।
पवमान भाव आपवर्ग्य पृष्ठ्यः। यदि माध्यंदिने पवमाने रथंतरादीनि क्रियेरन्न पृष्ठस्था
ने तदा। आपवर्ग्य पृष्ठ्य संज्ञो भवति। तन्न पृष्ठ्यो हेतुश्चेच्छ्येतनोधसे॥ ४॥ यदि होतुः पृ
ष्ठे निष्केवल्यस्य स्थाने श्यैतं वा नौधसं वा कुर्यात्। अन्यत्र बृहदादीनि क्रियेरन्। तदा तन्न

सू० पृ० ३२ पृष्ठ्यानामभवति। एवमनेकधा पृष्ठ्यविकल्पा उक्ताः शास्त्रांतरोक्ताश्च संति तेषु सर्वेषु बृ
५८ हद्रादीनां य[?]स्थानमक्रियायामस्वयोनिभावं वा दृष्ट्वा यथाविधि योनिशंसनं कर्तव्यं॥
४॥ अभिजिद्बृहत्पृष्ठः। ज्योतिष्टोमेन सह चतुर्दशाहानि व्याख्यातानि। इदानीं पंचदश
58 महरुच्यते। अभिजिन्नाम सबृहत्पृष्ठो भवति। पृष्ठ्यानां रथंतरादीनां विधानस्य प्रयोज परमत्सयानां
य नं छंदोगप्रत्ययमित्यत्र सूत्रे वक्ष्यते। उभयसामाँ द्यपि रथंतरं यत्ताँयस्य स्थाने। इह यज्ञी
स्थाने त्रिविधं छंदोगानां उभयसामत्वं भवति। बृहद्रथंतरयोरन्यतरं माध्यंदिने पव
माने भवति ब्रह्मसाम्नि वाग्निष्टोमसाम्नि वा अत्रास्माकं पवमानभाव एव सर्वत्रोभय
साधयितुमत्रायं यत्नः कृतः। एतदुक्तं भवति। सर्वत्र बृहद्रथंतरयोरन्यतरस्य पवमान ५८
भाव एवोभयसामत्वं भवतीति। अभिजिति तु यदि पृष्ठ्यस्थाने बृहद्भवति रथंतरं चा

ग्निष्टोमस्थानेतदापत्रोभयसामत्वंभवति। इदमत्र छष्ठविधानस्यप्रयोजनं। यद्विपु
नर्विपरीतंतदापि अनेनैवोभयसामत्वंभवतीति। पिबवांस्त्विहसामप्रगाथः। इहग्रह
णाद्वाचनिकोयमर्थइतिप्रदर्शयति। पिबासोममंतमुग्रहीति मध्यंदिनः। तमुग्रहीत्य
नेनसाहचर्यात्। पिबासोममित्यस्यभारद्वाजस्यग्रहणंनान्यस्य। तयोरैकाहिकैयेकु
चनतत्कार्ययोग्यइत्यर्थः। एवंद्विसूक्तोमध्यंदिनोविहितोभवति। पूर्वस्यचत्येतेअन्ये
वानेकाहिविधेर्निरपेक्षत्वात्तेनेकसूक्तमेवविहितंभवति। अतःसामर्थ्यात्वाचनिको
यविकल्पइतिनिश्चिनुमः। एतएवेतिगोतमःसप्तदशत्वात्छष्ठस्य। एवंस्थितेएकसूक्त
पक्षेन्यायानुगुण्यमस्तीतिगोतमआह। एतएवपिबासोममंतमुग्रहीत्येतेएवकर्तव्ये
नेकाहिकेअन्येवेति अयमत्रन्यायः सप्तदशत्वात्छष्ठस्येति छष्ठस्यसप्तदशत्वंएकस

स०वृ०उ२ क्त्वेयथाहोतुस्तथोपपादयितुमाह। यावत्योयावत्यःकुशानांनवतोदशतोवानिष्केवल्येता
५६ वंतिसूक्तामध्यंदिनाःस्युरितिमहान्यायः।कुशानामछंदोगानांस्तोत्रावृत्तिसंख्यानार्था
59 निकाष्ठानि। तासांनवतोदशतोवाविभज्यमानानांयावत्योनिष्केवल्यस्तोमेपूर्णाभवंति।
तावंतिसूक्तामाध्यंदिनाभवेयुः। तावंतिसूक्तास्तावत्सूक्ताइत्यर्थः। तावंतिसूक्तानियेषु
माध्यंदिनेषुतेतावतिसूक्तामाध्यंदिनाइत्युच्यंते। अयंन्यायःप्राचुर्येणसर्वेष्वहःसुद
ष्टइतिमहान्यायइत्युक्तं। अत्रव्यभिचाराशंकानकर्तव्या। यत्पुनर्मध्यमेछांदोमिकेच
तुश्चत्वारिंशेस्तोमेपंचसूक्तानिदृष्टानि। तत्तुवाचनिकमितिपरिहर्तुंशक्यतएव। अत्रा
पिद्विसूक्तत्वंवाचनिकमेवेत्यस्याव्यभिचारितायुक्ता। न्यायस्योत्पादनस्यप्रयोजनं। माध्यं ५६
दिनेहोतुर्निष्केवल्येस्तोमकारि तंशस्यमित्यत्रवक्ष्यते। मरुत्वतीयस्योत्तमेविपरीते॥

पिबा सोममभीत्यस्योत्तमे ऋचौ व्यत्यस्य शंसेत्। उत्तमां शस्त्वोपोत्तमां शंसेदित्यर्थः। नातु
र्विंशिके तृतीयसवनं। अन्यस्तोतुरैकाहिकं होत्रकाणां सर्वत्र सार्वत्रिकमेव उक्तोऽभिजित्।
अथेदानीं स्वरसामान उच्यंते। अभिप्लवत्र्यहः पूर्वः स्वरसामानः। अभिप्लवस्य यः पूर्वस्त्र्य
हस्तेनातिदिष्टानि वक्ष्यमाणगुणविशिष्टानि त्रीण्यहानि स्वरसामसंज्ञानि भवंति। स्वरा
णि लिहदृष्टानि। स्वरसंज्ञकानि सामानि एतेष्वहःसु दृष्टानि भवंति। एतदेवैतेषु स्वरसा
मशब्दस्य प्रवृत्तिनिमित्तं। तेषां स्तोत्रिया यज्ञा यथा अपूर्व्यमत्स्यपायि ते महः एमेनं प्रत्येत
नेति। यथासंख्येन तेषामेते स्तोत्रिया भवंति। अधिकारादेव तेषामित्यस्यार्थस्य सिद्धेस
त्यां तेषामिति वचनमुत्तरार्थं। आद्यो वा सर्वेषां। यज्ञायथा अपूर्व्यस्य यमाद्यस्तोत्रियः स
एव वा त्रिषु स्वरसामसु स्तोत्रियो भवति। वयं घ त्वा सुतावंत इति तिस्रो बृहत्सायस्ते साधि

सू०वृ०उ२ ष्ठावसइतिषळनुष्टुभइत्यनुरूपाः।एकांबृहतींगृहीत्वाद्वेअनुष्टुभौचगृहीत्वाएकोनुरूपो
६० भवति।एवमपरौचानुरूपौ।अत्रतेषामित्यनेनसंबंधः।तेषांस्वराणांयथासंख्येनैतेनु
60 रूपाभवंतीति।स्तोत्रियेयथाप्रयुक्ताबृहतीतथाअनुक्ताबृह[illegible]नुरूपा।स्तोत्रियेयत्स्थाने
बृहतीयत्स्थानेवाअनुष्टुभौअनुरूपेचतत्स्थानएवैताःकर्तव्याइत्यर्थः।स्थायीन्येतानि
यथाबृहद्रथंतरे।यथाबृहद्रथंतरेपृष्ठ्याभिप्लवयोःतदतिदिष्टेषुचाहःसुपृष्ठ्यत्वेनयो
निशंसनरूपेणवास्थायिनीनित्ये।एवंस्वरसामसुस्वराणिनित्यानीत्यर्थः॥५॥विषुवांदि
वाकीर्त्यः।विषुवान्नित्येकोनविंशमहस्तद्दिदानीमुच्यते।सविषुवांदिवाकीर्त्योभवति॥
अयंविधिःकर्मणिनिष्प्रयोजनः।उदितेप्रातरनुवाकइतिविधानात्तस्यचाग्निष्टोमस्य ६०
चाहन्येवासमापनीयत्वात्कर्मपार्श्वकीर्तयतोविषयत्वाच्च।अतस्तद्विधायकब्राह्मणस्य

तत्साधनभूतानांचशस्त्रादीनांद्विवेचाध्ययनंकर्तव्यमित्येवमर्थोयंयत्नः कृतोभगवता
श्वलायनेनाचार्येणेतिमंतव्यं।उदितेप्रातरनुवाकः।अनुवक्तव्यः इतिशेषः।पृथुपाजा
अमर्त्यइतिषड्धाय्याः सामिधेनीनां।अस्मिन्नहनिसामिधेनीनामुपोत्तमायाःप्रागेताःप्र
क्षेपोधाय्याभवंति।धाय्याग्रहणंस्थानलाभार्थं।सामिधेनीग्रहणंशस्त्रधाय्यानिवृत्त्यर्थं।
सौर्यःसवनीयस्योपालंभ्यः।सुत्याधिकारादेवसवनीयत्वेसिद्धेसवनीयग्रहणंसवनी
यस्यालंभंकृत्वापश्चात्सौर्यआलंभ्यइत्येवमर्थं।सोमापौष्णोवा।अयंवापशुरुपालंभ्यः
पूर्वोवेतिविकल्पः।समुद्राद्दूर्मिरित्याज्यंसंसुमेषं कयाशुभेतिचमरुत्वतीयां।एकविंश
हीनस्तोमेपिविशुवत्यनयोःसूक्तयोःसमुच्चितयोरेवमरुत्वतीयसिध्यर्थंचशब्दः।महा
दिवाकीर्त्यंपृष्ठं।महादिवाकीर्त्यमितिसामनाम।विभ्राड्बृहत्पिबतुसोम्यंमधुनमोमित्र

सू०वृ०उ२ स्य वरुणस्य चक्षस इति स्तोत्रियानुरूपौ यद्दि बृहद्रथंतरे पवमानयोः कुर्युर्योनी एनयोः शंसेत्।
६१ उत्तरविवक्षार्थोयमनुवादः। रथंतरस्य पूर्वां। पूर्वविशिष्टत्वात्समासे च पूर्वनिपातत्वात् बृह
61 तोयोनिः पूर्वं शंस्तव्येत्येतदाभासनिवृत्यर्थं सूत्रं। एतत्सार्वत्रिकं अनयोर्योनिशंसनप्राप्तौ
अस्मिंस्त्वहनि निमित्तक्रमादेवैषोर्थः सिध्य सिध्य एवेति। अद्य भवतोन्याभिरपि सन्निपा
ते। अन्याभिर्वैरूपादीनां योनिभिः सह यदा बृहद्रथंतरयोर्योनी शस्येते तदा एतयोर्योनी
शस्त्वान्येषां योनीः शंसेदयमपि विधिः सार्वत्रिक एव। उक्तौ त्विह साम प्रगाथः। इंद्रमिद्दे म
वतातय इत्येषः। त्वयामुत्वान्तमंगीर्भिरुक्थैरिति तिस्रो यास्तिग्मशृंगोभित्यंमेषामिंद्रस्य
नुवीर्याणीति। त्वयामुत्वेत्येवमादीनि निष्केवल्यस्य सूक्तानि। एतस्मिन्नैंद्रानिविदं शस्त्वा ६१
शंसेदेवोत्तराणि पइदिवाश्विदस्य सुतइत्वमेषप्र पूर्वर्द्धषामदः प्रमंहिष्ठायत्यमूष्विति।

एतस्मिन्नित्यनूच्यमाने सूक्तं समाप्य निविल्स्यात्तं निवर्त्य सूक्तमध्ये निविदः प्रापणार्थमेत
स्मिन्नित्युच्यते। ऐंद्रामिति विशेषणमत्रान्नेऽप्यपि निविदस्तीति ज्ञापनार्थं। तेन ह्रो हूणास्या
पि निविल्वं साधितं भवति। तथाच श्रुतिरस्ति। एषा ह वा अत्र निवित्। इति ह्रो हूणास्य निवि
त्वे सति प्रयोजनं। एकपंचाशतं द्विपंचाशतं वा शस्त्वा मध्ये निविदं दधाति तावती रुत्तराः शं
सतीत्यत्र संख्याने हृसवतीन संख्येयेति निविदं शस्त्वोत्तराणि षडिल्कच्यमाने सूक्तशेष
स्याशंसनमाशंक्येत। तन्निवृत्त्यर्थं शंसेदेवसूक्तशेषं। उत्तराणि च षट् सूक्तानीत्युक्तं भग
भे वता सूत्रकारेणाप्य ह्रूणां एकविंशशाधीनस्तोऽपि विषुवति सूक्तहानिर्मासिदीत्येवमर्थं। उ
त्तरग्रहणाप्रदर्शनार्थमतः पूर्वेषामुत्तरेषां चहीनस्तोमेऽपि विषुवति सूक्तहानिर्नास्तीति
सिद्धं। ह्रहतार्स्यमंततः। अस्मिन्नहनि निष्केवल्यसूक्तेष्वेवां ततस्तार्क्ष्यं शंसेत्। अतोऽत्र

सा०वृ०उ० निविक्षानीयत्वमप्यस्यभवतीतिगम्यते। अतोत्रताक्ष्यस्यपृथगाक्षानंभवतीति। अन्यत्रतुस्त
६२ क्षानं तर्याभावात्तेभ्यश्चान्यदनंतरमित्याहा वो भवत्येवात्यमूब्वित्यत्रहीनपादग्रहणात्स
वंत्रताक्ष्यसूक्तमेवभवति। तस्यैकांशस्त्वाहृयहरोहणांरोहेत्। तस्यताक्ष्यस्यैकामन्यंशस्त्वा
हृयहरोहणंशंसेत्। रोहेतपूर्ववत्। इतिनिष्केवल्यं। विकर्णचेद्ब्रह्मसामोर्ध्वमनुरूपात्त
वोदस्ममन्तीषहमभिप्रवःसुराधसमितिब्राह्मणाछंसीशंसेतनोधसयोर्योनीशंसेत्। य
दिब्राह्मणाछंसिनस्तोत्रेविकर्णसामकुर्युः। तदाब्राह्मणाछंस्यनुरूपादूर्ध्वंतंवोदस्मम
न्तीषहमितिनोधसयोनिमभिप्रवःसुराधसमितिशंसेतयोनिंचशंसेत्। शंसेतस्यपूर्वनिपा
तोत्याचत्तरत्वात्। नोधसस्यपूर्वा। शंसेतस्योत्तरां। नोधसस्यपूर्वामित्येतावतेवासिद्धेशंसेत ६२
स्योत्तरत्वेपुनस्तस्योत्तवचनंतंवोदस्ममन्तीषहमितिनोधसयोनिंपूर्वमुक्त्वाभिप्रवःसुरा

त

धसामितिपश्चादुत्क्राश्येतनोधसयोर्योनावितिश्रुक्रमेणासाम्नोनिर्देशं कृतवान्। अतस्तत्क्रा
त्यनुपपत्त्यर्थंपूर्वमुत्तरामितिचोक्तवान्। यापूर्वोक्तासानोधसयोनिः। योत्तरासाश्येतस्येत्य
यमर्थः सिद्धोभवति। शंसनेचनोधसयोनिं पूर्वं शंसेत्। पश्चाच्छ्येतस्येत्ययमर्थोत्रैवसाध
यितुमुभयोर्ग्रहणं कृतमितिसिद्धं। एतद्योत्रकाणांयोनिस्थानं। यच्चप्रगाथआक्रान्तमेता
भ्यस्तत्संचाहावपरिमितत्वात्। यस्मगाथेप्रकृतिप्राप्तमाह्वानं तद्योनिभ्यएवभवतिनप्रगा
थेभ्यइत्यर्थः। एवंचेद्वचनादेवायमर्थः सिध्यतिकिंहेतुवचनेनेति। हेतुवचनस्येदंप्रयोज
नं। पंचाहावस्यअतिरेकभयादेवइदमन्यदीयमाक्रान्तं अन्यस्योच्यते। वचनबलाद्दिसेत
द्दर्शयितुमिति। उत्तमेनाभिप्लविकेनोक्तं तृतीयसवनं। षष्ठस्य सावित्राभर्वेत्तृतीयेनेत्या
दिना। एकाहिकोतुप्रतिपदनुचरो। नाभिप्लविकोविश्वोदेवस्यनेतुरित्याद्यो इत्यर्थः। भासं

सू०वृ०३२ नामसामविशेषः। तदत्र कर्तव्यमित्यर्थः। पृक्षस्य वृष्णो अरुषस्य नू सह इति स्तोत्रियानुरूपौ।
६३ भासस्येत्यर्थः। मूर्धानं दिवो अरतिं पृथिव्या मूर्धा दिवो नाभिरग्निः पृथिव्या इति वा। इमौ वा पू
र्वौ वेति कल्पः। अन्यासु चेद्देवं लिंगाः स्युस्ततोनुरूपः। उक्ताभ्योन्यासु मूर्धलिंगास्वचेद्भासः
क्रियेत तदा सस्तोत्रियं गृहीत्वा मूर्धा दिवो नाभिरित्ययमेवानुरूपः कर्तव्या इत्यर्थः। आ
वृत्ता स्वरसामानः। आवृत्ताः प्र[illegible]तिलोमा इत्यर्थः। स्वरसाम्नां उत्तमः प्रथमो मध्यमो मध्यम
आद्योत्तम इति। एषामावृत्तिः पुनर्वचनं नवरात्र प्रस्तार्थं। नाहरंतरसिध्यर्थमिति॥६॥ वि
ह श्वजितोग्निं नर इत्याज्यं। विश्वजिन्नामविंशमहरुच्यते। तस्मिन्नहनि विश्वजिति अग्निं न
रो दीधितिभिरित्याज्यं भवति। चतुर्विंशेन मध्यंदिनः। निष्केवल्यमरुत्वतीये चतुर्विंशेन व्या
ख्याते इत्यर्थः। अत्र विशेषमाह। वैराजं तु पृष्ठं सन्न्यस्य। अत्र वैराजं नाम साम पृष्ठस्थाने भ ६३

वतीति वैराजं पृष्ठं सन्न्यूङ्खमभिव्यक्तं। बृहतश्च योनि भार्ग्वेरूपयोन्याः। चतुर्विंशानि देशादेव
बृहतो क्रियमाणस्य योनिशंसने प्राप्ते पुनर्वचनं योनिशंसनस्य निमित्तद्वये सत्यपि सकृ
देवास्य योनिशंसे दित्सेव मर्षे। भार्ग्वेरूपयोन्या इत्येतस्मिन्नक्रमे सिद्धेऽपि पुनर्वचनं बृहत
श्च योनिमित्येतावत्युच्यमाने योन्यन्तरनिवृत्तिशंका स्यादिति तदाशंकानिवृत्त्यर्थं होत्रका
णां पृष्ठानि। शाक्वरवैरूपरैवतानि। होत्रकशस्त्रस्तोत्रेष्वेतानि सामानि भवतीत्यर्थः। अत
स्तेषां योनयोऽस्मिन्नहनि होत्रकाणां शस्त्रेषु स्तोत्रिया भवंति। अनुरूपश्च तस्य तस्य स्तो
त्रियस्य स्वकीयो भवति। ते योनीः शंसंति। त इति विशेषयं पृष्ठवतो पृष्ठवंतंश्च होत्रकाः
शंसंतीति होत्रकद्वैविध्यप्रतिपादनद्वारेण द्विविधो विश्वजित्सर्वपृष्ठोऽसर्वपृष्ठश्चेति प्रद
र्शयति। तथा चतुर्विंशमहाव्रताभिजिद्विश्वजित्यत्र सर्वपृष्ठग्रहणं कुर्वन्नपि भेदेन वि

सं०वृ०उ२ श्वजिद्ग्रहणंकरोति।तदपिदर्शयत्यसर्वपृष्ठोविश्वजिदस्तीति।अतस्तेपृष्ठवंतोहोत्रकायो
६४ नीःशंसंति।वामदेव्यस्यमैत्रावरुणः।उक्थेब्राह्मणाच्छंसिनः।उक्थेइतिश्येतनौधसयोर्यो
64 नीइत्यर्थः।कालेयस्याच्छावाकः।वामदेव्यकालेययोरेतेयोनीइतिप्रदर्शनार्थमाह।एका
हिकोस्तोत्रियावेतयोर्योनी।कयानश्चित्र आभुवन्नरोभिवोविदद्वसुमित्येतेइत्यर्थः।ता
अंतरेणाकद्वंतश्चैतेषामेवपृष्ठानांसामप्रगाथानां।तायोनीःकद्वंतःप्रगाथाश्चांतरेण
मध्यइत्यर्थः।एतेषांशाक्वरवैरूपरैवतानांसासामप्रगाथांछंसेयुरेकैकमेकैकःसाम
सूक्तानिसामप्रगाथानीत्यत्रसामसूक्तानांचसामप्रगाथानांचसर्वपृष्ठेषुप्राप्तिरुक्ता
इहएतेषांमध्येसामसूक्तानांस्वरूपंस्थानंचोच्यते।अन्येषांस्थानमेवस्वरूपस्यान्यत्रोक्त ६४
त्वात्।स[illegible]त्रामदासोयोजातएवाभ्रेकइतिसामसूक्तानिपुरस्तात्सूक्तानांउक्तंतृतीय

सवनमुत्तमेन षष्ठ्यात्मा। ऐकाहिकौ तु प्रतिपदनुचरौ। बृहच्चेदग्निष्टोमसाम त्वमग्ने यज्ञा
नामिति स्तोत्रियानुरूपौ। इति नवरात्रः। योयमभिजिदादिर्विश्वजिदंतः अहःसमूह उक्तः
सवनरात्रसंज्ञो वेदितव्यः स च अभिजित्स्वरसामानो विषुवानावृत्ताः स्वरसामानो विश्व
जिच्चेनवरात्रः। सर्वेग्निष्टोमाः। सर्वग्रहणं स्वरसामसूक्तयोरप्यग्निष्टोमतासिध्यर्थमभि
प्लवे प्रकृति प्रथमस्याह्नत्वात्तयोरुक्थ्यसंस्थता शंक्येतेति। उक्थ्यानेके स्वरसाम्नः। एवं
केचिच्छाखाविशेषानुसारिण इच्छंतीत्यर्थः। द्वितीयमाभिप्लविकं गोः। आयुरुत्तरं। तृतीय
माभिप्लविकमित्यर्थः। संज्ञाप्रसंगादयमपि संज्ञाविधिरुच्यते। त्र्यहक्लृप्ते पूर्वस्मात्त्र्यहा
त्सवनशो यथांतरं गोरायुरुत्तरात्। यदि गो आयुषी त्र्यहक्लृप्ते भवतः तदेवं भवतः पूर्व
स्मादाभिप्लविकत्र्यहात्सवनमादाय यथोत्तरं यथाक्रमेणेत्यर्थः। एवं गोर्भवति। प्रथमा

स्०वृ०उ०२ प्रातःसवनाद्द्वितीयान्माध्यंदिनंसवनं।तृतीयात्तृतीयसवनं।एवमुत्तराह्णाभिप्लविकात्र्यहात्स
६५ वनशोयथांतरमायुरित्यर्थः।षडहक्लृप्तेयुग्मेभ्योगोरयुजेभ्यआयुः।षडहेक्लृप्तेएतएव
65 तद्देवंभवतः।अभिप्लवस्ययुग्मेभ्योहोभ्यःसवनशोयथांतरंगोःक्लृप्तिः।अयुजेभ्यआयु
रितिपूर्ववत्।एवंत्रिःप्रकारागोआयुषोरुत्पत्तिः।दशरात्रे।अधिकारोयमेतद्विदमि
त्यस्मात्प्राग्यद्वक्ष्यतेतद्दशरात्रइतिवेदितव्यं।वक्ष्यमाणानिचदशानिअहानिदशरात्रसं
ते ज्ञानिभवंतीत्युभयमत्रोच्यौपृष्ठ्यःषडहःपूर्वत्र्यहःपुनश्छंदोमाः।प्रथमंतावत्पृष्ठ्य
षडहोभवति।ततःपृष्ठ्यस्यैवयानित्रीणिपूर्वाण्यहानितेषांत्रयाणांछंदोमाइतिसंज्ञा।
एतानिदशरात्रेनवाहानिपुनर्ग्रहणंकिमर्थंसएवपूर्वस्त्र्यहःपुनरावर्ततेतस्यान्यत्वम ६५
त्र नास्तीतिज्ञापनार्थं।तेनइदंसाधितंभवति।स्वरसाम्नामाभिप्लविकत्वेसत्यपिऐका

हिकएवसाममगाथास्त्रिष्वप्यहःसु भवंति। नामिधूविकइत्यर्थः। नत्वत्र स्थायिवैरूपं तृती
ये। अत्रेति छंदोमप्रत्ययार्थमुच्यते। तेनात्र छंदोमेषु तृतीयेहनि वैरूपं साम न स्थायि भव
ति। अनित्यमित्यर्थः। एतदुक्तं भवति। यदि पृष्ठस्थाने तत्कुर्युस्तदास्तोत्रियत्वेन शंसेद्यदि
तत्स्थाने न कुर्युर्योनिशंसनमपि न कुर्यादिति। असत्यत्रग्रहणे दशरात्राधिकारात्तस्य तृ
तीयेहनि वैरूपस्यानित्यता प्रसज्येत। अतस्तन्निवृत्त्यर्थं अत्रग्रहणं। प्रथमस्य छंदोमिक
स्य द्विसूक्तो माध्यंदिनः। दशरात्राधिकाराच्छांदोमिकस्येति विशेषणं। द्विसूक्ततासिध्यर्थं
तेनात्रो धरेदितराणीत्ययमेव पक्ष आरंभणीय इति। वैषुवतेन विधानेन पूर्वे च। त्वं सुमे
षं कया शुभेति च मरुत्वतीयं अभित्वं मेषमिंद्रस्य नु वीर्याणीति निष्केवल्यं। द्वितीयस्य शंसा
महाँ महश्चित्वमिंद्र पिबा सोममभि तमस्य द्यावापृथिवी महाँ इंद्रो नृवदिति मरुत्वतीयं।

स०वृ०उ२ छांदोमिकस्येत्यनुवर्तते। सं च त्वे जग्मुरिति सूक्ते आ सत्यो यातु मघवां ऋजीषीति निष्केव
६६ ल्यं। आ याहि वनसा सह आनुकं बभ्रुरेक इति द्विपदा सूक्तानि पुरस्ताद्वैश्वदेवसूक्तानां। एतानि
66 सूक्तानि लक्षणतो द्विपदान्येव तत्किमर्थमेषां द्विपदावचनमिति। अस्येदं प्रयोजनं समा
म्नायस्य बलीयस्त्वज्ञापनार्थो तेन एतत्साधितं भवति। याश्चतुष्पदावत्समाम्नाये पठ्यंते
द्विपदाः पवस्व सोम मंदयन्परि प्र धन्वेंद्राय सोमेत्येवमाद्याः। तासां ग्रावस्तोत्रे चतुष्पदा
वद्देवस्तवनं भवति। याः पुनर्द्विपदावद्देवसमाम्नायंते तासामध्यासवद्दिस्फक्कमिति। वै
श्वदेवसूक्तानामिति कर्मधारयः समासः। वैश्वदेवानि च तानि सूक्तानि चेति अतस्त्रिष्व
स्य हः स्वेतानि यथाक्रमे पाभवंति। तथा च व्यूहं प्रथमे छांदोमिके वक्ष्यति नित्यानि द्विपदा ६६
सूक्तानीति। सर्वेषु छांदोमिकेषु प्राप्नोतीति दर्शयति। इति नु समूहः॥ ७॥ दशरात्रेऽधि

कृतः तत्र न वाहान्युक्ता इति नु समूह्ळ इत्युपसंहृतवानाचार्यः। तेन एतज्ज्ञायते समूह्ळ
व्यूह्ळो नवरात्रावपि स्त इति। दशमम् अहर्वक्ष्यते तच्च साधारणं द्वयोः तेन समूह्ळव्यूह्ळश्च द
शरात्रो भवति। नवरात्र दशरात्र इत्युभयथा व्यवहारोऽस्त्येव। उभयथा व्यवहारेऽपि नवैवा
हानि विक्रियन्ते। दशमं तु तुल्यमेवेति सिद्धं॥७॥ समूह्ळश्चेत् छन्दस्योत्तरे त्र्यहे मध्यंदिनेषु
गायत्रांस्तृचाननुपसंशस्यन् तेषु निविदो दध्यात्। यदि व्यूह्ळो दशरात्रस्तदा पूर्वस्मादयं विशे
ष उच्यते। उभयत्र छन्दस्योत्तरे त्र्यहे मध्यंदिनेषु सूक्तेषु [illegible] गायत्रांस्तृचाननुपसंशस्यन्ते
षु तृचेषु निविदो दध्यात्। गायत्रग्रहणं गायत्रेष्वप्यहःसु सवनछन्द इति दर्शयितुं। अतो
त्र गायत्र्याः सवनछन्दः तच्छन्दस्कं सूक्तमाहत्य तस्मिन्निविद्धेया। नातिपन्नछन्दस्के सूक्त
इति। उपसंशस्येति वचनं तृचानामेतेषां सूक्तत्वेन स्वातंत्र्यनिवृत्त्यर्थं। इतरथा तृचानेव

स०वृ०उ२ याज्ञिकाः सक्तमाकुरितिस्मरणात्। सूक्तान्येव सक्तस्थानेष्वहीनेष्विति परिभाषया च सवतं
६७ न स्यात्। ततश्चाहीनस्तोमेषु तृचवर्जनमन्यस्य उद्धारः स्यादिष्यते च तृचसहितस्यांतस्य
सूक्तस्यालोपः शंसने च तृचसहितात्सूक्तादेव पुरस्ताद्वावायो न केवलं तृचादेवेति इत्ये
६७ वमपि लभ्यते। तृचा नाम सत्यपि सूक्ते त्वेतृचेष्वेव निविद्धेयेत्येवमर्थं। तेषु निविदो द
त्सु ध्यादिकं। तेन एकां तृच इत्येवं निविद्धेया भवति। इमं नु मायिनं हुवे त्यमु वः सत्रासाहं
मरुत्वाँ इंद्रमीढ्व स्तमिंद्रं वाजयामस्य यं हयेन वा इदमुप नो हरिभिः सुतामिति। एतेष
इत्तृचाः। त्रैष्टुभान्येषां तृतीयसवनानि। एषां महां तृतीयसवनानि त्रैष्टुभानि तृतीय
सवनानि भवंति। इदमपि सवनछंदस्त्वे न विधीयते प्रयोजनमपि पूर्ववदेव द्रष्टव्यं॥ ६७
चतुर्थेहन्या देवो यातु प्र द्यावेति वा सिंधं प्रक्रभुभ्यः प्रस्तुकैलिति वैश्वदेवं। वैश्वानरस्य

स्मृतौ कइंद्यक्ता अग्निं नर इत्याग्निमारुतं अष्टादशोत्तमे विराजः। विराड्वचनं विरा
जएवैता। ऋचोनासां विराड्धर्मोस्तिस्त्र इति। द्विपदा एकादश मारुते। एकविंशतिर्वैश्व
देवसूक्ते। द्विपदा इति शेषः। द्विपदा वचनमुक्तप्रयोजनं। पंचमस्योऽव्यदेवः सविता
दमूनाइनिति स्त्रो महीद्यावापृथिवीइहज्येष्ठे इति च तस्र ऋभुर्विभ्वासुषेजनमिति वै
श्वदेवं। हविष्यांतं वपुर्नु तदग्निर्होता गृहपतिः सराजेति तिस्र इत्याग्निमारुतं। उत्तमा
वैश्वदेवसूक्ते साध्यासा। उत्तमा जातवेदस्ये। ऋच्यध्यस्य तइत्यध्यासः। समाम्नायार्था
म्नचिय स्याम्नुक्तार्थइवयः पूर्वपादसदृशः पादो विधीयते सोध्यास इति विद्यात्। सर्व
त्राध्यासानुपसमस्यप्रणुयात्। उपसमासोनाम अन्त्यप्रणवं यथर्गक्षरमेव संधाय
वचनं। ऋगंते तु प्रणवः कर्तव्यः। एवं सर्वत्र वचनं प्रकरणादुत्कृष्या [illegible] प्ययंविधिः

स०वृ०उ२ प्रवर्तत इत्येवमर्थं। सर्वत्र वचनं कारणमंतरेणाप्यस्याविधेः प्रापणार्थं। अध्यासानामच
६८ तुष्पाद्त्वादर्धर्चशंसननिवृत्त्यर्थं वचनं। यज्ञस्योडुष्यदेव इति गार्त्समदं। किमुश्रेष्ठउप
68 नो वाजा इति त्रयोदशार्भवं। चतस्रश्च वैश्वदेवसूक्ते त्वच मंत्यमुपसरेदिति वैश्वदेवं। कि
मुश्रेष्ठ इति त्रयोदशार्चं उप नो वाजा इति च तस्र एताः सप्तदशार्चमार्भवं भवति। स
मूह्ळत्रीणि वैश्वदेवसूक्तानि तेषामंत्यं त्वच मुपसरे स्वस्त्यात्रेय इति संवृतकं। अहश्च
कृष्णं मध्वो वो नाम सप्तलयेत्याग्निमारुतं। इति पृष्ठ्यः। उक्तमिति शेषः। उक्तानुसंकी
र्तनं पृष्ठ्यस्यापि समूह्ळव्यूह्ळव्यवहारसिध्यर्थं॥ ८॥ अथ छंदोमाः। अथानंतरं व्यूह्ळ
स्य छंदोमा अधिक्रियंत इति संबंधः। समुद्रादूर्मिरित्याज्यं। आवायो भूषशुचिपा उ ६८
प नः प्रयाभिर्यासि दाश्वांसमच्छा नो नियुद्भिः इति नीभिरध्वरं प्रसोता जीरो अध्वरे

ध्वस्थाग्रेवायवइंद्रमादनासोयावांशतंनियुतोयाःसहस्रमित्येकपातिन्यः।अयवांमित्रावरु
णास्सूर्धन्वाग्नोमतानासत्यारथेनानोदेवशवसायाहिशुष्मिन्नवायत्तेशुदेवयंतोअर्चन्न
क्षोदसाधायसासस्त्रएषेतिप्रउगं।एकपातिन्योऽधीत्यचो।माध्यंदिनेसूक्तेविपरिहृत्येतर
योर्निविदोदध्यात्।मध्यंदिनेभवंमाध्यंदिनंनिष्केवल्यमरुत्वतीययोःसूक्तेइत्यर्थः।मरु
त्वतीयेनिष्केवल्येचयेसूक्तेतेपूर्वेत्तिरेकृत्वाइतरयोरुत्तरोक्तयोर्निविदोदध्यात्।अं
तेनिविदंदध्यादित्युत्तरयोरेवनिविदिप्राप्तायांइतरयोरितिवचनंसंसवेप्यनुधारए
वास्मिंदशरात्रेभवतीत्येवमर्थं।अतस्त्रीष्टुक्ततापास्मिंदशरात्रेभवतीतिनिविदंतिप
तोचास्मिंजागतएवनिविदेया।एवमुत्तरयोश्चतुर्थपंचमे।अत्रापीतरयोरप्यनुवर्त
ते।प्रयोजनंचपूर्ववत्।एवमुत्तरयोरपिछंदोमयोश्चतुर्थपंचमेसूक्तेविपरिहृत्योत्तरी

स०ह०उ२ कृतेष्वेव निविशेत् स्यात् । अभित्वादेव सवितः प्रेतां यन्तस्य शंभुवा यं देवा यजन्मन इति तृचोऽ
६६ भिरग्ने उ व इति वैश्वदेवं । पूर्वाणि त्रीणि सूक्तानि तृचा एव । नित्यानि द्विपदा सूक्तानि वैश्वदेव
69 सूक्तानामित्यस्य कर्मधारयत्वं द्विपदासूक्तानां त्रिष्टुप्छंदो मे षु स मूह्ळ्माप्तान मनेन व्यूह्ळ
का प्राप्तिः सोच्यते । वैश्वानरो अजीजनद्दिव्यैः स विश्वं प्रति चाक्लृपदृतूंनुत्सृजते वशी । यत्तस्य
वयउत्तिरन् । वृषा पावक दीदिहीत्यग्ने वैश्वानर द्युमत् । जमदग्निभिराहुतः । अयन्धास्त्रिष्टु
भं ऋतं व इत्याग्निमारुतं । वैश्वानरीयं सूक्तं तृचं आद्याचातुर्मास्येषु कल्पजा । उत्तरे अत्रै
वाम्नाते । स विश्वं वृषा पावकेत्येते ॥ ६ ॥ द्वितीयस्याग्निं वो देवमित्याज्यं । कुविदंग नमसा
ये वृधासः पीवो अन्नाँ रयिवृधः सुमेधा उछं नु यसः सुदिना अरिप्राइत्येकपातिन्य उरां
ता ह्दतानदभाय गोपाया वचर स्तन्वो याव दोज इत्येकाद्द्वे च प्रतिवां सूर उदिते सूक्ते धेनुः ६६

प्रत्नस्य काम्यं दुहाना ब्रह्माणं इंद्रो पयाहि विद्वान् अर्वाग् अग्निः कमतिं वस्वो अग्रे उत स्या नः
सरस्वती जुषाणेति प्रउगं। आद्यस्तृच एकपातिन्यः। द्वितीयस्त्वेकादृचः। हिरण्यपाणिम् ऊत
य इति च तस्त्रो मही द्यौः पृथिवी च नो भुवाना पितरा पुनरिति तृचो देवानाम् इद् व इति वैश्वदे
वं। प्रथमं चतुर्ऋचं। ततो द्वे सूक्ते तृचो। चतुर्थं सूक्तं। ऋतावानं वैश्वानरम् ऋतस्य ज्योतिषस्प
तिं। अजस्रं घर्मम् ईमहे। दिवि पृष्टो अरोचताग्निर् वैश्वानरो महान्। ज्योतिषा बाधते तमः। अ
ग्निः प्रत्नेषु धामसु कामो भूत[illegible]तस्य भव्यस्य। सम्राळेको विराजति। क्रीळं वः शर्धो ग्नेम् ऋळेत्या
ग्निमारुतं। प्रथमः कल्पजस्तृचः। इतरे सूक्ते॥ २०॥ तृतीयस्यागन्म महे त्वाज्यं। प्रवीरया शुच
यो दद्रिरे ते ते सत्येन मनसा दीध्यानाः दिविक्षयं ता रजसः पृथिव्या मा[illegible] विश्व वाराश्विना गतं
नो यं सोम इंद्र तुभ्यं सुन्व आ तु प्र ब्रह्मा णो अंगिरसो नक्षंत सरस्वती देवयंतो हवंत आ नो

स्०वृ०३२ दिवोहृहतःपर्वतादासरस्वत्यभिनोनेषिवस्यइतिप्रउगं।ददिरेतेइतिप्रयोगपाठः।एकपाति
७० न्यउत्तमः।उत्तमस्तृचएकपातिन्यः।दोषोआगात्सवांमाहद्यवीअभीतितृचाविंद्रश्चेददातु
70 नस्तेनोरत्नानिधत्तनेत्येकाद्वेचयेत्रिंशतीतिवैश्वदेवं।दोषोआगादितिपार्ष्टिकेषष्ठेहनि
अनुचरत्वेनपठिताइहसूक्तत्वायोच्यंतेद्यावापृथिवीयंतृचएव।इंद्रश्चेरददातुनइत्येका
तेनोरत्नानिधत्तनेतिद्वेआर्भवंसमाहार्यं।वैश्वानरोनऊतयआप्रयातुपरावतः।अग्नि
र्नःसुष्टुतीरुप।वैश्वानरोनआगमदिमंयज्ञंसजूरुप।अग्निरुक्थेनवाहसा।वैश्वानरोअं
गिरोभ्यस्तोमउक्थंचचाकनत।ऐषुद्युम्नंस्वर्यमत्।मरुतोयस्यहिप्राग्नयेवाचमित्याग्निमा
रुतं।वैश्वानरीयंसूक्तंकल्यजस्तृचः॥११॥दशमेहनि।यदितऊर्ध्वंवक्ष्यतेतद्दशमेहनीत्ये ७०
वमधिकारोभवति।अनुष्टुभांस्थाने।अग्निंनरोदीधितिभिररण्योरितितृचमाग्नेयेक्रतौ॥

आग्नेये क्रतौ या अनुष्टुभः प्रातरनुवाके न्यूङ्ख्यन्ते। तासां सर्वासां स्थाने यं त्वचो भवति। क्रतुग्र
हणं प्रातरनुवाके [illegible] एवायं विधिः स्यान्नान्यत्रेत्येवमर्थं। उषा अप स्वसुस्तम इति प
च्छो द्विपदां त्रिरुषस्या क्रताविरत्यनुवर्तते। पच्छो द्विपदा इत्यस्य शास्त्रविषयत्वात्सच्छ इति वच
नमनुवचनेप्यत्र प्रापणार्थं। या उषस्य क्रतावनुष्टुभस्तासां सर्वासां स्थाने एतां द्विपदां त्रिरु सां
क्त्वा ब्रूयात्। आश्वुना यातमश्विना स्वश्वेति त्वच माश्विने क्रतौ। क्रतुग्रहणमाश्विने शस्त्रे
एवं मा भूदित्येवमर्थं। अतो तायते दशममहरति रात्र संस्थमेकाहो भूतमस्तीति तथा च शा
स्त्रांतरे दृष्टं। स्तोकसूक्तस्य द्वितीयतृतीययोः स्थाने ग्ने घृतस्य धीतिभिरुभे स्फ श्चं द्र सर्पि
ष इत्येते। प्रकृतेपि स्थानग्रहणो पुनः स्थानग्रहणं दशमेहन्यनुष्टुभां स्थान इत्यस्य सूत्रस्या
नीप्सितार्थप्रतिपादकत्वशंकानिवृत्त्यर्थं दशमेहनि या अनुष्टुभस्तासां सर्वासां स्थाने अ

स०वृ०उ२ न्याकृत्वः कर्तव्या इति। यद्ययमर्थः स्यात्तदा यासां स्थाने या उक्तास्तासां सर्वासां स्थाने ता भवंति।
७१ यासां नोक्तास्तासामन्या अन्वेषणीयाः स्युः। एवं सति प्रथमेनैव सूत्रेण गतार्थत्वात्। पुन
71 रपि स्थानग्रहणप्रपंचोनर्थकः स्यात्। कृतश्च प्रपंचः अतो ज्ञायते स्य प्रपंचस्यायमर्थ इ
ति। यासां स्थाने न्या विधीयंते तासामेव स्थाने ता भवंति। अन्यासामनुष्टुभामेव प्रयोगः क
र्तव्य इति। पुनः पुनः स्थानग्रहणं कृतमिति सिद्धं। इदमापः प्रवहत इत्येतस्याः स्थाने आपो
अस्मान्मातरः शुंधयंत्विति। अच्छावो अग्निमवसे प्रत्यस्मा इति त्वचयोः स्थाने च्छानः
शीरशोचिषं प्रतिश्रुताय वो धृषदिति त्वचावच्छावाकः। अच्छावाकग्रहणमाश्विने शस्त्रे
च्छावो अग्निमवस इत्यस्य उद्धारो माभूदिति। अतोपीदमहरेकाहीभूतं अतिरात्रसंस्थम ७१
स्तीति ज्ञापितं भवति। परि त्वाग्ने पुरं वयमित्येतस्याः स्थानेग्ने हंसि न्यत्रियामिति। उत्तिष्ठता

वपश्यते स्येतस्यास्थान उत्तिष्ठन्नोजसासहेति। उरुविष्णोविक्रमस्वेति घृतयाज्यास्थानेभ
वामित्रो नशेव्यो घृतास्नुतिरिति। घृतयाज्याग्रहणं इयमेव घृतयाज्यास्मिन्नहनि नियमेन
भवतीति। अनेन प्रकारेणास्मिन्नहनि अन्यतरतश्चेदित्ययं पक्षो न प्रवर्तत इति साधितं
भवति। अहरहश्चाहर्गणेषु यत्रै तदहः स्यात्। न केवलं दशम एवाहनि घृतयाज्याया उ
भयतो यागपक्षे ऽ: किंतर्हि सत्रेष्वहीनेषु च यस्मिन्नहर्गणे दशममहरस्ति तस्मिन्नहर
हश्चायमेव घृतयाज्याविधिर्भवति। अहरहरिति सर्वेष्वहःस्वित्यर्थः। एतदुक्तं भवति॥
यस्मिन्नहर्गणे ऽपि वाक्यमस्ति तस्मिन्सर्वेष्वहःसु घृतयाज्याः सोम्यस्योभयतो यागप या
क्ष एव नियम्यत इति। सिनीवाल्या अभ्यस्येदित्येके। सिनीवाल्या या येयाज्यानुवाक्ये उक्ते
ते अनुष्टुभौ सत्याव भ्यासेनान्यत्वमापादयेदित्येके मन्यंते। अभ्यासे चानुवाक्यायां च

स्०वृ०उ२ तुरक्षराभ्यासः। याज्यायामष्टाक्षराभ्यासः कर्तव्य इति श्रुतावेव प्रसिद्धं। अंत्यानामष्टा
७२ क्षराणामभ्यासः। नास्मिन्नहनि केनचित्कस्यचिद्विवाच्यमविवाक्यमित्येतदाचक्षते।
अस्मिन्नहनि केनचित्कतां कस्मैचित्कत्रे मंत्रः कर्मवा न विवाच्यं नाख्यातव्यमित्यर्थः
कुतः यस्मादेतदहरविवाक्यमिति श्रुतावेव प्रसिद्धं। परस्परमविवचनीयमेतस्मि
न्नहनीत्यविवाक्यमिदमहर्भवति। संशये बहिर्वेदि स्वाध्यायप्रयोगः। यदि कस्यचित्क
र्तुः स्वपदार्थकरणे ज्ञान संशयविपर्यायाः स्फुरंस्तदा किं कर्तव्यमिति अत्राह। बहिर्वेदि
स्थित्वा तस्याज्ञानाद्यपनयनार्थं अध्ययनेनान्येन स्वाध्यायप्रयोगः। कर्मणि संशयश्चे कर्त्तव्यः
तद्विधायकशास्त्रं ब्राह्मणं प्रयोगशास्त्रं वा पठेत्। मंत्रे चेन्मंत्रः पठितव्यः। एवं बहिर्वे ७२
द्यध्ययनेन यदि संशयादिर्नात्येयात्तदा। अंतर्वेदीत्येके। एवं चेदंतर्वेदि स्थित्वैव पठि

तव्यं। उपदेष्टव्यं। न व्यंजनेनोपहितेन वार्थः। एवमपि संशयो यदि नापैस्यात्तदा व्यंजनेन
वाउपहितेन वा प्रतिरूपोर्थः। कर्म वा मंत्रो वा साधयितव्यः। व्यंजनं नाम व्यज्यते सूच्यते ये
न तद्व्यंजनं। उपहितं नाम छलोक्तिः। अयमप्य एवंप्रकारः। नाहमस्मै वदामीत्येवं प्रका
रः। एतदुक्तं भवति। अंतर्वेदि स्वाध्यायप्रयोगेणापि तेषामर्थो यदि न सिध्येत्तदा केन
न्ने शब्देन तदर्थं ब्रूयात्। न वाचकेनेत्यर्थः। अथवाउपहितेन छलोक्त्या वा तेषामर्थः साध
यितव्य इति। न व्यंजनेनेत्यत्र नेति व्यवच्छिद्य योजना। पूर्वोक्तेन यदि संशयो नापै
यात्तदा व्यंजनेनोपहितेनेति। प्रत्यासित्वा प्रायश्चित्तं जुहुयुः। उक्तानामन्यतमेनो
पायेनार्थं साधयितुं न शक्यते यदि तदा विधिमुखेनैव तदर्थं साधयित्वा सर्वप्रायश्चि
त्तं जुहुयुः। स्वशास्त्रविहितं विशिष्टं प्रायश्चित्तमस्ति चेत्तदा जुहुयुः। अग्नेतमद्याश्वंन

स०१०३२ स्तोमैरित्याज्यं। सूक्तकार्यैर्विहितत्वात्सूक्तमेव भवति। पंचाक्षरे यावियहः। दशाक्षरे यावा। आत्म
७३ रथं यथोतय इत्येतस्यास्थाने त्रिकद्रुकेषु महिषो यवाशिरमिति। आद्याथाउष्णारः। उत्तरे देवभ
73 वतः। अनुचरादि सर्वं समानं। सखायशिषामहीतिति स्तउष्णिहो मरुत्वां इंद्रेति मरुत्वतीयं
। एतास्तिस्र एकं सूक्तं। मरुत्वाँ इंद्र वृषभ इत्येकं एवं द्विसूक्तं मरुत्वतीयं। उष्णिय हणं विस्पष्ट
र्थं। कयानश्चित्र आभुवदित्येतासु रथंतरं पृष्ठं। तस्य योनिं शंसेत्। उत्तरविवक्षार्थमेतत्॥
बृहतश्च गायणागारिर्दशरात्रे युग्मान्वयत्वात्। इदं सामान्यतो दृष्टमात्रं। तार्क्ष्ययो कपदाउप
संशस्यऋगावानमेकपदाः शंसेदिदं विश्वस्य गोपतिरिति च तस्रः। तार्क्ष्यानंतरं एकपदा
ऋगावानं शंसेत्। तार्क्ष्यस्योत्तमेन प्रणवेन प्रथमामेकपदामुपसंतनुयात्। उपसंशस्येति व ७३
चनं तार्क्ष्यस्यैकपदादिभिः। सहैकतासिध्यर्थं संबंधे सत्येकपदाभ्यः पृथगाहावो न कर्तव्यः।

असति तु तार्क्ष्ये एकपदाभ्य एवावापः कर्तव्य इत्येतत्साधितं भवति। पुनरेकपदाग्रहणं तार्क्ष्या
भावेऽपि एकाहेष्वेकपदानां प्रापणार्थं। उत्तमयोपसंतानः। उत्तमयैकपदया सूक्तादेर्हाव उप ए
संतनुयात् दिक्षो विश्वस्य जगतो३ शोत्रं३ सावो३मिति। यइंद्र सोमपातम इति षड्ढुब्याहेषु ध्म
स्यत इति निष्केवल्यं। उक्तार्थमेतत्। तत्सवितुर्वृणीमह इत्येतस्यास्थाने भित्यं देवं सविता
रमोण्योरिति। आद्यायास्थान एषा भवति। कविमित्यर्धर्चांतः। अस्य हि स्वयशस्तरमित्या
दि समानं। ऋभुक्षण इत्यार्भवं। पश्वा न तायुमिति द्वे पदे सामिद्धमग्निं समिधा गिरा गृण
इति त्वचश्च द्विप्रतीकं जातवेदस्यं। द्विप्रतीकवचनं द्विपदा सूक्तानामसति वचने निविधा
या नीयत्वं नास्तीति ज्ञापयितुं। अत ओं हिवनसा सहेत्यादीनामावापो न कर्तव्यः। तेभ्यः परस्ता
द्वैश्वदेवसूक्तादिष्वेवावापः कर्तव्य इति सिद्धं। चतुर्थेनव्यूढस्य तराणि सूक्तानि। वैश्वदे

स०सू०३२ वाग्निमारुतं योरार्भवजातवेदस्यादन्यानिसावित्रादीनियानिसूक्तानितानिव्यूढस्य चतुर्थादह्न
७४ आहर्तव्यानीत्यर्थः। होतुरुक्तादन्यदैकाहिकं। होत्रकाणांसाग्निकामेवसर्वेअहीनंसंपात
74 भावात्। माध्यंदिने यं विशेषः। आरंभणीयाभ्य ऊर्ध्वं सद्यो हजात इति अहरहः शस्यमंत्य मैकाहिकमेवा त्वामिंद्रेति मैत्रावरुणस्य। ब्राह्मणाछंसिनः पूर्वमैकाहिकं। इंद्रः सूर्भिउद्व
सापीत्यहरहः शस्यं। अछावाकस्यभयदिति पूर्वमैकाहिकमहरहः शस्यमभितष्टेवेति।
वामदेव्यमग्निष्टोमसामाग्निनरोदीधितिभिररण्योरिति स्तोत्रियानुरूपौ। अग्निष्टोमइदमहः। अग्निष्टोमसंस्थमिदमहर्भवतीत्यर्थः। ऊर्ध्वं पत्नीसंयाजेभ्यः॥ १२॥ गार्हपत्ये जुह्वती
हरमेहरमध्वमिह धृतिरिह स्वधृतिरग्नेवाङ्स्वाहावाळिति। गार्हपत्यंत्रशालामुखीयः॥ ७४
तत्रसर्वेहोत्रादयोजुह्वति पत्नीसंयाजांतत्वादहः संस्थितइति वक्तव्येसत्सुसंयाजेभ्य ऊर्ध्वं य

इतिब्रवीतितस्मात्पययतिदक्षिणमस्यैवाह्नएतदंगमिति।आग्नीध्रीयउपसृजंधरुणंमातरंधरु
णंधयन्।रायस्पोषमिषमूर्जमस्मासुदीधरत्स्वाहेति।अत्रापिहोत्रादयःसर्वेकर्तारोजुह्व
ति।इदंहोमद्वयंब्राह्मणेप्युक्तं।तत्रैकोहोमकर्ता।इतरेजुह्वंतंसमन्वारभंतएववाजुहुया
त्सूत्रानुसारेणवा।सदःप्रसर्प्यमानसेनस्तुवते।अस्मिन्कालेछंदोगाःसदःप्रसर्प्यमान
सेनस्तुवते।मानसंनामस्तोत्रविशेषः।सदःप्रसर्प्येतिपरकर्तृकविधानं।यत्रैतेस्तुवते
तत्रैवोत्तरंकर्महोत्रापिकर्तव्यमित्येवमर्थं।अतःसदस्योवाध्वर्युर्नित्याकुर्यादित्यादिसर्वं
कर्तव्यं।यर्हिस्तुतंमन्येताध्वर्युर्वित्याकुर्यात्।यदाछंदोगैस्तुतंमन्यतेहोतामानसत्वादप्र
त्यक्षास्तुतिरितिसमाप्तिरितियस्मिन्स्तुतंमन्यतइत्युक्तं।तदाअध्वर्युरित्याकानंकुर्यात्।
होहोतरितीतरः।इतरोध्वर्युःहोहोतरितिप्रत्याकानंकरोति।आयंगौःपृश्निरक्रमीदित्य

तादध्वर्योरित्यपि मध्यस्वरो भवति नोपांशुस्वरः। पराचीरित्यभ्यासनिवृत्त्यर्थः। व्याख्यास्वरो नाम मध्यमस्वर

स०१०३२ पांश्रुतिस्वरः पराचीः शस्त्वा व्याख्यास्वरेण चतुर्होतॄन्व्याचक्षीतॆतिस्त्र इति वचनं कृत्वा धारयत्येव सत्य

७५ य प्यासां स्तोत्रियधर्मनिवृत्त्यर्थं। तेनाध्वर्यो इत्यभिहावः शस्त्रागमे वन स्तोत्रियागा अतः शस्त्रस्य

मध्यमस्वरः। चतुर्होतार इति तेषां चित्तिः स्रुगित्येवमादेः मन उपवक्तेव मंतस्य मंत्रस्य नाम

तं व्याचक्षीत। वाक्ये वाक्ये वसाय ब्रूयादित्यर्थः। देवा वा अध्वर्यो प्रजापतिगृहपतयः सत्रमा

सत। एवं चतुर्होत्रसंज्ञस्य मंत्रस्योसत्ति वाक्यमिदमुक्त्वा चतुर्होतॄन्व्याचक्षीत। ओं होतः स्त

थाहोतरित्यध्वर्युः प्रतिगृणात्यवसितेवसिते दशसु पदेषु। ओं होतः इत्येतो प्रतिगिरो तेषां

चित्तिरित्यादिषु दशसु पदेषु भवतः। तत्र पूर्वेषु पंचसु पूर्वो भवति। उत्तरेषूत्तर इति विभा

गोर्थाल्लभ्यते। दशसु पदेष्विति वचनाद्दशस्वेव पदेषु चतुर्होतृसंज्ञकेष्वेतौ प्रतिगिरो भ ७५

वतः। न प्रतिपत्ति वाक्ये न ग्रहसंज्ञके च मंत्र इति। उत्तरयोस्तनुव्रत्योद्वयोरपव्रजन वचना

देवप्रतिगराभावः। अत्राहावोयः तत्रहोहोतरिति प्रतिगरः। सापराञ्चीनांशंसतिचोदितत्वात्।
प्राकृतावेवप्रतिगरौनोउपांशुकर्तव्योउत्तमेर्धर्चेयःप्रणवस्तेनावसानमर्थाल्लभ्यते। उत्तर
स्यानुक्तादपदसमाम्नातत्वाच्चैतेनासोत्रिमात्रएवभवति। प्रणवांतश्चप्रतिगरस्तत्र। तेषांचि
त्तिःस्रुगासी३त्। चित्तमाज्यमासीत्। वाग्वेदिरासी३त्। आधीतंबर्हिरासी३त्। केतोअग्निरा
सी३त्। विज्ञातमग्नीदासी३त्। प्राणोहविरासी३त्। सामाध्वर्युरासी३त्। वाचस्पतिर्होतासी३त्।
मनउपवक्तासी३त्। अयंचतुर्होत्राख्यःपदसमूहः। तेवाएतंग्रहमगृह्णत। वाचस्पतेविधे
नामन्। विधेमतेनाम। विधेस्त्वमस्माकंनाम्नाद्यांगच्छ। यांदेवाःप्रजापतिगृहपतयऋद्धिम
राध्नुवंस्तामृद्धिंराध्यासम् इति। तेवाएतमित्यादितामृद्धिंराध्यासमित्यंतोग्रहसंज्ञोमंत्रः। अ
पव्रजत्यध्वर्युः। अस्मिन्नवसरेध्वर्युरपगच्छति। अथप्रजापतिस्तनूरितरउपांश्वनुद्रवति।

ब्रह्मोद्यं च।

स्०कृ०उ२ ग्रहमंत्रस्य मध्यमस्वर एव प्रकृतत्वात्तथानंतरं प्रजापतेस्तन्तूरिति रोहोतानुद्रवत्येव पांशु प्रजाप

७६ तेस्तन्तूरिति मंत्र संज्ञा। ब्रह्मोद्यं चोपांश्वेवानुद्रवति। अन्नादा चान्नपत्नी च भद्रा च कल्याणी च

76 निलया चापभया चानाप्ता चानाप्या चानाधृष्या चाप्रतिधृष्या चापूर्वा चाभ्रातृव्या चेति तन्वः।

एते तनुसंज्ञका मंत्राः। अग्निर्गृहपतिरिति हैक आहुः सोऽस्य लोकस्य गृहपतिर्वायुर्गृहप

तिरिति हैक आहुः सोऽन्तरिक्षलोकस्य गृहपतिरसौ वै गृहपतिर्योऽसौ तपत्येष पतिर्ऋतवो

गृहाः। येषां वै गृहपतिं देवं विद्वान्गृहपतिर्भवति राध्नोति स गृहपती राध्नुवंति ते यजमानाः

येषां वा अपहतपाप्मानं गृहपतेयजमानाः। पाप्मानं घ्नते। एते ब्रह्मोद्य संज्ञा मंत्राः। अध्व

र्योऽअ रात्स्मेत्यृत्विजैः। एतस्मिन्यवाक्यं तदुच्चैर्वक्तव्यं। एषा याज्या। यदेतस्मिन्यवाक्यं तदेवमे ७६

वावस्थिते याज्या भवति। एष वषट्कारः। एष वषट्कारश्च भवति। आगश्च न कर्तव्या॥

नानुवषट्करोति। उक्तं वषट्कारानुमंत्रणं। तदिह कर्तव्यमिति शेषः। अरात्स्म होतरित्यध्वर्युः प्रत्याह। एतदुक्तं भवति। दशममहः परिसमाप्तं। अतो वयमरात्स्म। अध्वर्यो समृद्धा वयमित्यर्थः। होत्रैवमुक्तोऽध्वर्युरपि तमेवार्थमनुमोदते। सत्यमेव मरात्स्म होतरिति। मनसाध्वर्युर्ग्रहं गृहीत्वा। मनसा भक्षमाहरति। मनसा क्रियमाणमन्येन न शक्यते ज्ञातुमिति संविज्ञानार्थमिदमुच्यते। मानसेषु भक्षेषु मनसोपह्वानं भक्षणं। अध्वर्युर्येवं कृते स्वयमप्येवं करोति। अध्वर्युर्ग्रहणात्। अन्ये प्रतिप्रस्थात्रादयोऽपि भक्षाहरणं कुर्वंति। तेष्वेवोपहववाचनं भवतीति ज्ञायते। मनसा स्नानमाप्याय्योदुंबरीं समन्वारभ्य वाचं यच्छंत्या नक्षत्रदर्शनात्। तत्रानधरान्पाणीन् श्चिकीर्षेरन्। तत्रोदुंबर्यान्वारंभणे पाणीनधरान्कर्तुं नेच्छेयुः। औदुंबर्या अग्रप्रदेशे समन्वारभेरन्नित्यर्थः। दृश्यमानेष्वध्वर्युमुखाः समन्वारब्धाः सर्पेत्या

स०वृ०उ०२ तीर्थदेशाद्युवं तमिंद्रापर्वताधुरोयुधेतिजपंतः। दृश्यमानेषु नक्षत्रेषु अध्वर्युप्रधानाः परस्परं सं
७७ मन्वारब्धाः सर्पत्या तीर्थदेशप्राप्तेः। युवं तमिंद्रेत्येतामृचं सकृत्सर्वे जपंतः। अध्वर्युपथेनेत्येके।
77 अयं सर्पणस्य मार्गविधिः। अध्वर्युपथो नाम हविर्धानाग्नीध्रीयोर्मध्यं। तेन वा प्रसर्पंति द
क्षिणस्य विहेर्धानस्याधोक्षेणेत्येके। अक्षस्याधस्ताच्चक्रयोर्मध्येनेत्यर्थः। एक इति द्विरुक्तेः
प्रयोजनं अस्य सर्पणस्य मार्गांतरमप्यस्तीति प्रदर्शनार्थं प्राप्य वरान्वृत्वा वाचं विसृजंते य
दिहोनमकर्म यदित्यरीरिचाम। प्रजापतिं तत्पितरमप्येत्विति। तीर्थदेशं प्राप्य तत्राभिमता
न्वरान्कामानित्यर्थः। वृत्वा प्रार्थयित्वा ततो वाचं विसृजंते। यदिहोनम इत्यनेन मंत्रेणाऽ
स्यायमर्थः। यः अस्मिन्नहनि कर्मणि ऊनमतिरिक्तं वा कृतवंतो वयं। तत्सर्वं प्रजापतिं पितरं ७७
पालयितारं गच्छत्विति। अथ वाचं निह्नवंते वागेतु वागुपैतु वागुपमेतु वागिति। निह्नवंतेन

मस्कुर्युरित्यर्थः। अस्माभिर्विसृष्टा न गच्छत तस्मान्नैव पुनः प्रविशन्तीत्यर्थः। उत्करदेशेऽस्क
ब्रह्मण्वंताँ त्रिराहूय वाचं विसृजंते। ततः सर्वे होत्रादयः उत्करदेशे स्थित्वा सुब्रह्मण्योमिति
त्रिराहूय वाचं विसृजंते। मित्यास्त्विह वाग्विसर्गः। य उक्तो वाग्विसर्गमंत्रो भूर्भुवः स्वरिति ते
नात्र वाग्विसर्गः कर्तव्यः। एतावत्सात्रं होतृकर्मान्यत्र महाव्रतात्। एतावदित्येतत्सारिमा
णामित्यर्थः। सत्रे भवं सात्रं होतृशब्देन होतात त्पुरुषाश्चोच्यंते। तेषां कर्म होतृकर्म। प्रथम
तावच्चतुःसंस्थो ज्योतिष्टोम उक्तस्ततः सत्राणामित्यधिकृत्य चतुर्विंशादीन्यविवाक्यप
र्यंतान्यहान्युक्तानि महाव्रतं चान्यत्र वक्ष्यते। यदत्र सत्राणामित्यधिकृत्यत्र योविंशतिरहा
न्युक्तानि सांगोपांगानि तस्य सर्वस्य सत्रांगत्वज्ञापनार्थमित्येतावत्सात्रं होतृकर्मेत्युपसं
हरति। एतावदेतत्सात्रं होतृकर्म न शास्त्रांतरमवेक्षणीयं। नापि सत्रेषु पुनः प्रकृत्यंतिदेशो

सं०वृ०उ२ पेक्षणीयइति। अत्रहोतृकर्मेतिविशेषणं ब्रह्मणोब्रह्मपुरुषाणांशास्त्रांतरोक्तमस्तिचेत्तदपि
७८ कर्तव्यमित्यर्थः सत्राणामित्यधिकृत्यत्रयोविंशतिमेवाहान्युक्त्वामहाव्रतमनुक्त्वैवएता
78 वत्सात्रंहोतृकर्मेत्युक्तेमहाव्रतस्यासात्रत्वप्रसंगःस्यात्तंनिराक[रण]ार्थंअन्यत्रम
हाव्रतादित्युक्तं। अतोमहाव्रतमपिसात्रमेवेत्युक्तंभवति। तदेषाभियज्ञगाभि[...]गीय
ते। अतिरात्रश्चतुर्विंशंषडहावभिजित्स्वराः। विषुवान्विश्वजिच्चैवछंदोमादशमव्रतं।
प्रायणीयश्चतुर्विंशंषडहोभिप्लवएवच। अभिजित्स्वरसामानोविषुवान्विश्वजित्तथा।
छंदोमादशमंचाहरुत्तमंतुमहाव्रतं। अहीनेकाहः सत्राणांप्रकृतिःसमुदाहृयते॥
यद्यन्यधीयतेपूर्वंधीयतेतंप्रतिग्रामंत्यहानिपंचविंशतिर्यैर्वैसंवत्सरोमितः। एतेषामे ७८
वप्रभवस्त्रीणिषष्टिःशतानियदिति। पंचविंशतिरितिज्योतिष्टोमेनसहितस्यसत्रेष्वपि

प्रवृत्तिरस्तीतिसात्त्रिकैः सहग्रस्त्यंते। संवत्सरइतिगवामयनमुच्यते। कथं पंचविंशत्याष
च्छ्यधिकानित्रीणिशतानिपूर्यंतइतितदुपपादयति एतेषामेवप्रभवइति। अभ्यासादि
नासंख्यापूरणसामर्थ्यंप्रभवइत्युच्यते तद्येकेचनछांदोग्येवाध्वर्यवेवाहोत्रामर्शाःस
माम्नातानतान्कुर्यादकृत्स्नत्वाद्धोत्रस्य। छंदोगानांशास्त्रंछांदोग्यंतथा। अध्वर्यवमे
वेत्युक्तं। एतावत्सात्त्रंहोतृकर्मेतितत्राध्वर्यवेवाछांदोग्येवावेदेयेकेचनहोत्रामर्शाः प
दार्थाः दृष्टाः कर्तव्यतयातेनकर्तव्याः। होत्रामर्शाइतिहोत्राभासाइत्यर्थः। कुतः। अकृत्स्न
त्वाद्धोत्रस्य। तौहिवेदौहोत्रस्यनविधायकौ। अन्यपरत्वात्तयोः। अतस्तत्रयेसमाम्नाताः
पदार्थास्तेनर्थकाभावाभवंतु। तत्सापेक्षेणापिवाप्रयोगशास्त्रांतरेणसार्थकावाभवंतु॥
सर्वथातावदाश्वलायनसूत्रप्रयोगेतेनकर्तव्याएवेतिनिश्चिनुमः। अकृत्स्नत्वादितिहेतु

सू०वृ०उ२ वचनाद्यत्रकृत्स्नंहौत्रमाध्वर्यवेषुविहितंदर्शपूर्णमासानिरूढकौकिल्यादिषुतत्रतत्कर्तव्यमेवेति
७६ सिद्धं।छंदोगप्रत्ययंस्तोमात्रियः पृष्ठसंस्थेति।तथेकेचनेत्यस्यापवादःस्तत्रद्वयंस्तोमादयश्छं
79
दोगप्रमाणाइत्यर्थः। अध्वर्युप्रत्ययंतुव्याख्यानंकामकालदेशदक्षिणानांदीक्षोपसत्प्रव
संस्थोत्थानानामेतावत्त्वंहविषामुच्चैरुपांशुतायांहविषांचानुपूर्व्यं।एतत्सर्वमध्वर्युप्रत्ययं॥
अध्वर्य्वधीनमित्यर्थः।व्याख्यानंपरिज्ञानं।काम्यतइतिकामःफलं।कालःशरदिवाजपेयेने
त्यादि।देशःप्राचीनप्रवणादि।दक्षिणाद्वादशशतादि।दीक्षाएकातिस्रोवादीक्षाः।उपस
दस्तिस्रउपसदइत्यादिउपसदश्च।तत्रैवप्रसवःसुत्या।संस्थासमाप्तिः।उत्थानंक्लासंप्रस्त्र
वणंप्राप्योत्थानमित्यादि।हविषामेतावत्त्वमियत्ता।हविषामेवोच्चैष्ट्वमुपांशुत्वंच।हविषां ७८
चानुपूर्व्यंदेवतानांक्रमः।एतत्सर्वमध्वर्युप्रत्ययं।छंदोगप्रत्यययानामध्वर्युप्रत्ययानांसताम

स्मच्छास्त्रेयदभिधानं तस्येदं प्रयोजनं। यद्यस्मच्छास्त्रे विशेषविधिः। तेषां सामान्यविधिस्तदाऽ
स्मदीय एव विधिः संग्राह्य इति प्रयोजनं। एतेभ्य एवाहोभ्योऽहीनैकाहान्पश्चात्तरान्व्याख्यास्या
मः। यान्येतानि पंचविंशतिरहान्युपदिष्टानि एतेभ्य एवाहोभ्योऽहीनैकाहान्व्याख्यास्यामः। प
श्चात्तरानिति तरप्प्रत्ययो ब्रह्मचारि[illegible]धर्मव्यवहितत्वात्सिधेरहोभिरहामिति देश इत्यस्मि
न्सूत्रेऽयमेवार्थो वक्ष्यते। तत्किमर्थमयमेवार्थ[illegible] उच्यते। तस्येदं प्रयोजनं। एतद्धि
दं ब्रह्मचारिणामित्यत्रैतच्छब्देनाहीनैकाहानामपि ग्रहणार्थं। इतरथा तेषामसंनिधानादे
तच्छब्देन तेन गृह्येरन्। अतस्तदर्थमत्राप्युक्तं॥ १२॥ एतद्धीदं ब्रह्मचारिणमनिराकृतिनं सं
वत्सरावमं चारयित्वा व्रतमनुयुज्यानुक्रोशिने प्रब्रूयादुत्तरमहः। यान्येतानि महाव्रतव
र्ज्यन्युक्तानि तान्यहानि तानि मंत्रब्राह्मणसूत्राध्ययनेन तदर्थज्ञानेन च विदित्वा तेषां महा

सं०गृ०उ२ मेकाहाहीनसत्राणांसत्रभावंचयोवेदसएवैतद्विदिष्यति। ब्रह्मचारिग्रहणंयोब्रह्मचारीवि
८० द्यांसमाप्यस्नानंकर्तुंनशक्नोति द्वादशवर्षाण्यध्ययनंकुर्वन्नपिनाकिंचिद्ग्रहीतुंश क्नोतितम
पिब्रह्मचारिणमनेनतद्विदमध्येतानिग्राहयित्वाएतान्वेदभागानध्याप्याश्रमंस्वसामर्थ्यानुगु
णंप्रवेष्टुंशिक्षेत्येवमर्थः। अनिराकृतिनंअनुत्सृष्टाध्ययनं। एवंविधंब्रह्मचारिणंव्रतंग्रा
हयित्वासंवत्सरावमकालंचारयित्वाततस्तस्मैब्रह्मचारिणेनुक्रोशिनेआत्मगुणयुक्ता
योत्तरमहर्महाव्रतंब्रूयात्। प्रथमंब्रूयादित्यर्थः। अहरधिकारेपुनरहोग्रहणस्येदं प्रयो
जनं। तदहर्विधायकंवेदभागमर्थावगमनपर्यंतमनुष्ठानयोग्यंग्राहयितव्यमिति। महा
नाम्नीरग्रे। महाव्रतानुवचनात्पूर्वंमहानाम्नीभ्योव्रतादेशनादिश्रवणांतंकृत्वानंतरेसंवत्स ८०
रेमहाव्रतंग्राहयितव्यं। ततोनंतरेसंवत्सरेउपनिषदइतिक्रमः। उदगयनेपूर्वपक्षेश्रोष्य

न्वाहिर्याः मात्स्थालीपाकंतिलमिश्रंश्रपयित्वाचार्यायवेदयीत।आचार्येणानुक्तंश्रोष्यन्ब्रह्म
चारीउदगयनआपूर्यमाणपक्षेग्रामाद्बहिर्निष्क्रम्यशुचौदेशेहोष्यन्धर्मेयापार्वणवत्तिलमि
श्रंस्थालीपाकंनवभ्योदेवताभ्यस्स्रुच्यानिनिर्वापप्रोक्षणेकृत्वाश्रपयेत्ततआचार्यायवेदयी
तविज्ञापयीतेत्यर्थः।विदितेव्रतसंशयान्स्पृष्ट्वालघुमात्राच्चेदापत्कारितास्सुरन्वारब्धेजुहु
यादग्नावग्निश्चरतिप्रविष्टऋषीणांपुत्रोअधिराजएषः।तस्मैजुहोमिहविषाघृतेनमा
देवानांमोमुहद्भागधेयंमोअस्माकंमोमुहद्भागधेयंस्वाहा।यातिरश्चीनिपद्यतेहंविधर
णीइति।त्वाघृतस्यधारयायजेसंराधनीमहंस्वाहा।यस्मैत्वाकामकामायवयंसम्रा
ड्यजामहे।तमस्मभ्यंकामंदत्त्वाथेदंत्वंघृतंपिबस्वाहा।अयंनोअग्निर्वरिवःकृणोत्वयंमृ
धःपुरएतुप्रभिंदन्।अयंशत्रूञ्जयतुजर्हृषाणोयंवाजंजयतुवाजसातौस्वाहा।अस्त्यस्मै

स०प्र०उ२ चानुमत्यै च स्वाहा। प्रदात्रे स्वाहा। व्याहृतिभिश्च पृथक्। विहितँश्रृतस्थालीपाक इत्यवगते व्रतसं ते
८१ शयाद्व्रतापराधान्मृछेत्। ते यदि पृष्टाः लघुमात्रात्कारणात्प्रवृत्तिनिमित्तादापदा कारितश्चे
181 दग्नावग्निरित्यादिभिर्जुहुन्न प्रायश्चित्तांतरं कर्तव्यं। अथ चेद्गुरुप्रमाणं प्रवृत्तिकारणं बुद्धि
पूर्वं वा करोति अपराधातत्तदनुरूपं प्रायश्चित्तं कारयित्वा पुनर्व्रतमादिश्य ततः संवत्सरे
पूर्णे एवं श्रावयेद्विदित इति वचनं। श्रृतस्थालीपाक इति विदित एव व्रतसंशये प्रश्नप्रवृत्त्य
र्थं। अन्वारब्धे ब्रह्मचारिणि आचार्यो जुहुयात्। अग्नावग्निरित्येवमादिभिरत्रैव पठितैर्मं
त्रैर्व्याहृतिभिश्च पृथगिति समस्तव्याहृतिनिवृत्त्यर्थं। हुत्वाहेतं स्थालीपाकं सर्वमशानेति
।हुत्वेति वचनमेतैर्मंत्रैर्हुत्वा स्विष्टकृतेवदायतमहुत्वैव निधाय ब्रूयात्संप्रेषितव्यमित्येव ८१
मर्थं। एतं स्थालीपाकं सर्वमशानेति संप्रेषः। ततश्चरुशेषं ब्रह्मचारी सर्वमश्नीयात्। भुक्तवं

तमपामंजलिपूर्णमादित्यमुपस्थापयेत्त्वं व्रतानां व्रतपतिरसि व्रतं चरिष्यामि तच्छकेयं तेन

शकेयं तेन राध्यासमिति। मुक्तवंतमिति वचनं न केवलमशने संप्रेषएव। अशनमपि कर्त

व्यमेवेत्येवमर्थं। उपस्थापयेदित्यत्र पतिष्ठस्वादित्यमिति ब्रूयादित्यर्थः। ततो ब्रह्मचार्यञ्जलिः

पूर्णाञ्जलिना मंत्रेणादित्यमुपतिष्ठेत। समाप्य संमील्य वाचं यच्छेत्कालमभिसमीक्षमाणो

यदा समयिष्यास्याचार्येण। समाप्य च उपस्थानमंत्रं समाप्यानंतरं संमील्य वाचं यच्छेन्नका

लविक्षेपं कुर्यादित्येवमर्थं। वाग्यमनं कुर्वन्नस्मिन्काले आचार्येया सह समवायो भवे

त्तं कालं मनसाध्याय वाग्यमनं कुर्यात्। अयं स काल इत्याह। एकरात्रमध्यायोपपादनात्।

एकरात्रं कालमेवासित्वा तदनंतरे दिवसे आचार्येण सह समवायं गमिष्यामीति ध्यायेत्।

कुतः अध्यायोपपादनात्। अध्यायः स्वाध्यायः महानाम्नीमंत्र इत्यर्थः। तस्योपपादनात्।

स० गृ० ३२ उपवादनं अन्यमुपेत्य तस्याध्ययनस्य वा। दनं शिष्यमुपादाय अध्यापनमित्यर्थः। एतदुक्तंभ
८२ वति। य एकरात्राध्ययनेन महानाम्नीः अध्येतुं शक्नोति स एकरात्रं ध्यायन्वाग्यमनं कुर्यादिति
82 । त्रिरात्रं वानित्याध्यायेन। त्रिरात्रं वैव मासीत। यो नित्याध्यायेनाध्येतुं शक्नोति। अध्ययनम
नित्यमध्यायः। ध्यायः नित्यं संततमित्यर्थः। एतदुक्तंभवति। यो बहुभिर्वाहोभिरध्येतुं शक्नोति सा त्रिरात्र
मेवासित्वा चतुर्थेहन्याचार्येण समवायं गच्छेदित्यर्थः। तमेव कालमभिसमीक्षमाणा आ
चार्योहतेन वाससा त्रिः प्रदक्षिणं शिरः समुखं वेष्टयित्वाहेतं कालमेवंभूतो स्वपन्भवेति।
तमेव कालं प्रतिपद्यमान आचार्यो यः कालो ब्रह्मचारिणा संकल्पित इत्यर्थः। अहतेना
निवसितेन धौतेन तद्वासः पतेत्तथोपायं कृत्वा ब्रूयादाचार्यः। एतं कालमिति संकल्पि ८२
तप्रदर्शनार्थत्वादेकरात्रं कालं एवंभूतो स्वपन्भवेति त्रिरात्रं कालमिति वा। तं कालमस्व

पन्नासीतायः संकल्पितः कालः तस्मिन्काले सर्वदा स्वपन्भवेत् ब्रह्मचारी। ततः स्वि
ष्टकृदादि होमशेषं समापयेत्। अनुवक्ष्यमाणे पराजितायां दिश्यग्निं प्रतिष्ठाप्यास्मिमु
दकमंडलु मध्मानमित्यक्षत्तरतोग्नेः कृत्वा वत्सतरीमत्यगुदगसंश्रयं योव्रं। आचार्याय
वेदयीतेति शेषः। द्वितीये चतुर्थेवादिवसे प्राप्ते आचार्योनुवक्ष्यति तस्मिन्ननुवक्ष्यमाणे
सति। अपराजितायां दिशि बहिर्ग्रामाद्धुचौ देशे उल्लेखनादि कृत्वाग्निं प्रतिष्ठाप्य तस्योत्त
रतः। अस्मादीन्निधाय तस्यैव प्रत्यगुदग्योदेशः तस्मिन्वत्सतरीं बध्नाति। यथाग्निसमीप
उच्यमानः शब्दो वत्सतर्या न सम्यक् श्रूयते तथा बध्नीयात्। एतावत्कर्म ब्रह्मचारिणः स्वभ
तः कश्चित्करोति। एतावति कृते आचार्याय वेदयीत। पश्चादग्नेराचार्यस्तृणेषूपविशेदप
राजितां दिशमभिसमीक्षमाणः। एवं प्रागग्रेषु तृणेषूपविशेत्। ब्रह्मचारी लेपान्परिमृ

ध्वा

स०वृ०उ२ ज्यप्रदक्षिणमग्निमाचार्यंच कृत्वोपसंगृह्य पश्चादाचार्यस्योपविशेत्तृणेष्वेव प्रत्यग्दक्षि
८२ णाभिसमीक्षमाणः। मुखगतान्लेपान् शरीरगतांश्च शोधयित्वाग्निमाचार्यंच प्रदक्षिणं
८३ कृत्वाचार्यं विधिवदुपसंगृह्य पश्चादाचार्यस्योपविशेत्तृणेष्वेव प्रागग्रेषु प्रत्यग्दक्षिणां
दिशं अभिसमीक्षमाणः। पृष्ठेन पृष्ठं संधाय ब्रूयान्मनसा महानाम्नीर्भो ३ अनुब्रूहीति।
पृष्ठं नाम शरीरस्य बहिः प्रदेशः। ब्रह्मचारी स्वपृष्ठदेशेनाचार्यस्य पृष्ठदेशं संनिधाया
मंत्रं सित्वा मनसैवं ब्रूयात्। महानाम्नीर्भो ३ अनुब्रूहीति। पुनः पृष्टानुक्रोशिने संमील्यैवानु
ब्रूयात्सपुरीषपदाभिः। अस्मिन्नपि काले व्रतसंशायान् पृष्टा पूर्ववच्चेद्ब्रूयात्स्वयमपि सं
मील्यैवैताः पुनर्नवकृचः नवच पुरीषपदानि ताः सर्वाः त्रिरनुब्रूयात्। विदामघवन्निला ८२
द्यानवकृचः। एवाह्येवेवाहीत्यादीनि नवपुरीषपदानि च त्रिर्ब्रूयात्। अनुच्योन्मुच्यो

ब्यीष मादित्यमीक्षयेत्। मित्रस्यत्वा चक्षुषा प्रतीक्षे। मित्रस्यत्वा चक्षुषा समीक्षे इति का
राध्याकारे यास्त्वच्छेदः। सर्वत्रापि च प्रत्यययोगे आदित्यमुपतिष्ठस्व आदित्यमीक्षस्वापिं
डुमश्नानेत्येव मादिसंप्रैषं ब्रूयात्। मित्रस्य वश्चक्षुषानुवीक्षध्वं इति। दिशः ससंभाराः पुनरा
दित्यं मित्रस्यत्वा चक्षुषा प्रति पश्यामि यो स्मान्द्वेष्टि यं च वयं द्विष्मस्तं चक्षुषोर्हेतुर्ऋच्छत्वि
ति। भूमिमुपस्पृशेदग्न इळानम इळानम ऋषिभ्यो मंत्रकृद्भ्यो मंत्रपतिभ्यो नमो वो अस्तु
देवेभ्यः शिवा नः शंतमा भव सुमृळीका सरस्वति मा ते व्योम संदृशि। भद्रं कर्णेभिः शृणुया
म देवाः शंन इंद्राग्नी भवतामवोभिः स्तुषे जनं सुव्रतं नव्यसीभिः कया नश्चित्र आभुवदिति
तिस्रः स्योना पृथिवी भवेति। समाप्य समानं संभारवर्जं। यदिदं महानाम्न्यध्ययनमुक्तं त
त्समाप्योत्तरयोरपि महाव्रतोपनिषदारण्ययोर्व्रते मनुयुज्य श्रावणां तं महानाम्नीव्रते नस

स्०वृ०३२ मानरूपं कर्तव्यं। अयमेतयोर्विशेषः। पूर्वस्मात्संभारवर्जमिति। संभारोनामश्रोष्यन्बहिर्ग्रामा
८४ दित्यारभ्यपुनरादित्यंमित्रस्यत्वाचक्षुषेत्येवमंतंवर्जयित्वेत्यर्थः। एतदुक्तंभवति। महाव्र
84 तोपनिषदाख्ययोर्व्रतमनुयुज्यश्रवणांतं संवत्सरादूर्ध्वंउदगयने पूर्वपक्षेग्रामाद्ब
हिर्गत्वाश्रवणमेवकर्तव्यं। नान्यद्धोमादीनि। एषद्वयोःस्वाध्यायधर्मः। स्वाध्यायधर्म
एषएवमहाव्रतोपनिषदोर्वेदभागयोरध्ययनविधिः। योमहानाम्नीनामध्ययनविधि
रुक्तः। व्रतमनुयुज्यसंवत्सरावमंचारयित्वोदगयने पूर्वपक्षेग्रामाद्बहिर्गत्वाचार्यस
काशात्त्रिःश्रुत्वानुप्रवचनीयंचकृत्वाततोध्ययनंकर्तव्यमिति। एतदनयोरप्यध्ययने
संपादनीयमित्यर्थः। आचार्यवदेकः। अयमपिविशेषोमहाव्रतोपनिषदोरध्ययनेभ ८४
वति। सएकोधीयीत शिष्यस्तदाचार्यवद्भूत्वाधीयीत। यथाचार्येपराजितांदिशमभिस

भीक्षमाणो ब्रूयात्। एवमेकश्चेच्छिष्यस्तामेव दिशमभिमुखोधीयीत। यदि द्वौ बहवो वा त
द्वानायं नियम आदरणीयः। अत एव ज्ञायते। एको द्वौ बहवो वाधीयीरन्निति। अध्ययन
एवायं नियमः। श्रावणे त्वेक एव। व्रतादेशनादेरनुप्रवचनीयां तस्य संस्कारस्य तन्त्रसिद्धौ
प्रमाणाभावात्। फाल्गुन्याद्याश्रवणाया अनधीतपूर्वाणामध्यायः। एषां महानाम्न्यादी
नामध्ययनकाल उच्यते। श्रवणमात्रमेव कृत्वा पूर्वमनधीतवन्तो ये तेषामयं कालः॥
फाल्गुनमासमारभ्या श्रावण्याः पौर्णमास्याद्यः कालः स तेषामध्ययनकालः। तेष्वाध
धीतपूर्वाणामधीतपूर्वाणां। येधीतपूर्वास्ते तस्मिन्काले धीयीरन्। श्रावणीपौर्णमासी
परावधिः। तैषीपौर्णमासी पूर्वावधिर्यस्य कालस्य स काल इति॥१४॥ आश्वलायन
श्रौतसूत्रे नारायणवृत्तौ अष्टमोध्यायः॥८॥ श्रीरस्तु॥ ॥श्रीकाशीविश्वेश्वराय नमः।

सू० वृ० ३२ हरिः ॐ ॥ उक्तप्रकृतयोहीनैकाहाः । उक्तो ज्योतिष्टोमः एकाहाहीनसत्राणां प्रकृतिभूतः । उ
८५ क्तानि पंचविंशतिरहानि सात्रिकाणि । एतेभ्य एव । सात्रिकेभ्योहोभ्योहीनैकाहान् व्याख्यायं
85 त इत्युक्तं । इदानीं तानेकाहाहीनान् । वक्तुकामेनाचार्येण उक्तप्रकृतयोहीनैकाहा इत्युक्तं ।
तस्यायमर्थः । उक्ता प्रकृतिर्येषां त इमे उक्तप्रकृतयो हीनैकाहाः । प्रकृतिः प्रकारो नरूपां
तरमित्यनर्थांतरं ज्योतिष्टोमो हि । सर्वेषामेकाहाहीनसत्राणां प्रकृतिरिति प्रसिद्धांतद
तिदिष्टानि च सात्रिकाणि चतुर्विंशतिरहान्यहीनैकाहानां प्रकृतित्वेन इष्यंते । तदेतदुभ
यमस्मिन् सूत्रे प्रकृतिशब्देन गृह्यते । एतदुक्तं भवति । इत उत्तरं द्वयोरध्याययोरेकाहाही
ना वक्ष्यंते । ते च ज्योतिष्टोमसरूपाः । सात्रिकाहः । सरूपाश्चेति एतावत्सूत्रप्रयोजनं वक्ष्य ८५
माणानां संज्ञाकरणं । तेषां चोभयप्रकृतित्वकथनं चेति । अहीनशब्दस्य पूर्वनिपातः । पूर्वेण

पदेनसंधौक्रियमाणेप्रश्लेषलाभादक्षरलाघवार्थः।सिद्धैरहोभिरह्नामतिदेशः।एकाह
हीनावक्ष्यंतइत्युक्तं।तेचोभयप्रकृतयइत्युक्तं।तत्रानेनसूत्रेणसात्विकप्रकृतीनांलक्षण
मुच्यते।एकाहाहीनेषुयेषामह्नांप्राकृसिद्धैरहोभिःइतिदेशोस्तितानिसात्विकाहाः।प्रकृती
नि।अहोभिरह्नामतिदेशइत्येतावत्युक्तेपिप्राकृसिद्धैरेवसात्विकेइतिदेशइतिगम्यतएव।
किमर्थंसिद्धैरित्युच्यते।ततस्येदंप्रयोजनं।यत्रवक्ष्यमाणंकर्मप्राकृसिद्धाहस्तन्नामनामि
तयावक्ष्यंतेनेनेदमित्यदेशोवचनंनास्ति।तत्रापितन्नामनामितयेवतत्प्रकृतित्वज्ञापनार्थं।
तेनैवंसूत्रार्थः।अत्रवक्ष्यमाणामह्नांविधानावस्थायामेवप्राकृसिद्धैरहोभिर्ग्रहणं।क्रिय
तेतन्नामनामितयासिद्धस्यतुत्तरकालंवायत्रातिदेशवचनंअस्त्यनेनइदमिति।तत्रोभयत्रा
पितान्येवप्रकृतिरितिसूत्रार्थः।अह्नामितिवचनंसुत्यानामेवायमतिदेशोनदीक्षोपसदामि

सू०वृ०उ०

८६ दो

सेवमर्थं। तेनैषु दीक्षोपसदः स्वकीयया एव नियमेन भवंतीति सिद्धं। अनतिदेशे त्वेकाहज्यो
ज्योतिष्टोमो द्वादशशतदक्षिणस्तेन शस्यमेकाहानां तत्रैकाहज्योतिष्टोमो द्वादशशतदक्षि
णा इत्येतावता प्रागुक्तस्य चतुः। संस्थस्य सोमयागस्यानुवादं कुर्वन्नप्राप्तानां नामाहः। सं
बंधं दक्षिणाविशेषसंबंधं न्वाविदधाति सूत्रस्योत्तरया भागेनैकाहानां मध्ये ये सात्रिके
रहोभिर्नातिदिश्यंते तेष्वेकाहेष्वेवाविशिष्टे च ज्योतिष्टोमे नातिदेशो विधीयते। अनतिदे
श इति वचनं एकाहेषु यावंतो तिदेशविधयस्तेष्वहः स्वेवा[illegible]स्य विधेः। प्राप्तिप्रदर्शना
र्थं। तेनानिरुक्तादिष्वपि ज्योतिज्योमप्राप्तेरपवाद एव चतुर्विंशादीनां अवयवातिदेश
इति सिद्धं। तुशब्दो विशेषविध्यर्थः। एकाहेष्वयं विशेषो भवति। ज्योतिष्टोमप्राप्तस्यापवा ८६
दः। सात्रिकातिदेश इति। शस्यग्रहणं वचनांतरानयोदितधर्मप्रदर्शनार्थं। तेन दीक्षोपद

86

ऐकाहिका एव भवंति। न ज्योतिष्टोमिका इति सिद्धं। गो आयुषी विपरीते त्र्यहानां अनतिदे
शवचनं अहीन [illegible] न त्र्यहनिहत्यर्थः। तत्राहाः संख्याः संख्याताः षडहांता अभिप्लवाद्विल
तिदेशवचनमस्तितेन एकाहत्र्यहा वरुणप्रघासस्थाने त्र्यहः। द्वयोर्मासयोर्व्युष्टित्र्यह इत्यु
दाहरणं बहुवचनमसमाम्नातत्र्यहप्रदर्शनार्थं। त्र्यहाणां पृष्ठ्यत्र्यहः। पूर्वः अभिप्लवत्र्य
न होवा। पूर्व इति शेषः। अत्राप्यतिदेश इति वर्तते। अनतिदेशवचनस्य बहुवचनस्य च पू
र्ववदेव प्रयोजनं। एवं प्रायाश्च दक्षिणा अर्वाग् अतिरात्रेभ्यः। एवं प्राया इति द्वादश [illegible]
[illegible] शतप्राया इति गम्यते
। प्रकृतत्वादस्मिन्नेव प्रकरणे अतिरात्रवचने ज्योतिरादयोऽतिरात्रा गृह्यन्ते। बहुवचनानि न
र्देशात्तेनायमर्थः। ज्योतिरादिभ्योऽतिरात्रेभ्यः। अर्वाग्ये एकाहाः। अहरंतरे यातिदिष्टा अनति

सू०वृ०उ३ दिष्टाश्चते सर्वे द्वादशशतदक्षिणा वेदितव्याः। प्रायवचनमन्वहं पंचाशच्छो दक्षिणा सोमचम
८७ सो दक्षिणेत्येवमाद्यादिभिर्विशेषविहिताभिरसमुच्चयार्थं। साहस्रास्त्वतिरात्रः। तुशब्दो वा
87 गपि ज्योतिरादिभ्यो योतिरात्रस्तस्यापि सहस्रदक्षिणात्वप्रापणार्थं। द्व्यहास्त्र्यहाश्च। अर्वा
गतिरात्रेभ्य इत्यनेनानतिदेश इत्यस्यानिवृत्तत्वादस्मिन् सूत्रे हीनैकाहद्व्यहास्त्र्यहाश्च सह
स्रदक्षिणा वेदितव्याः अतएवोत्तरे सूत्रे अहीनग्रहणं कृतं। ये भूयांसस्त्र्यहादहीनाः स
हस्रं तेषां त्र्यहे प्रसंख्यायान्वहं ततः सहस्राणि। त्र्यहात्। भूयांसो ये हीनाश्चतुरहादयः। ते
षु दक्षिणा परिमाणाज्ञानमनेनोपायेन क्रियते। आदितस्त्र्यहे सहस्रमिति कृत्वा ततः
परतो यावंत्यहानि तेषु प्रत्यहं सहस्रमिति कृत्वा चतुरहे सहस्रद्वयं पंचाहे सहस्रत्रयं ष ८७
ळहे सहस्रे चतुष्टयमित्येवसहस्रचतुष्टयं परिमाणक्लृप्तिः। समावत्येव दक्षिणा नयेयुः।

समावदितिसमित्यर्थः। दक्षिणापरिमाणज्ञानोपायउक्तः। तासांनयनेयंविशेषः। यस्मिन्न
हीनेयावत्योदक्षिणाप्राप्ताः। ताःसमंविभज्यएकैकंभागमहन्यहनिदद्यात्। अतिरिक्तास्तू
त्तमेधिकाः। एवंसमविभागेक्रियमाणेयाअतिरिच्यंतेताउत्तमेहनिदातव्याः। अधिकाइ
तिवचनात्। स्वभागलब्धाभिः। सहदातव्याइतिगम्यते। अतिदिष्टानांस्तोमपृष्ठसंस्थान्य
त्वादनन्यभावः। यान्यहानिस्तोमपृष्ठसंस्थान्यत्वादनन्यभावः। यान्यहानिस्तोमपृष्ठसं
स्थादिभिः। सहसंबंधान्येवोत्पत्तिभूमावुत्पन्नानीतिजातियदिकदाचिदतिदिष्टानितेषुचा
तिदिष्टेषुछंदोगवशादध्वर्युवशाद्वास्तोमादीनामन्यत्वंयदिस्यात्तथाप्यस्माकंतान्येवा
हानीतिकृत्वाशास्यकल्पनंभवतीत्यर्थः। वेदाद्येवोत्पत्तिभूमावुत्पन्नानीत्यर्थः। नित्यानैमि
त्तिकाविकाराः। स्तोमादीनामन्यत्वेपिअह्नामन्यत्वंनास्तीत्युक्तं। तथापिस्तोमादिनिमित्ता

स०ह०उ२ येनैमित्तिकाविकाराःतेनित्याः।तेष्वप्यहःसुकर्तव्याइत्यर्थः।माध्यंदिनेतुहोतुर्निष्केवल्येस्तोम
८८ कारितंशस्त्रं।माध्यंदिनेतुसवनेहोतुरयंविशेषोभवतिनिष्केवल्येस्तोमकारितमेवशस्त्रंभ
८८ वतिनिष्केवल्यमरुत्वतीययोः तत्रपूर्वोक्तंयावत्योयावत्यःकुशानांनवतोदृशतोस्येनेनन्या ३
येन।सूक्तावापःसूक्तोद्धारोवाकर्तव्यइत्यर्थः।निष्केवल्यमरुत्वतीययोर्मध्यंदिनशब्देनैव
ग्रहणेसिद्धेपिसवनवाचिनोमाध्यंदिनशब्दस्यग्रहणंसोमातिरेकनिमित्तेपिशस्त्रेनिष्के
वल्यस्तोमकारितशस्त्रस्यप्रापणार्थं।तत्रतुऋग्भिरेवनिष्केवल्यस्तोमकारितशंसनं
स्वस्तोमातिशंसनंचकर्तव्यं।नसूक्तेन।यदिस्वस्तोमाधिकोनिष्केवल्यस्तोमस्तदा।तस्मा
दप्यतिशंसनंचकर्तव्यं।यदाहीनंतदस्मादतिशंसनमितिनिष्केवल्येस्तोमकारितमि ८८
तिपाठःकर्तव्योननिष्केवल्यस्तोमकारितमिति।तत्रोपजनस्तार्क्ष्यवर्जमग्नेसूक्तानां।नि

ष्कैवल्यमरुत्वतीययोः निष्कैवल्यस्तोमकारितं शस्यमित्युक्तं तत्र स्तोमविवृद्धावुपजनस्थान
मुच्यते। निविद्धानीयानां पुरस्तादेवावापो भवतीत्यर्थः। तेषामपि निविद्धानीयत्वं भवति।
निष्कैवल्ये तु तार्क्ष्यं वर्जयित्वा निविद्धानीया[illegible]नामेव सूक्तानां पुरस्ताद्भवति। सूक्तानां पुरस्ता
द्विधाने क्रिय[illegible]माणे तार्क्ष्यवर्जमिति वचनात्तार्क्ष्यस्य पादग्रहणेपि सूक्तत्वं गम्यत एव सूक्ता
नामिति बहुवचनमविवक्षितं। यस्मिन्नहनि यत्सूक्तमवगतं तस्मात्पुरस्तादित्यर्थः। हा
नौ तत एवोद्धारः। स्तोमहानावपि नि[illegible]ष्कैवल्यमरुत्वतीययोरेकसूक्तत्वे यावत्स्तोयाव
त्स्य इत्यनेन न्यायेन सूक्तानां पूर्वं पूर्वमुद्धरेत्। असत्यपि हानाविति वचनेस्यार्थस्य सिद्धेस
त्यां हानाविति वचनं निष्कैवल्यमरुत्वतीयाभ्यामन्यत्रापि स्तोमहानौ सत्यामवगतस्यैव सू
क्तस्य पुरस्तादुद्धारो भवतीत्येवमर्थं। येर्वाक्त्रिवृतस्तोमास्तु स्तृचा एव तत्र सूक्तस्थानेषु।

स॰ वृ॰ उ ३ येत्रिवृतोवांगेकस्तोमाद्दयोष्टपर्यंतंतास्तेशुक्रियमायेषुसर्वेषुसवनेषुहोतुर्होत्रकाणांच
८९ सूक्तस्थानेषुसर्वेषुत्वचाएवकर्तव्याः।त्वचाएवेत्यवधारणमस्यविधेः।सर्वार्थत्वाय।य
89 थानित्यानिविदोभ्युदियात्॥१॥हानौततएवोद्धारइत्यनेनसूत्रेणसूक्तानांपुरस्तादुद्धा
रोविहितः।त्वचएवसूत्रस्थानेष्वित्युक्तं।तेनांत्यास्तृचागच्छंतइत्येवंप्राप्तं।एवंवचनसा
मर्थ्याद्द्वेत्वचेगच्छमानेयथानिविदोभवेयुः।तथातमेवांतंत्वचमभ्युदियात्।अभ्युप
गमयेदित्यर्थः।नित्यशब्देनात्रस्वरूपनित्यत्वंस्थाननित्यंचोच्यते।स्थानंचात्रएकांत्वचे
र्धायुग्मास्त्वित्यादिगच्छंते।एतदुक्तंभवति।हीनस्तोमेषुसूक्तस्यांत्यांचासूर्वास्त्वक्षधि स
यमाणास्तत्स्थानान्निविदमादायांत्येत्वचेसवनानुसारेयाएकांत्वचेर्धायुग्मास्त्वित्य ८९
नेनविधिनातांनिविदंपूर्वोक्तस्थानत्वेसिद्धेयंनित्यशब्देनपूर्वोक्तस्थानत्वंविदधाति॥

ना तत्स्थापयति। वचनैर्हि ते स्वस्थानं निविष्टो न जहातीति। तेन स्रुक्मुखीयादयस्तच्चाद्यधिहेतवो
पि निविष्टो न चालयंति स्वस्मात्स्थानादिति सिद्धं॥१॥ उक्तानि चातुर्मास्यानि। उक्तानि संकीर्त
नं वक्ष्यमाणेषु उपक्रमकालप्रभृति चातुर्मास्यशरीरस्य सर्वस्य पर्वसंबंधस्य संबंधस्य च।
प्राप्यणार्थं संज्ञार्थं च। सोमान्वक्ष्यामः पर्वणां स्थाने। संज्ञाप्रभृति चातुर्मास्यशरीरे सर्वस्मि
न्नाम्नो विशेष उच्यते। पर्वणां स्थाने सोमाः कर्तव्याः। अयूपकानेके ये पर्वस्थाने विहिताः
सोमास्तान्यूपकानूपरहितारनेके शाखिन इच्छंति। अपर्वसंबंधो यूपकानेव सोमः क
र्तव्यः। यथाग्निष्टोम ऐंद्राग्नस्थान इति। परिधौ पशुं नियुंजंति। अयूपके पशुसोमेषु परि
धौ पशुंनियोगः कर्तव्यः। तत्र दक्षिणो परिधावुत्तरो वा कर्तव्यो न मध्यमे उपचारविरोधा
त्तत्र यूपधर्मा न कर्तव्याः। एवं ह्यत्र वचनं परिधौ पशुं नियुंजंतीति। नैवं परिधिर्यूपो भवती

स०वृ०उ२ न्ति। तेन परिहित एव परिधौ पशुनियोगः कः कर्तव्यः। पशोरनपगमोपायस्तु कर्तव्य एव। वैश्वदे
८० व्यारूणे प्रथमं तृच्याहः। जनिष्ठा उग्र उग्रोजह इति मध्यंदिनः। ऐकाहिका होत्राः सर्वत्र प्र
थमसांपातिकेष्वहःस्वैकाहा भवन्ति। एतानि षड्डाहिकानि प्रथमसांपातिकानि तृच्याभि
९० प्लवयोः प्रथमे चतुर्थे च स्वरसामसु च प्रथमं छंदोमेषु प्रथममिति। एतानि षड्डाहिकान्ये
काहेषु यत्र यत्रातिदिश्यंते तत्र सर्वत्र माध्यंदिने सवने होत्रका ऐकाहिकशस्या भवंति।
ज्योतिष्टोमिकशस्या इत्यर्थः। अस्य प्रयोजनं मैत्रावरुणाछावाकयोः। सद्यो ह जात इत्य
स्य भूय इत्यस्य चानुधारः। इतरथा एवा त्वामिमामृष्वित्यनयोः। संपातयोः। संपातत्वेनो
त्यैकाहिकत्वेन च प्राप्तो तद्देवतमन्यं पूर्वस्य स्थान इत्यनेन न्यायेनैकाहिकयोः। पूर्वयोरु ८०
द्धार एव स्यात्। अतस्तन्निवृत्त्यर्थमैकाहिकवचनं। माध्यंदिनाधिकारान्माध्यंदिन एव

सवने यं विधिर्भवति। नेतरयोः सवनयोरिति सिद्धं। वैश्वानर पार्जन्ये हविषी अग्नीषोमीय स्य पशोः पशुपुरोळाशे न्वायातयेयुः। प्रातः सवनिकेषु पुरोळाशेषु वैश्वदेव्या हवींष्यन्वा यातयेयुः। वैश्वदेवः पशुः। अस्मिन्नहनि सवनीयः पशुः वैश्वदेवो भवति॥ बार्हस्पत्यान्नूबं ध्या। अनूबंध्यश्च पशुः बृहस्पतिदेवत्यो भवति। वरुणप्रघासस्थाने द्व्यहः। द्व्यहचोद नासु गो आयुषी विपरीते इत्युक्तं। उत्तरस्याह्नः प्रातः सवनिकेषु पुरोळाशेषु वरुण प्रघासहवींष्यन्वायातयेयुः। तयोर्युत्तरमहस्तस्येत्यर्थः। मारुतवारुण्यौ पशू। तयो रह्नोरह्नोर्यथासंख्येन इमौ पशू सवनीयौ भवतः। मैत्रावरुण्यनूबंध्या। द्व्यहानां प्रातर नुवाकात्पूर्वस्य तंत्रकांडस्य पत्नीसंयाजेभ्य उत्तरस्य तंत्रेणानुष्ठानसिद्धेरेकैव मित्राव रुण्या देवत्यानूबंध्या भवति। अग्निष्टोम ऐंद्राग्नस्थाने। योयं चातुर्मास्यांगभूतः ऐंद्राग्नः प

स्र०वृ०५३ शुद्धे यो मसियोरैन्द्राग्नः पशुः इति तस्य स्थाने ज्योतिष्टोमो [illegible]ग्निष्टोमः कर्तव्यः । ननिरू ने
०१ ढस्थाने । तस्यात्र प्रसंगाभावात् । सर्वास्वग्निष्टोमचोदना[illegible]स्र प्रकृतिभूतोग्निष्टोमसंस्थो ज्यो
91 तिष्टोमो गृह्यते अत्र विशेषवचनात्सवनीयान्त्वं ध्यावपि प्राकृतावेव । साकमेधस्थाने त्र्यहो
तिरात्रांतः । त्र्यहचोदनासु पृष्ठ्यत्र्यहः पूर्वोभिप्लवत्र्यहो वेत्युक्तं । सत्र्यहोतिरात्रांतः । साकमे
धस्थाने भवति । यस्य त्र्यहस्यांत्यमहरतिरात्रं भवति सत्र्यहोतिरात्रांतः । उत्तममहरतिरा
त्रसंस्थं भवति । इतरे तु यथाप्राप्तसंस्थे इत्यर्थः । द्वितीयस्याह्नोनुसवनं पुरोडाशेषु पूर्वे
द्युर्हवींषि । अस्य त्र्यहस्य द्वितीयमहः तस्मिन्ननुसवनं ये पुरोडाशाः तेषु साकमेधानां
यानि पूर्वेद्युरनुसवनं विहितानि हवींषि तानि यथासंख्यमन्वायातयेयुः । तृतीयेहन्यु ०१
पांश्वंतर्यामौ कृत्वा पौर्णदर्वं । प्रातःसवनिकेषु क्रैडिनं । अन्वायातयेयुरिति शेषः । अंत

माध्यंदिनेषु माहेंद्राणि ।
अन्वायातयेयुः ।

रेणाघृतयाज्ये दक्षिणे मार्जालीये पित्र्या। एअन्वायातयेयुरित्यनुवर्तत एव। अंतरेणाघृतया

ज्य इति तयोर्मध्य इत्यर्थः। तत्रोपस्थानं यथानतिप्रणीतमचरतां। अस्यामपि पित्र्यामनावृत्या

नतिप्रणीतचर्यायामिति वानावृत्योपस्थानं भवतीत्यर्थः। अनूबंध्यायाः पशुपुरोळाशआ

दिसमन्वायातयेयुः। अन्वायातयेयुरितिपुनर्वचनं सर्वत्रानुवृत्तिप्रदर्शनार्थं। परिसंख्या

तोनुवाद आश्रयितुं युक्त इति। आग्नेय्यैंद्राग्नैकादशिनाः पशवः। आग्नेय्यश्च ऐंद्राग्नश्च ए

कादशिनाश्च यथा संख्येनान्वहं सवनीयाः पशवो भवंति। सोर्यनूबंध्या। तत्रानुष्ठेयां गाव

सरगतत्वादेकैवानूबंध्या। अग्निष्टोमः शुनासीरीयायारस्थाने प्रातःसवनिकेषु शुनासी पुरोळाशेषु

रीयाया हवींष्यन्वायातयेयुः। अन्वायातयेयुरितीदमपि प्रदर्शनार्थमेवा। वायव्यः पशुः

। प्राकृतस्य सवनीयस्यात्र प्राप्तस्य देवतांतरं विधीयते। आश्विन्यनूबंध्या। इदमपि पूर्वव

स०सू०उ३ देवतांतरविधानं। अन्वहं पंचाशच्छो दक्षिणाः। यान्येतान्यष्टोक्तत्याहानि अनुक्रांतानि तेषा
९२ मेकैकस्मिन्नहनि पंचाशत्पंचाशद्गावो दक्षिणा दातव्याः॥२॥ अथ राजसूयाः। अथेत्यधिका
रार्थं। उत्तरत्र ये वक्ष्यंते सोमाः पाशव इष्टयः। ते सर्वे राजसूयसंज्ञा भवंति। न केवलं सोमा
92 एवेत्यधिकारप्रयोजनं। पूर्वत्र तु सोमा एव चातुर्मास्यसंज्ञा भवतीति तद्व्यपनेनैव सिद्धं। ६
पुरस्तात्फाल्गुन्याः पौर्णमास्याः पवित्रेणाग्निष्टोमेनाभ्यारोहणीयेन यजेत। या फाल्गुनी
पौर्णमासी तस्याः पुरस्तात्पवित्रसंज्ञकेनाग्निष्टोमप्रकृतिकेनाभ्यारोहणप्रयोजनेन य
ष्टव्यं। अस्य चारोहणप्रयोजनत्वाद्राजसूयानां तदेकदेशभूतानां चातुर्मास्यानामारंभा
र्थाय वैश्वानरपार्जन्याया अत्र निवृत्तिः। पुरस्तादिति वचनात्तस्मिं शुक्लपक्षे दीक्षोपसद ९२
श्च कर्तव्याः। पौर्णमास्यां चातुर्मास्यानि प्रयुंक्ते। फाल्गुन्यां पौर्णमास्यां चातुर्मास्यानि प्रयुं

केऽपारभंते वैश्वदेवं पर्वणी कर्तव्यमित्यर्थः। पवित्रेष्टौ वाभ्यारोहण्यास्यकृतत्वादत्र वैश्वानर
पार्जन्या न भवंति। नित्यानि पर्वाणि। यानि वैश्वदेवानि पर्वाणि तानि नित्यानि। न सोमचातु
र्मास्येष्विव परतंत्राणि इत्येवमर्थं। नित्यग्रहणं। चक्राभ्यां तु पर्वांतरेषु चरंति। चक्रशब्दे
न दर्शपूर्णमासावुच्येते। सौर्याचांद्रमसाविति केचित्। पर्वांतरेष्विति पर्वणामंतरालेष्व
न्यहानि तेषु चक्राभ्यां यागः कर्तव्य इत्यर्थः। अहर्विपर्ययं पक्षविपर्ययं वा। पर्वांतरेषु च
क्राभ्यां यागे कर्तव्ये हविर्विपर्ययं पक्षविपर्ययं वा कृत्वा चरेयुः। अहर्विपर्ययो नाम
एवं भवति। एकस्मिन्नहनि पौर्णमास्याः अपरस्मिन्नहनि अमावास्यायाः। पुनरपि पौ
र्णमास्याः पुनरप्यमावास्यायेति। पक्षविपर्ययो नाम कृष्णपक्षे पौर्णमास्याः शुक्लपक्षे मावा
स्यये त्येवं पुनरप्येवं। संवत्सरांते समानपक्षेऽभिषेचनीय दर्शपेयौ। संवत्सरांत इति संव

स०ह०उ३ त्सरस्य परस्तादित्येवमर्थः। एवं चातुर्मास्यैः संवत्सरे परिसमाप्यमाने फाल्गुन्यां शुनासीरी
८३ याग्येन संवत्सरपरिसमाप्तो भवति। तत उत्तरमेव कृष्णपक्षमतीत्यानंतरे शुक्लपक्षेभिषे
93 चनीयदशपेययो कर्तव्यो। पंचदश्यां प्रतिपदि वा दीक्षा चतुर्थ्यां पंचम्यां वा सुत्यमैरभि ह
षेचनीयस्य। ततः संसृपेष्टयः सप्ताहानि। तत एकादश्यां दशपेयस्य दीक्षा। पौर्णमास्यां सु
प त्यमहः एवं तौ समानं पक्षकृतौ भवतः। अध्वर्युवशाद्वा सह दीक्षणीयां तयोः। कृत्वा सोमक्र
याद्येव पृथग्भवति। उक्थ्यो बृहत्सामोभयसामाभिषेचनीयः। सोयमभिषेचनीय उक्थ्य
संस्थो भवति। बृहत्साम्नश्च उभयं च। निष्केवल्यस्तोत्रे बृहद्भवति। तस्य योनिर्निष्केवल्यस्य
स्तोत्रियो भवति। पवमाने रथंतरं भवति। तस्य योनिर्योनिस्थाने शंस्तव्य इत्यर्थः। संस्थिते म ८३
रुत्वतीये दक्षिणात आहवनीयस्य हिरण्यकशिपावासीनो भिषिक्ताय पुत्रामात्यपरिवृ

तायराज्ञेशौनःशेपमाचक्षीत।समासेमरुत्वतीयेनारब्धेनिष्केवल्यस्तोत्रेदक्षिणतआ
हवनीयस्यासीनंराजानंअभिषिंचति।अध्वर्यवः।तस्मैअभिषिक्तायराज्ञेपुत्रामात्यपरि
वृतायपुत्रपौत्रादिभिर्बंधुभिःपरिवृतायेअमात्यैःसुहृद्भिःपरिवृताय।अमात्यशब्देना
त्रराजकार्यप्रनिवोढारोमंत्र्यादयउच्यंते।तैश्चपरिवृतायेत्यर्थः।हिरण्मयःकशिपुःहि
रण्यकशिपुः।तस्मिन्नासीनोहोताशौनःशेपमाख्यानमाचक्षीतब्रूयादित्यर्थः।तच्चाख्या
नेब्राह्मणेत्रयस्त्रिंशोध्यायः।हरिश्चंद्रोहवैधसइत्यादितंसर्वमाचक्षीतेत्यर्थः।हिरण्यक
शिपावासीनआचष्टेहिरण्यकशिपावासीनःप्रतिगृणातियशोवैहिरण्यंयशसैवैनंतत्स
मर्धयति।होतुरासनविधानमुत्तरार्थं।अध्वर्योरासनं।अस्माभिरविधेयं।अतउभयोः
संकीर्तनंस्तुत्यर्थमेव।यस्माद्यशोहिरण्यंतस्मादेनंराजानंयशसासमर्धयतिहोताअध्व

स०ह०उ२ युश्च। हिरण्मयासनं हिरण्यसंबंधादित्यर्थः। ॐमित्यृचः प्रतिगर एवं तथेति गाथाय। एवमि
९४ ति नायं प्रतिगरः प्रतिगरावयवो वा तस्मादेवमर्थः। यथा ॐ शब्दः ऋक्षु प्रतिगरो भवति।
एवमेव तथाशब्दो गाथासु प्रतिगरो भवतीति। अस्मिन्नाख्याने कस्मिन्नूनमित्येवमाद्या
94
ऋचः। यन्विमं पुत्रमिच्छंतीत्येवमाद्या गाथाः। सर्वत्र ब्राह्मणजाः श्लोकाः गाथा इत्युच्यंते।
ऋचां गाथानां च प्रतिगरविधानात्। ब्राह्मणवाक्येषु प्रतिगरो नास्तीति। हरिश्चंद्रो ह वै
धस इत्यारभ्य स ह नारदं पप्रच्छेत्येवमंतमुक्त्वावसाय। यन्विममित्यारभ्य नारदेत्येवमं
तमुक्त्वावसिते तथेत्यध्वर्युः प्रतिगृणाति सर्वत्र च गाथांते ऋगंते च प्रतिगरो भवति ना
न्यत्र। ततः स एकया पृष्टो दशभिः प्रत्युवाचेत्यंतं ब्राह्मणवाक्यमुक्त्वावसाय दश गाथा ०४
ब्रूयात्। दशकृत्वश्च प्रतिगृणाति। एवं सर्वत्राचष्टे प्रतिगृणाति च। ॐमिति वै दैवं तथे

तिमानुषं दैवेनचैवैनंतन्मानुषेणचपापादेनसः प्रमुंचति। ॐमितिवैदैवमिति। दैवश
ब्देनवैदिकत्वमुच्यते। ॐमितिवैदिकवचनमिदमनुज्ञावचनामित्यर्थः। तथेतिमानुषंमा
नुषमितिलौकिकमिदमनुज्ञावचनमित्यर्थः। ताभ्यांवैदिकलौकिकाभ्यांॐतथाशब्दा
भ्यांप्रतिगरभूताभ्यांएनंराजानंपापादेनसःप्रमुंचतिपापशब्देनात्रमहत्पापमुच्यते॥
एनःशब्देनाल्पंमहतश्चपापादल्पाच्चपापात्प्रमुंचतीत्यर्थः। तस्माद्योराजाविजितीं
स्यादप्ययजमानआख्यापयेतैवैतच्छौनःशेपमाख्यानंनहास्मिन्नल्पंचनैनःपरिशिष्यते
ते। यस्मादेतदाख्यानंॐतथेतिशब्दप्रतिगरयुक्तंमहतोल्पाच्चपापात्प्रमुंचतितस्मा
दयंयजमानोपिराजायःपरबलंयुद्धेनविजितवान्। तदेतच्छौनःशेपमाख्यानमाख्या
पयेतैव। एवमाख्यापयतेराजातस्मिन्नाजनिमहदल्पमपिएनोनपरिशिष्यते। चनरा

श्रौ०सू०३ ह्नोऽप्यर्थे वर्तते। सहस्रमाख्यात्रे दद्यात्। होत्र इत्यर्थः। शतं प्रतिकरित्रे। अध्वर्यव इत्यर्थः। यथा
८५ स्वमासने। यद्यस्य स्वं यथा स्वं तत्तस्य यथा स्वमासने च दद्यात्। यद्यस्य स्वं तत्तस्मा इत्यर्थः।
अस्मिन्प्रकरणे ब्राह्मणानुवादात्। न्यूनाधिकचोद्यं नास्ति। संसृ पेष्टिभिश्चरित्वा दश
95 पेयेन यजेत। संसृपेष्टयो नाम सप्तेष्टयः। आग्नेय्याद्याः। ताभिः सप्ताहं चरित्वा दशपेये
न यजेत। दशपेयो नाम यज्ञक्रतुः। तत्र दश दशैकैकं चमसं भक्षयेयुः। तत्र दशपेये
एकैकं चमसं दश पुरुषा भक्षयन्ति। नित्यान्प्रसंख्यायेतराननुप्रसर्पयेयुः। प्रकृतौ यं च
मसं ये भक्षयन्ति वषट्कारेण होमाभिषवाभ्यां समाख्यया वान्येन वा कारणेन ते नित्या
इत्युच्यन्ते। तान्प्रसंख्यायास्मिन्नियन्त इति इतरान्पुरुषान्प्रतिचमसमनुप्रसर्पयेयुः। ८५
ये पुरुषा अनुप्रसर्पन्ति त एवंलक्षणा इत्युच्यन्ते। ये मातृतः पितृतश्चोभयतो ये दशपु
ये मातृतः पितृतश्चेति दश पुरुषं समनुष्ठिता विद्यातपोभ्यां पुण्यैश्च कर्मभिर्येषामुभयतो नाब्राह्मण्यं निन
येयुः। १२

वाः पुरुषाः। ते विद्यया तपसा पुण्यैः कर्मभिः प्रतिसिद्धवर्जितैश्च युक्ताः सम्यगनुष्ठितवंतो
वैदिकं पंथानं अपि च। अब्राह्मण्यं नानिनयेयुः निश्चयेनाब्रह्मण्यं न गमयेयुः। अब्राह्म
ण्यगमनं नाम श्रद्धायामपत्योत्पादनमित्युच्यते। विद्या नाम षडंगो वेदः। तदर्थज्ञानं च। त
पो नाम श्रौतस्मार्तकर्मा[illegible]नुष्ठानं। पुण्यकर्म नाम प्रतिषिद्धवर्जनं। तानेवंविधान्पुरु
म षाननुप्रसर्पयेयुः। एतदुक्तं भवति। मातृ[illegible]तः पितृतश्चो यतः पूर्वे ये दश पूरुषाः। ते षडंग
वेदाध्ययनेन तदर्थज्ञानेन च श्रौतस्मार्तकर्मानुष्ठानेन च प्रतिषिधवर्जितेन च युक्ताश्च
श्रद्धायामपत्योत्पादनं चाकृतवंतो येषां पुरुषाणां तानेवंविधान्पुरुषाननुप्रसर्पयेयुः। द
श पुरुषमिति दश पुरुषा इत्यर्थः। तच्च पूर्वपुरुषविशेषणं। तेषामेवोद्देशकं ये इत्येतत्सर्वं
येषामित्येतत्संसर्पयोजिघृक्षितानां पुरुषाणां विशेषणं। उभयतो मातृतः पितृतश्चेत्यर्थः।

सू०वृ०उ२ पितृत इत्येके। एके आचार्याः पितृत एव एतल्लक्षणमिच्छंति। न मातृतोपीति। नवग्वासः स्त
९६ सोमास इंद्रं सखा हृयत्र सखिभिर्नवग्वैरिति निविद्धानयोराद्ये। दशपेयस्य निष्केवल्य
९६ मरुत्वतीययोर्निविद्धानीययोराद्ये अधिके एते ऋचौ भवतः। सूक्तमुखीये इत्युक्ते एते प्र
तीयात्। एते इति एतत्स्थाने उक्ते इत्यर्थः। उत्तर आपूर्यमाणपक्षे केशवपनीयो बृहत्स्तो
तिरात्रः। दशपेये कृते य उत्तरः। शुक्लपक्ष आगच्छति वैशाखः। तस्मिन्केशवपनीयो नाम
एकाहः कर्तव्यः। स च बृहत्पृष्ठोतिरात्रसंस्थश्च भवति। द्वयोर्मासयोर्व्युष्टिद्व्यहः। केशव
पनीयादूर्ध्वं द्वयोर्मासयोर्यः शुक्लपक्षः आषाढः तत्र व्युष्टिद्व्यहो नाम द्व्यहः कर्तव्यः। त
स्य द्व्यहस्य गो आयुषी विपरीते इत्यतिदेशे उक्तः तत्रैवं विशेषो वक्ष्यते। अग्निष्टोमः पूर्वम ९६
हः। सर्वस्तोमोतिरात्र उत्तरं सहः। तत्सर्वस्तोमोतिरात्रसंस्थं भवति। तस्य द्व्यहस्य यत्सर्व

महस्तद ग्निष्टोमसंस्थं भवति। तस्यैव यदुत्तरसर्वस्तोमत्वात् षव्ठह स्तोत्रियावापाहीन

माण सूक्तानीत्येवमादयोधर्माभवंति। उत्तर आप्तूर्य पंक्षेस्य त्रस्य ध्वतिरग्निष्टोमः। शुक्लिद्वय

हाहूर्ध्वयः। शुक्लपक्षः श्रावणस्तस्मिन्नक्षत्रस्यधृतिर्नामएकाहः सचाग्निष्टोमप्रकृति

र्भवति। संस्थाचसैवभवति। संस्थाचसैवभवति॥ इतिराजसूयाः इतिशब्दः प्रकारवा

ची। एवंप्रकाराः सर्वेराजसूयाः बहवश्चाध्वर्यु विहिताराजसूयाः। इतिअस्मच्छास्त्र

विहिताश्चैकाहास्तेषांसर्वेषामयमेवप्रकार इत्यर्थः। न्यायकृप्ताश्च दक्षिणा अन्यत्रा

भिषेचनीयदशपेयाभ्यां। अस्मिन्विहितेराजसूयेपवित्रादयोयेसोमास्तेषुन्यायकृ

प्तोदक्षिणाविधिर्भवति। न्यामोनामेवंप्रायाश्चित्त दक्षिणा इत्येवमादिभिः सूत्रैर्विहिता

दक्षिणाप्रकारः चशब्दाध्वर्युविहिताश्च। अयंतु विधिरभिषेचनीयदशपेयाभ्यांमन्यत्रे

स्०वृ०उ३ वभवति। तयोस्तु वक्ष्यमाण एव दक्षिणाविधिर्भवति। नन्यायकृप्त इति एवमर्थः। पर्युदासः। अ
९७ भिषेचनीये तु द्वात्रिंशतं द्वात्रिंशतं सहस्राणि पृथङ्मुखेभ्यः। अभिषेचनीये त्वयं दक्षिणावि
97 धिर्भवति होत्रादिभ्यो मुखेभ्य एकैकस्मै द्वात्रिंशतं सहस्राणि ददाति। पृथग्ग्रहणं पृथक्कृ
त्य दातव्यमित्येवमर्थं। षोडश षोडश द्वितीयिभ्यः। अर्द्धिभ्य इत्यर्थः। अष्टावष्टौ तृतीयि
भ्यः। चत्वारि चत्वारि पादिभ्यः। सर्वत्र सहस्राणीत्यधिक्रियते। अर्धमस्यास्तीत्यर्धी एवं
द्वितीयी तृतीयी पादी च एषां संबंधिशब्दानां सिद्धवदभिधानात्। प्रकृतावप्येवं दक्षिणा
विभाग इति साधितं भवति। संसृपेष्टीनां हिरण्यमाग्नेय्यां वत्सतरी सारस्वत्यां मवध्वस्तः
सावित्र्यां श्यामः पौष्ण्यां शितिपृष्टो बार्हस्पत्यायामृषभ ऐन्द्र्यां महानिरष्टो वारुण्यां। संसृ ९७
पेष्टीनामयं दक्षिणाविधिर्भवति। हिरण्यमनियतसंख्यं सुवर्णं दद्यात्। वत्सतरीनामगो

जातौ स्त्री बालाविसृष्टमातृस्तना। अवध्वस्तः पांसुवर्णः श्यामो धूम्रवर्णः शितिपृष्ठः। कृ
ष्णपृष्ठः। ऋषभः। सेचनसमर्थः। महानिरष्टः। अदृष्टवया बलीवर्दः। सर्वे गोजातय एव
।दशपेयः भवंति। साहस्रो दशपेयः सहस्रदक्षिण इत्यर्थः। इमाश्चादिष्टदक्षिणाः। आदिष्टदक्षिणा
इति ऋत्विज आदिश्याऽऽदिश्य विहिता इत्यर्थः। चशब्दः सहस्रदक्षिणार्थाः या आदिष्टदक्षि
णानां समुच्चयार्थः। सौवर्णस्रगुद्गातुः। सुवर्णमयी मालेत्यर्थः। अश्वः प्रस्तोतुः। धेनुः प्र
तिहर्तुः। धेनुः सवत्सा दातव्या। अजः सुब्रह्मण्यायै। अजः सुब्रह्मण्याय इति सुब्रह्मण्याये
त्यर्थः। हिरण्यप्राकाशावध्वर्योः। प्राकाशौ प्रदीप्तौ कुंडले इति केचित्। तौ सुवर्णमयौ दा
तव्यौ। अध्वर्योरध्वर्यव इत्यर्थः। एवमत्र सर्वत्र चतुर्थ्यर्थे षष्ठी। राजतौ प्रतिप्रस्थातुः। रज
तमयौ प्राकाशावित्यर्थः। द्वादश पष्ठौह्यो गर्भिण्यो ब्रह्मणः। पष्ठौह्यः पंचवर्षास्ता गर्भि

रुक्मोहोतुः।

स्०२५३ णीर्दद्यात्॥ वशा मैत्रावरुण्यास्य। प्रजननासमर्था। रुक्मोनाम आरंभणविशेषोवृत्ताकारः। ऋष म
९८ भोक्षा त्वष्टा छंसिनः। कार्पासंवासः पोतुः। क्षोमीवरासीनेष्टुः। क्षौमीतसीशाटी वरासीरघूला।
एकयुक्तंयवाचितमच्छावाकस्य। एकेनानडुहायुक्तं पूर्णंशकटमित्यर्थः। अनड्वानाग्नी
ध्रस्य। अनोवहनसमर्थोबलिवर्दोनड्वान्। वत्सतर्युन्नेतुः। त्रिवर्षः सांडोग्रावस्तुतः॥
त्रीणिवर्णयस्यवयःसत्रिवर्षः। सांडः अंडाभ्यां सहितः। नानंडोनभग्नांड इत्यर्थः॥ ७॥
उशानसस्तोमेनगरगीर्णमिवात्मानंमन्यमानोयजेत। उशनसस्तोमेनाम एकाहः पुनस्तो
मइतिचास्यैवसंज्ञा। गरोविषं गरोगीर्णोयेनसगीर्णः। योबहुप्रतिग्रहादिनापापादिभ
याद्धात्मानंगरगीर्णमिवमन्यंतेसएतेनयजेत। उशनायत्सहस्येऽरयातंत्वमपोयद्वेतु ९८
र्वशायेतिसूक्तमुक्थीये। गोस्तोमभूमिस्तोमवनस्पतिसवानांनताअवरिष्णुककाटोअक्ष

तेन तान शंसति नद भाति तस्करो बल्लिथा पर्वतानां ह ल्लाचियावनस्पतीनं देवेभ्यो वनस्पते हवीं
षिवनस्पतेरशानयानिस्पृयेति सूक्तमुख्यायाः। गोस्तोमो भूमिस्तोमो वनस्पतिसवइति त्रय
एकाहाः कर्तव्या इत्येकोर्थोर्थात्कल्प्यते परस्कतेषामेताः षड्ऋचः सूक्तमुख्याया एकैक
स्य द्वेद्वे भवत इति। देवेभ्यो वनस्पते हवींषीत्यनया साहचर्याद्वनस्पतेरशनयानिस्पृयेति
प्रेषजेवगच्छ्यते। आधिपत्यकामो ब्रह्मवर्चसकामो वा बृहस्पतिसवेन यजेत। अधिपते
र्भाव आधिपत्यं। तत्कामो ब्रह्मवर्चसकामो वा बृहस्पतिसवेनाम एकाहः तेन यजेत ब्रह्म
णो वर्चस्तेजः ब्रह्मवर्चसमित्युच्यते। ब्रह्मेति ब्राह्मण्यं वेदश्चोच्यते। तयोर्यद्वर्चस्तद्ब्रह्म
वर्चसं तत्कामो ब्रह्मवर्चसकामः। तस्य तच्चाः सूक्तस्थानेषु। तस्य बृहस्पतिसवस्य यानि
सूक्तस्थानानि होतुर्होत्रकाणां च तेषु सर्वेषु तृचा एव कर्तव्याः। तस्येति वचनं तस्य बृहस्पति

सू०वृ०उ२ सवस्यस्वभूतानिसूक्तरूपानानितेष्वेवायंत्वचत्वनियमः स्यात्। नागंतृनामित्येवमर्थं। तेना
९९ गंतृनांनिविदितिपत्तौप्राप्तानां। त्वचत्वनियमोनभवति। अग्निर्देवेषुराजतीत्याज्यं। यस्तस्तं
99 भयुंनेतयइतिसूक्तमुखीये। इंद्रमरुत्वइहपाहीत्यामुत्वेतिमध्यंदिने। उदुष्यदेवःसविताहि
रण्ययाघृतवतीभुवनानामभिश्रियेंद्रऋभुभिर्वाजवद्भिःसमुक्षितंस्वस्तिनोमिमीतामश्वि
नाभगइतिवैश्वदेवं। वैश्वानरंमनसाग्निंनिचाय्यप्रयंतुवाजास्तविषीभिरग्नयःसमिध्य
मग्निंसमिधागिरागृणा इत्याग्निमारुतं। होत्रकाउर्ध्वंस्तोत्रियानुरूपेभ्यःप्रथमोत्तमास्तृ
चांछंसेयुः। होत्रकाणांस्तोत्रियानुरूपेभ्यउर्ध्वंयछस्यतस्यादितोंततश्चएकैकंत्वचंहोत्र
कास्तोत्रियानुरूपेभ्यऊर्ध्वंशंसेयुः। तन्मध्यगतंशास्यमुक्षार्थमित्यर्थः। ऊर्ध्वमनुरूपेभ्यइत्ये ९९
तावतेवासिद्धेस्तोत्रियग्रहणंपारिसंख्यार्थंकानिवृत्यर्थं। प्रगाथेभ्यस्तमाध्यंदिने। माध्यंदि

नेसवनेयंविशेषः। प्रगाथेभ्यऊर्ध्वंयच्छस्यंतस्यादितोनतश्चत्वचौग्राह्यौ। तयोर्मध्येयच्छस्यं
तदुद्धार्यमिति। अनुसवनमेकादशैकादशदक्षिणाः। सवनेसवनेएकादशैकादशदक्षिणा
ददाति। सन्नेषुनाराशंसेषुप्रातःसवनेतुदक्षिणानांनिर्देशमात्रमेवकृत्वातासामपिमाध्यं
दिनएवसवनेनयनंकर्तव्यं। माध्यंदिनेयादक्षिणास्तासांदानंनयनंचतत्रैवकर्तव्यं। तृती
यसवनेतुदक्षिणानांनिर्देशमात्रमेवकृत्वाअनूबंध्यावपायागेकृतेतासांनयनंकर्त
व्यं। उन्नेष्यमाणास्विलेतआहुतीमाध्यंदिनएवसवनेभवतः। नेतरयोःसवनयोः। प्रातः
सवनेनयनाभावात्तृतीयसवनस्यपूर्वेषोवसिष्ठत्वात्कइदमित्ययंमाध्यंदिनेतृती
यसवनेचभवति। उभयत्रनयनसंभवात्। दृष्टार्थत्वाच्चेतिसिद्धं। एकादशैकादशवा
सहस्राणि। एकादशैकादशवासहस्राण्यनुसवनंदक्षिणाददाति। पूर्वस्यैकादशश

मू॰वृ॰उ२ त्वस्य दक्षिणाविशेषणार्थत्वादस्य च सहस्रसंख्याविशेषणार्थत्वान्न पुनरुक्तदोषः। श
१०० तानि वा। अत्र संख्याविशेषणार्थत्वात्सर्व एवानुवर्तते। एकादशैकादश वा शतानि अनु
100 सवनं दक्षिणा इत्यर्थः। अश्वो माध्यंदिनेऽधिकः। त्रिष्वपि पक्षेष्वश्वो माध्यंदिने दक्षि
णाभिः सह अधिको दातव्यः। भुवा भ्रातृव्यवानधिबुभूषुर्यजेत। भूर्नाम एकाहः। तेन
भ्रातृव्यवान्यजेत। भ्रातृव्याः शत्रवः। तानधिबुभूषुः। अभिभवितुमिच्छुरित्यर्थः। सद्य
स्क्रियानुक्रियापरिक्रिया वा स्वर्गकामः। सद्यस्क्रिया नामैकाह यस्मिन्नहनि दीक्षोपसदः
सुत्यं सर्वमेकस्मिन्नहनि क्रियते। अनुक्रियाप्येकाहः स एवं भवति एकस्मिन्नहनि दी
क्षा। द्वितीयेहनि क्रियाद्युपवसथांतं। तृतीयेहनि सुत्येत्येवं। परिक्रियाप्येकाहो भवति॥ १००
मेषामन्यतमेन स्वर्गकामो यजेतेति निरतिशयसुखकामः। एकत्रिकः त्र्येकश्च द्वावेका

एकत्रिकेन त्र्येकेन वान्नाद्यकामः।

हो। तयोरन्यतरेणान्नाद्यकामो यजेत। एकत्रिक एवं भवति। एकस्तोमो बहिष्पवमानः। त्रि
स्तोमो होतुराज्यं। एवं व्यत्यासेन सर्वत्रैतौ स्तोमौ विपरीतौ भवतः। त्र्येकस्त्वेतावेव स्तोमौ वि
परीतौ भवतः। त्रिस्तोमो बहिष्पवमानः। एकस्तोमो होतुराज्यं। एवमेव व्य त्यस्य व्यत्यस्य
त समापयेत्। गौतमस्तोमेन यः इच्छेद्दानकामा मे प्रजा स्यादिति। गौतमस्तोमो नामैकाहः। ते
न स यजेत। यो मम प्रजाः दानशीला दानकामाः स्यादिति कामयेत। एतेषां सप्तानां शस्य
मुक्तं बृहस्पतिसवने। एतेषां भूरादीनां गौतमस्तोमपर्यन्तानां सप्तानां बृहस्पतिसवेन श
स्यं व्याख्यातं। सप्तग्रहणं गौतमस्तोमसंग्रहार्थं। इतरथा गोस्तोमस्य माध्यंदिने सवने स्तो
मविष्टुधावपरिमिताभिरतिशंसने प्राप्ते एतच्छस्यं न प्राप्नुयात्। अतः सप्तग्रहणं कृतं। ते
न तस्मिन्नेव शस्ययथासंभवमतिशंसनं भवति। शस्यग्रहणमेतेषु शस्यमेव न दक्षिणा

सं० टू० ३२ विधिरपीत्येवमर्थः। त्वं भुवः प्रतिमानं पृथिव्या भुवस्त्वमिंद्र ब्रह्मणा महान् त्सयो ह जातो वृषभः क
१०१ नीनस्त्वं स घो अपिबो जात इंद्रानुत्वाहि घ्ने अध देव देवा अनुते दाथि महइंद्रियाय कथो नुते
परिचराणि विद्वानिति द्वे एकस्याचिन्मे विभ्वस्त्वोज एकं नु त्वा सत्पतिं पांचजन्यं त्र्यर्यमा म
नुषो देवताता प्रघान्वस्य महतो महानीथ्या हि सोम इन्मद इंद्रो मदाय वावृध इति सूक्तमु
खीयाः। एतेषां सप्तानां चतुर्दशर्चो द्वेद्वे संभूये केकस्य यथा संख्यं सूक्तमुखीयाः सु
॥५॥ गोतमस्तोमम् अंतरुक्थ्यं कुर्वंति। उक्तो गोतमस्तोमः तस्यैव कश्चिद्विशेष उच्यते। त
मंतरुक्थ्यं कुर्वंत्यध्वर्यवः छंदोगाश्च। तत्रांतरुक्थ्यं नाम एवं भवति। अंतर्मध्य इत्यर्थः।
अग्निष्टोममध्ये यस्मिन्नुक्थ्योत्पत्तिः सोंतरुक्थ्यः। स चतुष्प्र[illegible]कारो भवति ऐंद्रावरुणा १०१
दिभिर्ग्रहैः। एतेषु प्रवाणित इत्यादिभिः स्तोत्रियानुरूपैर्वा साकमश्वादिभिर्वा सामस्तो

त्रियानुरूपे वा। एषु पक्षेषु विशेषमाह। ग्रहांतरुक्थ्यश्चेदग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिर्या
इंद्रावरुणाभ्यां मत्स्वेंद्राबृहस्पतिभ्यामिंद्राविष्णुभ्यां सजूरित्याग्निमारुते पुरस्तात्परिधा
नीयाया आवपेत। उक्थ्याग्रहा यदग्निष्टोमचमसैः सह गृहीत्वा सहैव हूयंते तदाग्रहां
तरुक्थ्यो भवति। तत्राग्निमारुतस्य परिधानीयायाः पुरस्तादियमृगर्धर्चशः शंस्तव्या। उभ
योराक्रांतं। उत्तरविवक्षार्थमिदं सूत्रं। अन्यतरस्यामेके। उक्थ्यस्तोत्रियेषु चेद्यज्ञायज्ञी
येनं स्तुयुरिति शेषः। एषस्तोत्रियानुरूपांतरुक्थ्यः स्वे वा। स्तुयुरिति शेषः। उक्थ्यस्तो
त्रियेष्वेव स्वैः साकमश्वादिभिरेव वाग्निमारुताय यदि स्तुयुः। तदैष सामस्तोत्रियानुरू
पांतरुक्थ्यो भवति। अनंतरोक्तयोः पंक्तिपक्षयोः शंसनप्रकारमाह। सकृदाहूय स्तो
त्रियान्। तथारूपान्। त्रिभिस्तोत्रियैरेकं स्तोत्रियकार्यमत्र क्रियते। अनुरूपेष्वपि त्रिभिरे

स०हृ०उ२ कमनुरूपकार्यं कृतमिति कृत्वा आहावैक्यमन्त्रेति मंतव्यं। अन्यत्राप्येवं स्तोत्रियानुरूपयोर्नि सं
१०२ पाते। अन्यत्रापि स्तोत्रियानुरूपद्व्याणां संनिपाते सति कार्यैक्यादेक एवाहावः कर्तव्यः।
आत्रोदाहरणं। गर्भकारस्तवने अत्रचोदाहरणं। यदि कदाचिच्छंदोगाः स्वयोनावेव
102 यज्ञायज्ञीयेन स्तुत्वा उक्थ्यस्तोत्रियेष्वपि यज्ञायज्ञीयेन स्तुयुः। तदा स्तोत्रियानुरूपच
तुष्टयं भवति। अयं तु कल्पः सूत्रकारेणानिबद्धः। अत्राप्याहावैक्यसिध्यर्थं अन्यत्रा
पीत्यपि शब्दः। कृतो भवता सूत्रकारेण। यद्युवै यज्ञायज्ञीययोनौ संरेवोक्थ्यसामभिः वै
प्रकृत्यास्यात्तथासति। एष सामांतरुक्थ्यपक्षो भवति। यदि यज्ञायज्ञीयस्य ऋक्षु साकम
श्वसौभरनामेधिये स्तुयुस्तदा प्रकृत्यास्यादाग्निमारुतशस्त्यं। न यज्ञायज्ञीयस्याक्रियमा १०२
णस्य योनिशंसनं कार्यमित्यर्थः। तथासतीति। कथं सतीत्यत्र कं भवति। अयमभिप्रायः॥

प्रकृत्येति योनिशंसनाभाव उच्यते। तथा सति तस्मिन्नेव शस्त्रे स्तोत्रियत्वेन शंसने सतीत्य
र्थः। अनेन प्रकारेण तज्ज्ञावभावित्वमुक्तं भवति। अतः सिद्धमन्यत्रापि यत्र स्तोत्रियत्वेन य
(ने) स्मिंशस्त्रे शंसनमस्ति तस्मिन् शस्त्रे योनित्वेनापि शंसनं तासामृचां तत्र भवतीति। अत्रै
(स्त्रे) तावान् प्रयोजनांशः एकस्मिंश स्तोत्रियत्वेन शस्तस्य पुनरपि तस्मिन्नेव शस्त्रे योनित्वेन
(न) शंसनं भवतीति। नात्र क्रियमाणता अस्य योनिभावता वा विशेषः। हेतुः। अतः स्तोत्रिया
नुरूपांतः उक्थ्यपक्षे चयत्वायनीयस्य यथोक्तं योनिशंसनं कर्तव्यं। ६। श्येनाजिराभ्याम
भिचरन्यजेत। श्येनश्च अजिरश्च द्वावेकाहौ। ताभ्यामभिचरन्यजेत। अभिपूर्वश्चरति
र्हिंसायां वर्तते। अभिचरन् शत्रून् रायिष्यन्नित्यर्थः। अहं मनुर्गर्भेनु संस्त्वयामन्यो यस्त्वे
व न्याय इति मध्यंदिनौ यथासंख्येनोभयोर्भवतः। श्येनाहरहस्पातिसवेन। अनयोर्माध्यंदि

साम स्तोत्रियानुरूपांतः। उक्थ्यपक्षे ४

स०बृ०उ२ नाभ्यामनोयःशस्यविशेषःसबृहस्पतिसवेनव्याख्यातः।सन्नद्धालोहितोष्णीषानिस्त्रिंशि
१०२ नोयाजयेयुः।युद्धोपकरणैःकवचादिभिःसम्यग्बद्धाःसंनद्धाइत्यत्रविवक्ष्यंते।लोहित
103 वासोभिर्वेष्टितशिरसोलोहितोष्णीषउच्यंते।निस्त्रिंशोऽसिःखड्गोवायेषांहस्तेषुभव
तितेनिस्त्रिंशिनउच्यंते।तेयाजयेयुरितिवचनंसदस्यचमसाध्वर्युशामित्रनिवृत्त्यर्थं।
शरमयंबर्हिः।शरोनामवेणुसदृशःतन्मयंबर्हिर्भवति।मौसलाःपरिधयः।मौसला
मुसलरूपाइत्यर्थः।वैभीतकइध्मः।विभीतकोनामतरुविशेषःतन्मयोभव
तीध्मः।बाधातकोवा।बाधातश्चवृक्षविशेषः।तन्मयोवाभवति।अपगूर्याश्रावयेत्॥
स्कचावुत्क्षिप्यापगुरयन्निवाश्रावयेत्।प्रत्याश्रावयेच्च।स्कचमुत्क्षिप्यावगुरयन्।प्रत्या १०२
श्रावयेच्च।छिंदन्निववषट्कुर्यात्।वषट्कारशब्देछेदनंनामास्निग्धतावर्णानांतीक्ष्ण

ताच। अथवा वषट्कारोच्चारणकाले मनसा शत्रून्धारयन्निव स्यात्। जुषन्निव जुहु-
यात्। स्रुचा अंगारान्प्रेषयन्निव मनसा शत्रून्प्रेषयन्निव स्यात्। साद्यस्क्रेषूर्वरा वेदिः। अ-
भिचरणीयेषु साधारणधर्मा उक्ताः। इदानीं साद्यस्क्रेषु साधारणधर्मा उच्यंते साद्यस्क्रा
नाम सोमयागाः। सदीक्षोपसत्का एकस्मिन्नहनि क्रियंते। तेषु उर्वरा वेदिः सर्वसस्यव-
तीभूमिः सा वेदिर्भवतीत्यर्थः। खल उत्तरवेदिः। यस्मिन्प्रदेशे धान्यानि फलेर्विविच्यंते।
अनडुहादिभिः स प्रदेशः खल इत्युच्यते। खलेवाली यूपः। खलमध्ये अनडुद्भिर्भ्रम-
णे क्रियमाणे तद्बंधनार्थं मेथी खलेवालीत्युच्यते। खलेनडुहो वारयतीति खलेवाली।
स्फ्यग्रो यूपः। स्फ्यस्येवाग्रं यस्य सः स्फ्यग्रः स्फ्याग्र इत्यर्थः। छांदसो ह्रस्वः। एवं यूपो भवति
षा । अचषालः। अचषालश्चौरहितश्च भवति। कलापी चषालः। सा मेथी अग्रप्रदेशे धान्य-

सू०वृ०३२ फलैर्बध्नातिष्ठतिसएवचषालोभवति।इत्यागंतुकाविकाराः।इत्येतेनुक्तांताधर्माआगंतु
१०४ काविकाराश्चवेदितव्याः।अप्राकृताधर्माआगंतुकाउच्यंते।प्राकृतेष्वेवविशेषविधायो
विकाराउच्यंते।तत्रसन्नह्यालोहितोष्णीषाइत्येवंप्रकाराआगंतुकाः।शरमयंबर्हिःउर्व
104 शवेदिरित्यादयोविकाराः।अन्यांश्चाध्वर्यवोविदुः।अध्वर्यवःअन्यांश्चागंतुकान्विकारां
श्चआमनंति।तेसर्वेपिअस्माभिरनुष्ठेयाइत्यर्थः।सिद्धेतुशस्यहोता।संप्रैषान्वयस्यात्।
शस्यग्रहणंअनुवचनादीनामपिप्रदर्शनार्थं।सिद्धेतुवचनादस्मिन्शास्त्रेविहितेसति
होतासंप्रैषान्वयस्यात्।इदमत्रोदाहरणं।खलेवाल्यांउच्छ्रयणाभावाद्जनपरिव्याण
योर्धेएवचर्याविनूच्यते।तत्रप्रकृत्याबकुलाभावादभिहिंकाराभ्यासोनस्यातां।एवंप्राप्तेइद १०४
मुच्यते।सिद्धेसभिहिंकाराभ्यासेनुवचनेसतिसंप्रैषानुसारेणतावन्मात्रमनुवक्तव्यं।ना

न्येविकारउत्पादयितव्यइत्यर्थः ।अन्यदप्येवंप्रकारमुदाहरणमन्वेषणीयं ।पाप्याकीर्त्यापि
वायो हितोमहारोगेणवालंप्रजननैःप्रजांनविंदेतसोग्निष्टुतायजेत ।पापीकीर्तिः ब्रह्महत्यादिना न
जातातयापिहितश्छंनइत्यर्थः ।महारोगेणवापिहितः ।दीर्घकालानुवर्तीरोगोमहारोगः ॥
अथआयुर्वेदप्रसिद्धोमहारोगः योवालंप्रजननः पर्याप्तप्रजननः ।पुंस्त्वयुक्तइत्यर्थः ।
सयदिप्रजांनलभेत ।एतेत्रयोग्निष्टुतोधिकारिणः ।अग्निष्टुदित्येकाहस्यसंज्ञा ।तिष्ठाहरी
योजातएवेतिमध्यंदिनः ।सर्वाग्नेयश्चेत्स्तोत्रियानुरूपाआग्नेयास्युः ।असर्वाग्नेयोग्निष्टु
दित्युक्तः ।सर्वाग्नेयत्वंइदानीमुच्यते यद्ययमग्निष्टुत्सर्वाग्नेयस्यात् ।तदास्तोत्रियानुरू
पाआग्नेयीभिः कर्तव्याः । विचारिवा ।एवंवासर्वाग्नेयोग्निष्टुद्भवति ।विचारि
वायथाग्नेयोभवति तथाप्राप्तेविचारिशब्देनआगमापायिनउच्यंतेअविचारिणः ।इंद्रनि

स०वृ०उ३ ह्वधाय्यापोहिष्ठीयप्राकाराः। तेभ्योन्येविचारिणस्तेसर्वेआग्नेयाभवंतिइत्यर्थः। अपिवासर्वे
१०५ षुदेवताशब्देष्वग्निमेवाभिसंनमेत्। अथचेवंसर्वाग्नेयोग्निश्रुद्भवति। यथाप्राप्तेशस्येस
र्वेषुदेवताशब्देषुआग्निशब्दःप्रक्षेप्तव्यइत्यर्थः। अग्निशब्दस्यपुंल्लिंगत्वात्स्त्रीदेवताशब्द
105 स्थानेपिपुंल्लिंगएवाग्निशब्दःप्रयोक्तव्यः। यथापावकेनोग्निर्वाजेभिरिति। द्विवचनेत्वविरो
धात्कर्तव्येएव। यथा। कृतेनाग्नीकृतावृधाविति। ॐमासश्चर्षणीधृतोग्नयआगतेति।
देवताशब्देष्वग्निशब्दंप्राक्षिपेदितिवचनात्। सिद्धेपिसर्वेष्वितिवचनंशस्त्रादिषट्केजपा
दिषट्केचसर्वप्रकारेमंत्रेष्वस्यविधेःप्रापणार्थं। तथासत्यन्वक्षमिंद्रस्तुतायजेत्। तथास
तिएभिस्त्रिभिःप्रकारैःसर्वाग्नेयेग्निश्रुतिसतीत्यर्थः। अन्वक्षंसद्यएवेत्यर्थः। इंद्रस्तुन्नाम १०५
एकाहः। तेनयजेत। इंद्रस्तोममिंद्रंस्तवेतिमध्यंदिनः। इंद्रसोमंसोमपतेपिबेमामित्यतस्ये

सर्वत्रग्रहणं त्रैष्टुभत्वान्माध्यंदिनस्य सवनस्य। भूतिकामो वा ग्रामकामो वा प्रजाकामो वा।
उपहव्येन यजेत। भूतिकामो यः स्वाध्यायेन धनेन वाभिभवितुं कामः। ग्रामकामः। प्रसिद्धः
प्रजाकामः। पुत्रकामः। एषामन्यतमकाम उपहव्येन एकाहेन यजेत। एषः छंदोगानामनिरु
क्ततमः श्रूयते। इंद्रस्थाने शक्रशब्दः प्रयोक्तव्यः। सर्वशब्दस्थाने विश्वशब्द इत्यादयो धर्मा
अनिरुक्ताः। श्रूयंत इति छंदोगानां प्रसिद्धं ते चास्माभिरनुसरणीयाः। इमाउत्वाय एकइदि
ति मध्यंदिनः। इंद्राग्न्योः कुलायेन प्रजातिकामः। प्रजातिकाम इति प्रजाभिः पशुभिश्च महा
न्भूयासमिति कामयमान इत्यर्थः। इंद्राग्न्योः कुलायमित्येकाहः। तिष्ठाहरीतमुष्टुहीति
मध्यंदिनः। ऋषभेणाविजिगीषमाणः। विजेतुमिच्छन्विजिगीषमाणः। मरुत्वाँ इंद्र सुध्म
स्यत इति मध्यंदिनः। विघनेनाभिचरन्। विघन इति क्रतुनाम तस्यं माजिरेण। तस्य ग्रहणं
न्नास्य

स०वृ०उ२ शस्यप्रदर्शनार्थं। नलोहितो व्याषादिनिवृत्यर्थं। इंद्राविष्णवोरुक्रांतिना स्वर्गकामः। इंद्रावि
१०६ ष्णवोरुक्रांतिरेकाहनाम। इमाउलाद्यो नेयइंद्रेति मध्यंदिनः। यः कामयेत। नेष्यात्वं पाप्म
नइयामितिस क्रूतपेयेनयजेत। निस्नेहत्वभावो नेष्यात्वं गछेयमितियः कामयेतसक्रू
106 तपेयेनामकेनएकाहेनयजेत अल्पमपिपापं मायिनतिष्ठेदितियः कामयेतसक्रूतपेये
नयजेतेत्यर्थः। क्रूतस्याहिश्रुरुधः संतिपूर्वीरितिसूक्तमुखीय। सत्येनचमसान्भक्षयंति।
सत्यमुक्त्वाभक्षयंति। सत्यमियंपृथिवीसत्यमयमग्निः सत्यमयंवायुः सत्यमसावादित्य
इति। एवंमंत्रमुक्त्वाभक्षयंतीत्यर्थः। अत्रनित्यस्यभक्षमंत्रस्यनिवृत्तिः। सोमचमसोदक्षि
णा। सोमांशुभिः पूर्णंचमसंदक्षिणाकालेसगोत्रायब्राह्मणायददातीतिश्रुतिः। क्रूलि १०६
गानंतोउपायांतरमलिषणीयं। ३। अतिमूर्तिनायक्ष्यमाणोमासंसोर्याचांद्रमसीभ्यामि

ष्टी भ्यां यजेत । अतिमूर्तिर्हृणाशो बहुसुवर्ण इत्यस्यैकाहस्य त्रीणि नामानि । अनेन यक्ष्यमा
णः पुरस्तादेकं मासं सौर्या चांद्रमसीभ्यामिष्टीभ्यां यजेत । सूर्योस्या देवतेति सौरी । सौर्या इत्या
कारांतनिर्देशश्छांदसः चंद्रमा देवता अस्या इति चांद्रमसी । एताभ्यामिष्टीभ्यां स यजेत । कथ
मित्यपेक्षायामेतदाह । शुक्लं चांद्रमस्या सौर्येतरं । शुक्लपक्षमहरहश्चांद्रमस्या यजेत । इ
तरं कृष्णपक्षमहरहः सौर्यया यजेत । ततोतिमूर्तिना यष्टव्यं । अत्राहर्गोरमन्वतनवो न
वो भवति जायमानस्तरणिर्विश्वदर्शतश्चित्रं देवानामुदगादनीकमिति याज्यानुवाक्याः ।
याज्यानुवाक्याग्रहणं सूक्तमुखीयत्वसंशयनिवृत्त्यर्थं । इतरथा षड्ॠचो नुक्रम्य सूक्तमुखी
ये इत्युक्ते आसामन्यतमे इति प्रतिभासः स्यात् । तन्निवृत्त्यर्थं इति । सईं महीं धुनिमेतोररम्णा
त्स्व मेनामुष्णाच्छुमुरिं धुनिं चेति सूक्तमुखीये । अतिमूर्तिन एते सूक्तमुखीये । सूर्यस्तुताय

शस्काम:। सूर्यस्तुदेकाह:। यश: कीर्ति:। पिबा सोम मभीद्रंस्तवेति मध्यंदिन:। व्योम्नान्नाद्यका
म:। व्योमेत्येकाहनाम। विश्वदेवस्तुतायशस्काम:। विश्वदेवस्तुदित्येकाहनाम। पंचशारदी
येन पशुकाम:। पंचशारदीयएकाह:। एतेषांत्रयाणांकयाशुभा तदिद्दासेति मध्यंदिन:। उ
भयसामानो पृष्ठे। व्योमविश्वदेवस्तुता विसृष्टर्थ:। उक्थ्य: पंचशारदीय:। विशो विशोवो
अतिथिमित्याज्यं। पंचशारदीये एतदाज्यं भवति। कण्वरथंतरं पृष्ठं। पंचशारदीयस्यैव।
गोसवविवधौ पशुकाम:। गोसवो विवधश्च एकाहौ। तयोरेकैक: पशुकामस्य। इंद्रसोम
मेतायामेति मध्यंदिन:। गोसवविवधयोरप्येषएव माध्यंदिन:। दशसहस्राणि दक्षिणा:।
दक्षिणाश्च द्वयोरेकैकस्य सर्वा:। षोडशैकाहा:। अत: परं षोडशैकाहा: ते चांगिरसादयो १०७
राशिमराशयांता:। आयुर्गौरिति व्यत्यासं। तेषां षोडशानां आयुर्गौश्च प्रकृती भवत:। व्य

त्यासमिति। अयुजामायुः। युजां गौरिति एवं व्यत्यासं। प्रथमस्यायुर्द्वितीयस्य गौः। तृतीयस्या
युरित्येवमर्थः। उद्भिद्बलभिदौ स्वर्गकामः। तेषां आद्यो उद्भिच्च बलभिच्च तौ स्वर्गकामस्य॥
ये द्वंद्वशो विहितास्ते यमयज्ञा वेदितव्याः। तेषु सर्वेषु यमयज्ञेषु पूर्वेण यागं कृत्वानंतरमे
वोत्तरेण यागः कर्तव्यः। अथवा छंदोगप्रत्ययाद्देवयमयज्ञानां गतिर्भवेत्। एतेषु माध्यंद
ने विधिरायुर्गोगौश्च प्राप्ते तावन्मात्रापवादः। इंद्रसोमामिंद्रः पूर्भिरिति मध्यंदिनः। उद्भि
द्बलभिदोरेष मध्यंदिनः॥ विनुत्यभिभूत्योरिषुवज्रयोश्च मन्युसूक्ते। विनुतिरभिभूतिश्चैकाहौ।
इषुश्च वज्रश्चैकाहौ। द्वयोर्यमयोर्मन्युसूक्ते त्वया मन्यो यस्ते मन्य विल्येते मध्यंदिनो भवतीत्य
र्थः। अभिचरन्यजेत। तावेवैकाहावभिचरतो भवतः। एतत्सर्वं पूर्वसूत्रस्थेन चशब्देन ल
भ्यते। त्विष्यपचित्योः सम्राट्स्वराजोराड्विराजोः शारदस्य चैकाहिके। त्विषिश्चापचितिश्चैकाहौ।

सू०वृ०उ २ सम्राड्चस्वराड्चद्वौ।विराड्चविराड्चद्वौ।एदश्चैकाहः।एतेषांसप्तानांएकाहिकेजनिष्ठाउ
१०८ ग्रइंद्रस्यनुवीर्याणीत्येवमाध्यंदिनोभवतीत्यर्थः।उपशदस्यराशिमरायययोश्चकयाशुभीय
1o8 तदिदासीये।उपशदश्चैकाहः।राशिमराशयश्चद्वौ।तेषांकयाशुभीयतदिदासीयेमध्यंदि
नोभवतीत्यर्थः।भूतिकामराज्यकामान्नाद्यकामेंद्रियकामतेजस्कामानां।षोडशानांमध्ये
मा त्विष्यादीनांअनुक्तकामानांएतेकौभवंति।एतेकामाद्वयोर्द्वयोः।त्विष्यादीनांद्वयोर्द्वयो
रेकैकस्यएकः।कामोयथासंख्येनभवति।ऋषिस्तोमाव्रात्यस्तोमाश्चषट्व्याहानि।ऋषि
स्तोमानामसप्तैकाहाः।व्रात्यस्तोमानामचसप्तैवतेषांचोभयेषांषट्व्याहानियथासंख्येन
प्रकृतिभूतानिभवंतीत्यर्थः।प्रथमस्यप्रथमेनेत्येवं।उभयत्रसप्तमोज्योतिष्टोमःप्रकृतिः। १०८
नाकसदऋतुस्तोमादिकस्तोमाश्चाभिप्लवाहानि।नाकसदइतिषड्वैकाहाः।एकोगणः।

क्रतुस्तोमनामानश्चषव्ळेकाहाः।द्विकस्तोमानामानश्चषडेकाहाः।द्वावेतोगयो।एतेषांत्र
याणांअभिप्लवाहानिप्रकृतिरेकैकस्यगणस्ययथासंख्येनेवपूर्ववत्॥८॥वाजपेयेनाधि
पत्यकामः।आधिपत्यंआधिक्येनस्वाम्यंतत्कामोवाजपेयेनयजेत।सप्तदशदीक्षाः॥
तस्यवाजपेयस्यसप्तदशदीक्षाभवंति।एकाहानामेकातिस्रोवादीक्षाइत्यस्यायंपवादः॥ म
सप्तदशापवर्गोवा।सप्तदशभिरहोभिरपवृज्यतेसमाप्यतेसप्तदशापवर्गः।तदात्रयोद
स्त्र शदीक्षाःतिस्रउपसदएकासुत्येतिकल्पना।हिरण्यस्रजऋत्विजोयाजयेयुः।हिरण्मयीभि
स्रग्भिर्भूषिताहिरण्यस्रजइत्युच्यंते।ऋत्विग्ग्रहणंचमसाध्वर्युशमित्रादिनिवृत्त्यर्थं।
वज्रकिंजल्काशतपुष्कराहोतुः।होतुःस्रगेवंभवतिहिरण्मयीःशतेनपुष्करैःकृतानिच
तानिचपुष्कराणिवज्रनामकरत्नविशेषैःकृतकिंजल्कानिभवंति।किंजल्कपुष्कराश

स०वृ०उ३ द्वाभ्यां स्रगेवविशेष्यते। पार्ष्णिकः। परस्परसंबंधः। विश्वजिद्राज्यं। कयाश्रुभातादिदासेतिम
१०९ ध्यंदिनः संस्थिते मरुत्वतीये बार्हस्पत्येष्टिः। बृहस्पतिरस्यादेवतेति बार्हस्पत्या। आज्यभा
109 गप्रभृतीक्लृप्ता। बृहस्पतिः प्रथमं जायमानो बृहस्पतिः समजयद्वसूनि त्वामीळते अजि
रं हुत्वा याग्निं सुदीतिं सुदृशं गृणंत इति संयाज्ये। अत्र बृहस्पतेरादेशो न कर्तव्यः। सोमि
कीभ्यश्चेति वचनात्। आज्यभागयोः स्विष्टकृति चादेशः कर्तव्य एव। यदित्वध्वर्यव आ
जिं तापयेयुरथ ब्रह्मा तीर्थदेशे मयूखे चक्रं प्रतिमुक्तं तदारुह्य प्रदक्षिणमावर्त्यमाने
वाजिनां साम गायाद्वाविर्मर्या अ वाजं वाजिनो अग्मन् देवस्य सवितुः सवे स्वर्गां अर्वंतो
जयतः स्वर्गां अर्वंतो जयतीति वा। यदीति यदेत्यर्थः। यदाध्वर्यव आजिं जापयंति यज १०९
मानं आजिं नामलक्षणं जापयेयुः गमयेयुरित्यर्थः। एतदुक्तं भवति। यदात्वध्वर्यवो यज

मानमाजिं गमयेयुः। तदा ब्रह्मतीर्थदेशो मयूखं निधाय मयूखमक्षमित्यर्थः तस्मिन् रथच

क्रं प्रतिमुच्य तदारुह्यास्ते। तच्चक्रं प्रदक्षिणमावर्तयंति केचित्पुरुषाः। तदा ब्रह्मा वाजिनां

साम गायात्। आविर्मर्या आवाजं इत्यस्यामृचि गीतं। तत्साम। एषा ऋक् पुरउष्णिक्। अर्वं

तः अर्वत इति वा। तृतीयपदे द्वितीयं पाद पठितव्यं उभयथा समाम्नायदर्शनात्। अस्या

र्थस्य ज्ञापनार्थं तृतीयः पादः सूत्रकारेण द्विधा पठ्यते। यदि साम नाधीयात्रिरेतामृचं ज

पेत्। तृतीयेनाभिप्लविकेनोक्तं तृतीयसवनं चित्रवतीषु चेत्स्तुवीरं स्तवनश्चित्रउत्याग्नेवि

वस्वदुषस इत्यग्निष्टोमसामस्तोत्रियानुरूपौ। षोडशी लिङ्गात् तृतीयस्याह्न उक्थ्यसंस्थत्वा

दत्र षोडशी विधीयते। तस्मादूर्ध्वमतिरिक्तोक्थ्यं। तस्मादूर्ध्वं षोडशिन ऊर्ध्व इत्यर्थः। अने

न वचनेन यत्र षोडशी नास्ति तत्रातिरिक्तोक्थ्यमपि नास्तीति गम्यते। अनेन प्रकारेणाञ्ज

सू०वृ०उ २ षोडशिको वाजपेयोस्तीति साधितं भवति। प्रतत्तेअद्यशिपिविष्टनामँप्रतद्विष्णुस्तवते वीर्येणे म
११० ति स्तोत्रियानुरूपौ। एवमतिरिक्तोक्थ्यं भवति। ब्रह्मजज्ञानं प्रथमं पुरस्ताद्यत्ते दिक्षु प्ररा
ध्यं त्वामिच्छवसस्पते। एकर्चानि त्रीणि प्रतीकानि। तं प्रत्नथेति त्रयोदशानामेकां शिष्ट्वा हृय
110 द्रोहणं रोहेत्। तं प्रत्नथा पूर्वथेति त्रयोदशार्चः शंस्तव्याः। तासामृचामेकामवशिष्य आ
हृय द्रोहणं रोहेत्। आहृयेति वचनं षष्ठेत्वेव षष्ठ्याहन्यहरहः शस्येत्यस्मिं द्रोहणो आ
हावाभावादत्राप्याहावाभावशंकास्यात्तन्निवृत्त्यर्थमुच्यते। बृहस्पते युवमिंद्रश्च वस्व इति
परिधानीया। विभ्राड्बृहत्पिबतु सोम्यं मध्विति याज्या। तस्य गवां शतानामश्वरथानाम
श्वानां सघानां वत्स्यानां महानसानां दासीनां निष्ककंठीनां हस्तिनां हिरण्यकक्ष्याणां सप्त ११०
दशास प्तदशानि दक्षिणा। तस्य सप्तदशानि दक्षिणानि दातव्याः। तस्येति वचनं सषोड

शिकस्यैवायं दक्षिणाविधिरिति ज्ञापनार्थं। इतरथा प्रकृतत्वाद् षोडशिकस्यापि स्यात्तन्नि
वृत्त्यर्थं तस्येत्युच्यते। तेन अषोडशिकस्य न्यायक्लृप्तैव दक्षिणा भवति। गवां शतानां सप्त
दशेति संबंधः। शतशब्दो गोभिरेव संबध्यते। नोत्तरैः। अश्वैर्युक्ता रथा अश्वरथाः। तेषां
सप्तदश। आश्वानां सप्तदश। येषु सीदंती पुरुषास्ते साद्याः अश्वादयः पृष्ठवाहिन इत्यर्थः।
तेषां च सप्तदश। वाल्याः वहनसमर्थाः तेषामपि सप्तदश। महांति च अनांसि चेति महान
सानि। तेषामपि सप्तदश। निष्को नामाभरणविशेषः तेन कंठे भूषिताः निष्ककंठ्यः एवं
भूतानां दासीनां सप्तदश। हिरण्मयः कक्ष्यो येषां ते हिरण्यकक्ष्याः एवंभूतानां हस्तिनां सप्त
दश। एतेषां द्रव्याणां सप्तदश सप्तदश दातव्याः। सा दक्षिणा सषोडशिकस्य वाजपेयस्ये
त्यर्थः। सप्तदश सप्तदशेति पाठः कर्तव्यः। सप्तदश सप्तदशानीत्यस्य अपपाठत्वात्॥

दशान्ये दक्षिणा गवा[illegible]धनानां॥ शतावमापरार्ध्यानां इति शतावमानां शतप्रभृतीना
१११ मित्यर्थः। परार्ध्यं परावधिस्तद्यस्य नास्ति तदपरार्ध्यमित्युच्यते। अपरिमितपरावधीना
मित्यर्थः। शतप्रभृतीनां अपरिमितपरावधीनामित्युक्तेपि द्विशतात्प्रागेव परावधि
र्भवति। एतदुक्तं भवति। गवादीनां द्रव्याणां सप्तदशसंख्यायुक्तानां येषां केषांचिद्धनानां
संबंधिन्यो स्य दक्षिणा भवंति। पूर्वेणास्य विकल्पो र्थात्सिद्धो भवति पूर्वान्वा गणान्सोभ्य
स्येत्। यद्यन्यानि धनानि न संति तदा पूर्वेषां गवादीनामेकैकस्य द्रव्यस्य दशकृत्वोभ्यस्य
दशगणान्संपाद्य दक्षिणां दद्यात्। अन्येषां धनानमसंभवो। सप्तदश सप्तदश संपाद
येत्। एवमप्यसंभवे यानि कानिचिद्द्रव्याणि सप्तदशसंख्यायुक्तानि सप्तदश दातव्यानी १११
त्यर्थः। अयमप्यपरो दक्षिणाकल्पः। एवमेते चत्वारो दक्षिणाकल्पाः। सषोडशिकस्य
अप्तो गणा दक्षिणात्वेनोक्ताः पूर्वसूत्रे। इदानीमन्ये त्रयो गणाः शतप्रभृत्यपरिमितसंख्यायुक्ता ६

वाजपेयस्य।इतिवाजपेयः।इत्येवंप्रकारः।सर्वेवाजपेयाइत्यर्थः।एकवचनंजात्यभिप्रा
यं।तेनेष्ट्वाराजाराजसूयेनयजेत।ब्राह्मणोबृहस्पतिसवेन।अनयोरेवानुकीर्तनाद्वैश्य
स्यायंनास्तीतिगम्यते।१।।अनिरुक्तस्यचतुर्विंशेनप्रातःसवनंतृतीयसवनंच।अनि च
रुक्तोनामएकाहः।तंप्रत्नथेतित्रयोदशवैश्वदेवं।यज्ञस्यवोरथ्यमित्यस्यापवादः।कया
शुभातदिदासेतिमध्यंदिनः।ऐकाहिकंमाध्यंदिनंसवनं।तस्यायंमध्यंदिनः।होत्रकाऊ
र्ध्वंप्रगाथेभ्यः।प्रथमांत्संपातांछंशेयुः होत्रकान्माध्यंदिनेसवनेस्तोत्रियानुरूपान्स्त्वा
न्शस्त्वाप्रगाथानंतरंप्रथमान्संपातान् एवात्वामिंद्रइंद्रःपूर्भिदिमामूष्वित्येतान्शंसे
युः।अहीनसूक्तानिवा।अहीनसूक्तान्यासत्योयातुअस्माइदुशासद्वह्निरितिएतानिवा
प्रगाथानंतरंशंसेयुः।एवंद्विसूक्ताहोत्रकाभवंति।मैत्रावरुणाच्छावाकयोःसंपातपक्षे

स०वृ०उ३ तस्येव बहिः शंसनेया प्रेत तद्दैवतमन्यमित्येतत्कर्तव्यं। आलणाछंसिनो यथाप्रकृत्येव। अहीन
११२ सूक्ताः पक्षे प्रगाथानंतरं अहीनसूक्तानि ततोस्यान्यैकाहिकानि। एवं पूर्वे सवने बृहत्पृष्ठे
ष्वसमाम्नातेषु। असमाम्नाता ये बृहत्पृष्ठा एकाहास्तेष्वेवं पूर्वे सवने भवतः प्रातःसव
नं माध्यंदिनं च यथा निरुक्ते भवतः। प्रतिकामं विश्वजिच्छिल्पः। कामंकामं प्रतिकामं यो
यो यं कामं कामयते स स विश्वजित्। शिल्पनाम्नैकाहेन यजेत। तस्य समानं विश्वजिता
प्रगाथेभ्यः। तस्य विश्वजिच्छिल्पस्य शास्त्यं विश्वजिता समानं। माध्यंदिने सवने होत्रकाणां
ये प्रगाथास्तेभ्य इति। बृहस्पतिसवे नाज्यं। निष्केवल्यमरुत्वतीयौ चतच्चौ। बृहस्प
तिसवे नव्याख्यातौ। ताभ्यां तु पूर्वे एकाहिके। इंद्रमरुत्वइहन्तपामुत्स्येत्येताभ्यां पूर्वेजनि ११२
ष्ठा उग्र इंद्रस्य नु वीर्याणीत्येते सूक्ते शंस्तव्ये। होत्रका ऊर्ध्वं प्रगाथेभ्यः शिल्पान्यविकृता

निशंसेयुः। शिल्पादीनि विहारन्यूंखनादिरहितानि शंस्तव्यानि। तो चेदग्निष्टोमो यदि वो
क्थ्यष्वहिपरास्त्विति एतस्मिन्प्रकरणे यथोक्तं तथा तत्रापि शंसनीयानीत्यर्थः। सामसूक्ता
नि च। शिल्पानंतरं सामसूक्तानि च शंसनीयानि। आद्यांस्तृचानहीनसूक्तानां। अहीनसू
क्तानामाद्यांस्तृचांछंसेयुः। अंत्यानामैकाहिकानामुत्तमान् तृचानीति शेषः। समानंतृ
तीयसवनं बृहस्पतिसवेनं। नाभानेदिष्ठं त्विह पूर्वं वैश्वदेवात्तृचात्। बृहस्पतिसवे
वैश्वदेवं सूक्तं स्वस्ति नो मिमीतामित्ययं तृचं तस्मात्पूर्वो नाभानेदिष्ठो भवति। नाभानेदि
ष्ठेति इदमित्थेति सूक्तद्वयस्य व्याख्याता। एवयामरुच्चाग्निमारुते मारुतात्। पूर्वो भव
तीति शेषः। आग्निमारुते मारुतं सूक्तं प्रयंतु वाजा इति तृचः। तस्मात्पूर्वमेवयामरुद्भ
वति। तयोरुक्तः शस्योपायः। तयोरेवयामरुन्नाभानेदिष्ठयोः शस्योपाय उक्तः एवया

स०वृ०उ२ मरुतः षष्ठः समाससमुत्तमे पद इति। नाभानेदिष्ठस्य प्रागुणोत्तमायायेयज्ञेनेत्यादि॥१०॥य
११२ स्य पशवो नोपधेरेरन्नन्यान्वाभिजनान्निनीत्सेत सोऽप्तोर्यामिणा यजेत। यस्य पशवो नोप
धेरेरन्न तिष्ठेयुः न दृश्येयुरित्यर्थः। यस्यैवं पशवो भवंति सः अप्तोर्यामिण एकाहेन यजे
त॥ अथवा विद्यमानेष्वेव पशुषु अन्यानपश्यन्नभिजातान्। अभितः स्थितानीत्यर्थः। निनी
त्सेत निदि कुत्सायामित्ययं धातुरत्र प्राप्तो वर्तते। सन्नंतश्च रूपसिद्धिश्च कथंचिद्द्रष्टव्या।
अशक्या चेच्छांदसो भवत्ययं भाव्यः। अर्थश्चायमेव। एवं वा योजना। अन्यान् अभिजना
न्। कुलीनानित्यर्थः। यस्तानाप्तुमिच्छेत्। स वनेनयजेत। माध्यंदिने शिल्पयोनिवर्जमु
क्तो विश्वजिता। अयमप्तोर्यामः सात्त्विकेण विश्वजिता व्याख्यातः। तत्रायं विशेषः। विश्व ११२
जिति तु तो चेदग्निष्टोमो यदिवो कथ्य स्वाद्धपदा सुस्त वीरान्निति माध्यंदिने शिल्पप्राप्त

निमित्तद्वयमुक्तं। तत्राग्निष्टोमत्वासंभवादप्तोर्यामिः। स्याद्विपर्दास्तवनमेवात्रमाध्यंदि

नेशिल्पप्राप्तेर्निमित्तं। तद्वर्जनार्थमत्राशिल्पग्रहणं। नित्यशिल्पत्वाद्विश्वजितः तदतिदे

शाद्यं पर्युदासः। कुतः शिल्पग्रहणेनेत्यर्थः। योनिग्रहणं च एवमेवद्रष्टव्यं। चतुर्विंशा

तिदेशाद्विश्वजितोनिष्केवल्येयोनिशंसनंप्राप्तं। तच्चविश्वजित्येवहोत्रकाणांविहितंयो

निशंसनंतस्योभयस्यपर्युदासार्थयोनिग्रहणमिति। यत्पुनः सामान्यविहितक्रियमा

णास्वयोनिताभावनिमित्तंतदत्रनप्रतिषिध्यते। एकाहेन। एकाहेनवायमप्तोर्यामोव्या

ख्यातः। एकाहशब्देनात्रज्योतिष्टोमोगृह्यते। गर्भकारंचेत्ककुवीरंस्तथैवस्तोत्रियानु

रूपानशंसेदितिशेषः। रथंतरेणाग्रेततोवैराजेनततोरथंतरेण। अनेनगर्भकारस्व

रूपमुच्यते। बृहद्वैराजाभ्यांचैवमेव। एवमेवेतिगर्भकारमेवेत्यर्थः। वामदेव्यशाक्वरैमै

सू० वृ० ३ २ त्रावरुणस्य। नौधसवैरूपे ब्राह्मणाच्छंसिनः। रथंतरपृष्ठपक्षे एते। श्यैतवैरूपे वा। बृहत्पृष्ठे ए
११४ ते। कालेयरैवते अछावाकस्य। सर्वत्र एवमेवेत्यनुवर्तते। सामानंतर्येण द्वौ द्वौ प्रगाथाव
114 गर्भकारं। विश्वजिता अंत[illegible]रेण कद्वतश्चेति सांप्रगाथानां पूर्वमेव प्रवेशउक्तः। तन्निवृ म
त्यर्थं सामानंतर्येणोक्तं। द्वौ द्वाविति नित्यसाम प्रगाथावित्यर्थः। अतिरात्रस्त्विह। ऊर्ध्वं
९६ माश्विनादित्यनावक्ष्यमाणेनैव वचनेनातिरात्रत्वे सिद्धे। इदं वचनं षोडशिनि चातिरा
त्र इत्येवमाद्यतिरात्रधर्मप्राप्त्यर्थं। अह्वेपदोक्थ्यश्चेद्वैक्षुवतं तृतीयसवनं। विश्वजिद
तिदेशादुत्तमेन पृष्ठ्याहात्तृतीयसवनं प्राप्तं तस्यायमह्वेपदोक्थ्यनिमित्तोयमपवादः।
अह्वेपदोक्थ्यश्चेद्वैक्षुवतं तृतीयसवनं प्राप्तं। ऊर्ध्वमाश्विनादतिरिक्तोक्थ्यानि। अतिरि ११४
क्तोक्थ्यानीति शस्त्रनामानि तानि शस्त्राणि होतुर्होत्रकाणां च। जराबोधतद्विविड्ढि जर

माणः समिध्यसेग्निनेंद्रेणाभात्यग्निः क्षेत्रस्य पतिना वयमिति परिधानीयाशु वं देवाक्र
तुनापूर्व्येणोतियाज्या। द्वेसूक्ते पंछः। अर्वाग्रथं त्वचस्योक्तः शंसनविधिः पछोर्धर्चेशः पं
क्तितइति। यदद्य कच्चवृत्रहन्नुद्वेदभि। श्रुतामघमानो विश्वाभिः प्रातर्यावाणा क्षेत्रस्य
पते मधुमंतमूर्मिमिति परिधानीयाशु वां देवास्त्रयएकादशास इति याज्या। प्रातर्यावा
णेति सूक्तं परिधानीया च पंछः। तमिंद्रं वाजयामसि महाँ इंद्रो य ओजसा। नूनमश्वि
वां नातं रथं मधुमतीरोषधीर्द्याव आप इति परिधानीया पनाय्यं तदश्विना कृतं वामिति
याज्या। यद्वां कक्षीवान् यदिंद्रेण सरथमित्येते कुचौ तं वां रथमिति सूक्तं परिधानीयाच
इति पंछः। अतो देवा अवंतु नस्तोत्रियानुरूपौ। अतो देवा अवंतु न इत्याद्याः षळृच इत्यर्थः।
रू उत नो धियो गो अग्रा इति वानुरूपस्योत्तमा। इदं विष्णुर्विचक्रम इत्येवमाद्याः पंचर्चो गि

स०प०उ२ त्वाउतनोधियोगोअग्राइत्येतां वाषट्कुर्यादित्यर्थः।ईळेद्यावापृथिवीउभाउन्नंदेव्याहो
११५ ताराप्रथमाउरोहितेतिपरिधानीयायंवांभागोनिहितोयजत्रेतियाज्या।द्वेसूक्तेपरिधा
115 नीयाचपच्छः।यदिनाधीयात्सुराणमोकःसस्व्यंशिवंवामितिचतस्त्रोयाज्याः।यद्येताकृ
चोनाधीयात्तदापुराणमोकःसस्व्यंशिवंवामितिचतस्त्रोयाज्याभवंति।एतासामध्यय
नेयत्किंचिद्व्रतमस्तितच्चानुष्ठातुमशक्यमितियदिनाधीयादित्युक्तं।एतच्चभाष्यका
रवचनादवगतं।एतेषांचमसानामाश्विनत्वेएतायाज्याभवंति।आग्नेयंद्वैश्वदेवं
वैष्णवत्वेतायाज्याभवंति।यथाहोतरस्मैवयंस्तीर्णबर्हिःपरोमात्रयेति।तद्वोगाय
सुतेसचास्तोत्रमिंद्रायगायततत्यमुवःसत्रासाहंसत्रातेअनुकृष्टयशतिवास्तोत्रि ११५
यानुरूपाः।एतेद्वेस्तोत्रियानुरूपाःसुगुल्लेलिंगान्मध्यमयोःशस्त्रयोर्भवतः।अपरि

मिताः परः सहस्राद्दक्षिणाः। सहस्रादूर्ध्वं दित्सा सहस्रादर्वाग्यथाकाममित्यर्थः। श्वेतश्वा

श्वतरीरथो होतुर्हेतुः। अश्वतरीरथोऽश्वतरीभिर्युक्तो रथो रजतादिभिरन्यैर्वा श्वेतीकृतो

धिको होतुः होत्रे देयः। सर्वाभ्यः क्रतुदक्षिणाभ्योऽधिको होत्रे दातव्य इत्यर्थः॥११॥ इति श्री

मदाश्वलायनश्रौतसूत्रवृत्तौ नारायणीयायां नवमोऽध्यायः॥९॥ ॐ ज्योतिर्ऋद्धिकामस्य।

ऋद्धिर्नाम पुत्रपशुअन्नाद्यादिभिर्वृद्धिः। तत्कामस्य। ज्योतिर्नाम एकाहो विधीयते। न

वसप्तदश प्रजातिकामस्य। नवसप्तदशो नाम एकाहः। तेन प्रजातिकामो यजेत। प्रजा

तिकामः प्रजासंपत्तिं कामयमानः। विषुवत्स्तोमो भ्रातृव्यवतः। विषुवत्स्तोम एका

हः। गोरभिजिच्च। गोरभिजिच्चद्वावेकाहौ भ्रातृव्यवतः चशब्दबलादेकेक एव भ्रातृव्य

वतो न संयुक्तौ। गोरुभयसामा सर्वस्तोमो बुभूषतः। अयमपरो गोसंज्ञक उच्यते॥

सं० वृ० ३ २ अनेन विशेषणेन उभयसामा सर्वस्तोमश्च। तेन च बुभूषन् यजेत भवितुमिच्छन् महत्त्व
११६ मिच्छन्नित्यर्थः। आयुर्दीर्घव्याधेः। यस्य दीर्घकालमनुवृत्तो व्याधिः स दीर्घव्याधिः सः आ
युरित्येकाहनाम। पशुकामस्य विश्वजित्। ब्रह्मवर्चसकामवीर्यकामं प्रतिष्ठाकामानां प्रजाकाम
पृथग्ज्यान्यादितः पृथक्कामैः। एतेषां चतुर्णां कामानां चत्वार एकाहाः। एकैकस्य एकैकं।
एतेषां यथासंख्येन प्रकृतयः। पृष्ठस्यादितश्च त्वार्यहानि पृथक्कामैरित्यनेन वचने
न कामानां यथासंख्यं लभ्यते। इत्यतिरात्राः। ज्योतिरादीनामेवायं संख्याविधिर्न पूर्वे
षां। पूर्वेषां तु क्वचित्। क्वचित्तं संख्याविहितैवः। तेषामाद्यास्त्रय एकाहिकशस्त्राः। ज्यो
तिः संज्ञकत्वादस्याभिप्लविकस्य प्रथमस्याह्नस्तेनास्य ज्योतिष्टोमातिदेशः प्राप्नुयात्। ११६
विषुवत्स्तोमस्य च विषुवत्ता कथंचित्प्राप्नुयात् तदाशंकानिवृत्त्यर्थं त्रयाणामेकाहिक

हा

शस्यमुक्तं। इत्येकाहाः। यएतेनुक्रांते। नवमेध्याये क्रतवएवमंनास्तएकाहसंज्ञावेदि
तव्याः। अथाहीनाइत्येनेनैव पूर्वेषामेकाहत्वेसिद्धेएकाहवचनंवरुणप्रघासस्थाने
द्व्यहः साकमेधस्थानेत्र्यहः इत्येवमादीनांद्व्यहत्र्यहायामार्त्विज्यनिषेधाद्योहीनध
र्ममाभूवन्नित्येवमर्थं। अथाहीनाः। अथानंतरमहीनावक्ष्यंतइत्यर्थः। तेचएवंप्र
काराइत्याह। द्व्यहप्रभृतयोद्वादशरात्रपरार्घ्याः। अग्निष्टोमादयः। अतिरात्रांतामा
सापवर्गाः। अपरिमाणदीक्षाः। उपसदोद्वादशनियताः। द्विरात्रादिषुसुत्याहानि
द्व्यहादीन्येवमासस्यावशिष्टानिषोडशपरार्घ्याहानीतितत्प्रभृतीन्येकादशांतान्य
हानितेषांप्रातिलोम्येनदीक्षाहानिविज्ञेयाः। एतदुक्तंभवति। यथाक्रमेणद्विरात्रा
दिषुद्वादशपर्यंतेषुदीक्षाहानीत्यर्थः। एवमंतेनैवन्यायेनद्वादशाहेमासापवर्गे

सं०वृ०उ ४ प्राप्तेवचनात्।षड्त्रिंशदहत्वंभवति।असत्यपरिमाणदीक्षतेवस्यात्।नसंवत्सरमित्ये
११७ वमर्थः।एकाहांश्चैतरेयिणः।ऐतरेयिणआचार्याएकाहानपिमासांवर्गानपरिमाणदीक्षा प
117 नामनंति।साहस्रशश्चदक्षिणाः।तएवाचार्याःएकाहेषुसर्वेषुसहस्रदक्षिणत्वमामनं
ति।अतिरात्रांश्चसर्वशः।तएवाचार्याःसर्वानेकाहानतिरात्रसंस्थानाहुः।तत्राहांसंख्याः
संख्याताःषडहांताअभिप्लवात्।तत्राहीनप्रकरणेयाअहांसंख्याःसंख्याताःषडहप
र्यंतास्ताअभिप्लवात्षडहाद्वेदितव्याः।षडहांतानामहीनानामाभिप्लविकान्यहान्यादि
तआरभ्ययादर्थंप्रकृतयइत्यर्थः।संख्याताइतिवचनमसमाम्नातव्यावृत्त्यर्थं।तेनस
माम्नातानाभिप्लवःप्रकृतिः।असमाम्नातानांपृष्ठ्यःप्रकृतिरितिसाधितंभवति।अति ११७
रात्रस्त्वत्यःसंख्यापूरणोऽहीनानां।अतिरात्रांताइत्युक्तंतदतिरात्रांतत्वंगृहीतेरेवाहा

भिर्यदा संख्यापूरणं भवति तदा गृहीतानामेव यदंत्यमहस्तदेवातिरात्रसंस्थं कर्तव्यं। ना
न्यथेति। यत्र तु पुनर्गृहीतैः संख्यापूरणं नास्ति तत्रैवमित्याह। हीनो वैश्वानरो धिकः। यत्र
गृहीतैरहोभिः संख्याहानिर्भवति तत्र वैश्वानरोधिकः। वैश्वानरोंते कर्तव्यः। वैश्वानरश
ब्देन प्रकृतोतिरात्रो गृह्यते। हीनाविवातिरात्रांतत्वमहीनानामिति शेषः॥१॥ आंगिरसं
स्वर्गकामः। इदानीमहीना उच्यंते। आंगिरसो नामायमहीनः। तेन स्वर्गकामो यजेत। यो
वा पुण्याहीनो नुप्रेप्सुः स्यात्। यः पुरुषः पूर्वं पुण्येषु सुखभागित्यर्थः। ततः पश्चात्सु
खभाक्कृत्वा भ्रष्टो हीनः स पुनरपि तमेव भावं प्राप्तुमिच्छन् अनुप्रेप्सुरित्युच्यते। स वा अने सु
नांगिरसेन यजेत। चैत्ररथमन्नाद्यकामः। कापिवनं स्वर्गकामः इति द्व्यहाः। इत्येते त्र्यो
ह्यहाः। प्रथमस्य तूत्तरस्याहस्तात् स्यंतृतीयसवनं। त्र्याणां प्रथमस्यांगिरसस्य द्वितीये

स०व०३४ हनि यत्तृतीयसवनं तत्तृतीयस्याभिप्लविकस्य यत्तृतीयं सवनं तेनातिरिक्तमित्यर्थः। द्वैतीय

११८ स्यायमपवादः। त्वंहिक्षैतवदिति चाज्यं। आंगिरस्याद्द्वितीयेहन्येतदाज्यं भवति। त्र्यहा उक्ताः।
गर्गत्रिरात्रं स्वर्गकामः। गर्गत्रिरात्रमित्यहीननाम। तस्य मध्यमस्याह्नो वामदेव्यं पृष्ठं। वि

118 शोविशीयमग्निष्टोमसाम। मध्यमसेवाहनः। वारवंतीयमुत्तमे। अग्निष्टोमसामेतिशेषः।
गर्गत्रिरात्रस्योत्तमेहनीत्यर्थः। त्वमग्नेवसूंरिति चाज्यं। उत्तम एवाहनीत्यर्थः। बैदत्रिरा
त्रं राज्यकामः। इदमप्यहीननाम। सर्वेत्रिवृतोरात्राः। वैदत्रिरात्रे सर्वाण्यहानित्रिवृत्स्त
तिरात्रसंस्थानि च भवंति। छंदोमपवमानांतर्वसू पशुकामः। छंदोमपवमानश्च अंतर्व
सुश्च तयोर्द्वावहीनौ। तयोरन्यतरेण पशुकामोयजेत। पराकछंमपराको स्वर्गकामः॥ ११८
पराकछंदोमपराकश्च तयोरन्यतरेणेत्यर्थः। इति त्र्यहाः। इत्येते षड्त्र्यहा उक्ताः। गर्गत्रि

रात्रशस्याः। एषामनुक्तशस्याये।तेग गत्रिरात्रशस्या इत्यर्थः। अत्रेश्चतुर्वीरं वीरकामः। अ
त्रेश्चतुर्वीरमित्यहीननाम वीरकामः पुत्रकाम इत्यर्थः। तस्य वीरवत्याज्यानि। तस्यात्रेश्च
तुर्वीरस्य चतुर्ष्वहःसु यान्याज्यानि तानि वीरशब्दयुक्तानि कर्तव्यानि। प्रथमेहनि पूर्वमि
हनि पूर्वप्राप्तस्य तोकशब्दवत्वान्नदेव वीरत्वमपि स्यादित्युत्तरेषु वीरवंति विदधाति। य
मग्ने वाजसातमेति द्वितीयेहन्याज्यं। अग्नायो मर्त्य इति तृतीये। अग्निं नर इति चतुर्थे। प्र
कृतत्वादेवास्य चतुर्वीरत्वसंप्रत्यये सिद्धे पुनस्तत्प्रापणार्थं तस्येति वचनं। षोडशिमच्च
तुर्थं। षोडशिमच्चतुर्थमित्यस्य विधेः सर्वाहीनसंप्रत्ययार्थं। सर्वेष्वहीनेषु यच्चतुर्थम
हस्तत्षोडशिमच्च कर्तव्यमित्यर्थः। तस्याभित्वा वृषभासुत इति गायत्रीषु रथंतरं पृष्ठं।।
तस्यात्रेश्चतुर्वीरस्यैवायुजोर्यद्रथंतरं तद्गायत्रीषु रथंतरं कर्तव्यं। इदमपि तस्य ग्रहणा।

सूत्र

सू० वृ० ३ २ पूर्वस्यसर्वार्थत्वायेवा।अनुष्टुप्बृहतीषुबृहत्।तस्यैवचतुर्वीरस्यसुजोर्यत्।बृहत्तदनुष्टुप्
११९ सुबृहतीषुवाकर्तव्यं।अनुष्टुब्बृहतीनामृचामत्रानुविधानादेवताःसमाम्नाताइतिग
म्यते।चतुर्थेत्वंवलस्यगोमतोयज्ञायथाअपूर्व्येतिवा।अत्रेश्चतुर्थमहस्तस्मिन्यद्बृहत्त
119 त्वंवलस्यगोमतइत्यासुवायज्ञायथाअपूर्व्येत्यास्कवानियमेनकर्तव्यं।जामदग्न्यंपुष्टि
कामः।जामदग्नमित्यहीननाम।तस्यपुरोळाशिन्यउपसदः।तस्यजामदग्नस्ययाउ
पसदस्ताःपुरोळाशिन्योभवंति।नाज्याहविषउपसदांपुरोळाशत्वविधानंतासांतत्र
होमपक्षेदर्विहोमत्वमस्तीतिज्ञापनार्थं।वैश्वामित्रंभ्रातृव्यवान्।प्रजाकामोवसिष्ठ
संसर्पं।वैश्वामित्रंसवसिष्ठसंसर्पमित्यहीननाम।इतिचतुरहाः।इत्येतेचत्वारश्चतुर ११०
हाअनुक्रांताः।सार्वसेनंपशुकामः।दैवंभ्रातृव्यवान्।पंचशारदीयंपशुकामः।व्रतवं

तमायुष्कामः। वावरं वाक् प्रवदिष्णुः। वाक् च प्रवदिष्णुः। वाचः प्रवदिष्णुरित्यर्थः। इति पंच
पंचरात्राः। इत्येते सार्वसेन दैव पंचशारदीय व्रतवद्वावरमिति पंच पंचरात्रा उक्ताः। पंच
ग्रहणमेतावंत एव पंचरात्राः नान्ये असमाम्नाता अपीति। पंचशारदीयस्य तु सप्तदशो
क्षाण ऐंद्रामारुता मारुतीभिः सह वत्सतरीभिः सप्तदशभिः सप्तदशभिः पंचवर्षपर्य
ग्निकृताः सवनीयाः। पंचभिर्वर्षैः समाप्यत इति पंचशारदीयः। तस्यायं विशेषः। ऐंद्रा
मारुताः सप्तदशोक्षाणः सवनीया भवंति। इंद्रश्च मरुतश्च येषां देवता नां त ऐंद्रामारु
ताः। उक्षाणो गोवृषाः। तेषामयं संस्कारो यागकालात्पुरस्तात्संच वर्षाणि प्रतिवर्षमा
रुतीभिः वत्सतरीभिः सह पर्यग्नि कर्तव्याः तउक्षाणः। मरुतो देवता आसामिति मारु
त्यः। ताश्च सप्तदश आद्यावेव पंचशारदीयेन यक्ष्य इति संकल्प्य ततः पशुबंधविधाने

स०पृ०उ२ नोक्ष्णा उपाकृत्यैंद्रमरुद्भ्यां वत्सतरीभ्यां मरुद्भ्यां उपाकृत्य पर्यग्निकरणांते वत्सतरीराल
१२० भंते। उक्ष्णां उत्सृजंत्येवं पंच वर्षाणि वर्षे वर्षे कर्तव्यं। तएवास्मिन्पंचशारदीये पंचरात्रे
120 सवनीया भवंति। तेषां त्रीस्त्रीश्चतुर्थेहः स्वालभेरन्। परिशिष्टान्पंच पंचमे। पंचग्रह
भु णं तेषु नष्टेवा मृतेषु वा शास्त्रांतरोक्तेन विधानेन सप्तदश संपाद्य पूर्वेष्वहःसु त्रीस्त्री
नालभ्य पंचमे पंचालभेतेत्येवमर्थः। इतरथा नष्टेषु मृतेषु वा यथासंभवमालंभः
स्यात्। तन्निवृत्त्यर्थं पंचग्रहणं। व्रतवतस्तत्तृतीयस्याह्नः स्थाने महाव्रतं। व्रतवतः पं
चरात्रस्यायं विशेषः। आभिप्लविकस्य पंचाहस्य तृतीयमहरुद्धृत्य तत्स्थाने महाव्र
तं कृत्वान्यत्सर्ववत्कर्तव्यं। एष पंचाह उत्तमः। आभिप्लविकस्यायमपवादः॥२॥ कृ १२०
त्स्नां षळहं प्रतिष्ठाकामः। कृत्स्नां षळहमित्यहीननाम। पृष्ठ्यः समूळ्हो व्यूळ्हो वाऽ

भिप्लवापवादः। पृष्ठ्य इति विशेषवचनेपि व्यूढसमूढविकल्पे सिद्धे यदुभयग्रहणं
तद्विशेषवचने समूढ एव स्यात्। न व्यूढ इत्येवमर्थं। पृष्ठ्यावलंबं पशुकामः। पृष्ठ्या
वलंबस्याहान्युच्यंते। पृष्ठ्य पंचाहो भ्यासक्तो विश्वजिच्च। पृष्ठ्यं पंचाहो भ्यासक्तः विश्व
जिच्च षष्ठमहः। अभ्यासक्तस्वरूपमुच्यते। प्रथमस्याह्नो द्वे सवने त्रिवृत्स्तोमे भवतः।
पंचदशात्तृतीयसवनं। द्वितीयस्य पंचदशे द्वे सवने। सप्तदशात्तृतीयसवनं। तृतीयस्य
सप्तदशे द्वे सवने। एकविंशात्तृतीयसवनं। एवमुत्तरेष्वपि योज्यं। एवमभ्यासक्तो भवति।
संभार्यमायुष्कामः। पृष्ठ्य त्र्यहः। पूर्वोभिप्लवत्र्यहश्च। अभिप्लवत्र्यहश्च पूर्व एव द्वयोस्त्र्य
हयोः संभरणात् संभार्यनामाहीनो भवति। एते त्रयः षडहा उक्ताः। ऋषिसप्तरात्रमृ
द्धिकामः। प्राजापत्यं प्रजाकामः। छंदोमपवमानव्रतं पशुकामः। जामदग्न्यमन्नाद्य

स्तू० वृ० ३४ कामः। एते चत्वारः पृष्ठ्यो महाव्रतं चो। एते चत्वारः सप्तरात्रा उक्ताः। ऋषिसप्तरात्र प्राजापत्यं छं
१२१ दोम पवमानव्रतजा मदग्नाः तेषामियमहः क्लृप्तिः। अविशेषवचनात्समूह्लः पृष्ठ्यो भवति।
व्रतं तु स्वस्तोमं प्रथमे। यत्प्रथमे सप्तरात्रे महाव्रतं तत्स्वस्तोमं भवति। पंचविंशस्तोममित्यर्थः।
सप्तदशं द्वितीये। द्वितीये सप्तरात्रे महाव्रतं सप्तदशस्तोमं भवति। छंदोमपवमानं तृतीये।
छंदोमशब्देनात्र तत्संबंधिन स्तोमा उच्यते। चतुर्विंशश्चतुश्चत्वारिंशाष्टाचत्वारिंशास्तृती
येसप्तरात्रे यन्महाव्रतं तस्य पवमाने षु यथाक्रमं भवति। शेषस्वस्तोमएव। चतुर्विंशो बहि
ष्पवमानः सप्तदशः शेषश्चतुर्थः। चतुर्थे सप्तरात्रे यन्महाव्रतं तस्य बहिष्पवमानः चतुर्विं
शस्तोमो भवति। शेषः सप्तदशस्तोम [illegible] इति। ऐंद्रमस्यन्याः प्रजा बुभूषन् [illegible] यः अन्याः १२१
प्रजाः अतीत्य भवितुमिच्छेत् सः अनेनैंद्रेण यजेत। त्रिकद्रुका अभिजिद्विश्वजिन्महाव्रतं

सर्वस्तोमः। त्रिककुका इत्यभिप्लवत्र्यहः पूर्व उच्यते। सर्वस्तोमक्लृप्तेनेन गोरुभयसामा सर्वस्तो
मइत्यत्र गृह्यते। ऐंद्रस्येयमहःक्लृप्तिः। जनकसप्तरात्रमृद्धिकामः। अभिप्लवचतुरहो विश्वजि
न्महाव्रतं ज्योतिष्टोमः। जनकसप्तरात्रस्याहःक्लृप्तिरुच्यते। अभिप्लवचतुरहो विश्वजिन्म
हाव्रतं ज्योतिष्टोम इति। पृष्ठ्यस्तोमो विश्वजिच्च पशुकामस्य सप्तमः। सप्तमः सप्तरात्र उ
च्यते। तस्य नाम शास्त्रांतरादवगंतव्यं। अहःक्लृप्तिस्तावदुच्यते। पृष्ठ्य एव षडहः केवलं बृ
हद्रथंतरपृष्ठः पृष्ठस्तोम उच्यते। विश्वजिच्च सप्तमं भवति। सप्तममहर्भवति। अनेन प
शुकामो यजेत। एते सप्तरात्राः। देवत्वमीप्सितोऽष्टरात्रः। देवत्वं प्राप्तुमिच्छतोऽष्टरात्रो भव
ति। अस्यापि नाम अन्यतोऽवगंतव्यं। पृष्ठ्यो महाव्रतं ज्योतिष्टोमः। इयमस्याहःक्लृप्तिः। ए
क एवायमष्टरात्र उक्तः। नवरात्रमायुष्कामः। पृष्ठ्यस्त्रिककुकाश्च। पूर्वस्याहःक्लृप्तिरि

स्तं०वृ०उ४ यं। त्रिककुकाः पृष्ठ्यावलंबशतिपशुकामस्य। त्रिककुकाउक्ताः पृष्ठ्यावलंबोनामषळहउक्ता
१२२ स्तस्ययान्यहानितानीहभवंतीत्यर्थः। इतिनवरात्रौ। द्वावेतोनवरात्रो। अनयोरपिनामनी
शास्त्रांतरादवगंतव्ये। त्रिककुबध्यर्धः पृष्ठ्यः महात्रिककुब्समूळ्होनवरात्रः। समूळ्हस्त्रि
ककुप्समूळ्हः। नवरात्रइत्यनुवर्तते। चतुष्टोमस्त्रिककुबध्यर्धोभिप्लवः। एतैश्चतुर्भिः
। स्वानांश्रैष्ठ्यकामोयजेत। एतेस्त्रिककुंमहात्रिककुप्समूळ्हस्त्रिककुप्चतुष्टोमत्रिक
कुद्भिः स्वानांश्रैष्ठ्यकामोयजेत। एतेषांदशमोवैश्वानरएवभवति। कामश्चैतेषामेकेके
नसंबध्यते। कुसुरुबिंदुमध्यिकामः। त्रयाणांपृष्ठ्याहानामेकेकंत्रिः। कुसुरुबिंदोरियम
हर्वृत्तिः। अत्रापिदशमोवैश्वानरएव। छंदोमवंतंपशुकामः। पृष्ठ्यावलंबस्यप्राविश्व ग्र १२२
जितश्छंदोमादशमंचाहः। छंदोमवतस्मान्यहानिपृष्ठ्यावलंबस्यषळहस्ययान्यहानि

तेषांविश्वजितःप्राक्त्रयस्त्रिंशोमाः अविवाक्यंचैकं ततोविश्वजिद्दशममहर्भवति।उराभि
चरन्।पूर्नामदशरात्रः तस्याहानि।ज्योतिर्गामभितोगोरभिजितंविश्वजिदायुषं।ज्योति
र्नामैकाहः।सगोनामाभितःउभयःकर्तव्यः।गोश्वाभिजितमभितः।विश्वजिदायुषाभि
तःकर्तव्यः।वैश्वानरोदशममहर्भवति।शालंलीपिंगंश्रीकामः।शालंलीपिंगस्यएतान्यहा
नि।अभिप्लवत्र्यहःपूर्वस्त्रिः।त्र्यहंसमाप्यआवर्तयितव्यां।इतिदशरात्राः।इत्येतेष्टौदशरा
त्रा।इत्येपौण्डक्ताः।१।पौण्डरीकमृद्धिकामः।पृष्ठ्यस्तोमस्त्रिंशोमागोतमस्तोमोविश्वजि
त्।पूर्ववन्नवरात्रोमहाव्रतंवैश्वानरइतिवा।उभयथापौण्डरीकोभवति।अथसंभार्यौ।
एतयोःसंभार्ययोःनाम्नोरन्यतःकामोवगंतव्यः।अहःक्लृप्तिरुच्यते।अतिरात्रश्चतु
र्विंशोमध्यधोभिप्लवः।पृष्ठ्योवा।उभयोःसंभार्ययोरतिरात्रश्चतुर्विंशोसाधारण्योध्यर्द्धो

न श्रौ

त्रा ते

इंद्रवज्रंथ्यात्व्यवान्॥

स०दृ०उ४ भिप्लवः।पूर्वस्यैव।अध्यर्धपृष्ठ्यस्योत्तरस्यैव।इंद्रवज्रस्याहः कॢप्तिः।पृष्ठ्यस्याद्ये अहनीव्य
१२३ त्यासमानवरात्रात्।पृष्ठ्यस्यादितोद्वे अहनीव्यत्यस्यकर्तव्ये।यवन्नावाहानिभवंतीम
123 हाव्रतांत।ततोवैश्वानरः।एवंपंचप्रकाराएवादशरात्रउक्ताः॥८॥अथद्वादशाहाभवेयुः।
अथानंतरंयेवक्ष्यंतेद्वादशाहाभवेयुः।भवंतीत्यर्थः।सत्राणिभवेयुः।अहीनावा।तेद्वा
दशाहाः सत्राणिभवेयुः।अहीनावाभवेयुः।यदासत्राणितदोभयतोतिरात्रत्वंबहुय
जमानत्वं।इत्यादयोधर्माभवंति।यदापुनरहीनास्तदाग्निष्टोमात्वंमासापवर्गत्वंमहा
व्रतसहितेष्वपिमाणदीक्षत्वमित्येवमादयोधर्माभवंतीतिद्वैविध्यवचनं।उक्तोदशरा
त्रः।उक्तवचनमत्रातिरिच्यते।अन्यत्रोक्तंवचनंतरेणातिदेशादर्शनात्।यथापृष्ठ्यः १२३
सप्लृक्लृप्तोव्यूढक्लृप्तोवेत्येतेचत्वारः पृष्ठ्योमहाव्रतंचेत्येवमादिषु।तेनोक्तवचनस्यप्रयोजन

वत्कर्तव्यं। इदमुच्यते। उक्तो दशरात्र इत्येतदुक्तं भवति। द्वादशाहावयवभूतानि यानि दशा
हानि तानि तत्रैव युंजीत कृत्यं दशरात्र इति वचनमकृत्वोक्तानि। तस्यैव वचनस्य द्वादशाहार्थ
त्वेव प्रयोजनमिति। अत्रोक्तिस्तु पंचविंशतेरह्नां बहुत्वात्तन्निर्भमित्वाद्दशरात्र इत्यनेनाभिप्रा
येणासंज्ञितानां च तदंतर्भावात्तेन तत्रैव युंजीकरणं कृत्यं दशरात्रं नाम च सो कर्या कृतमि
ति मंतव्यं। अतो द्वादशाहाभवेषु प्रकृति दशरात्र इत्यनेनाभिप्रायेण उक्तवचनं कृतवा
नाचार्यः। तथा च श्रुतौ। छंदोगानां बहुधाः श्रूयते। द्वादशाहस्य दशाहानीति। स च द
शरात्रो द्विविध उक्तः। समूढो व्यूढो वा। समूढो व्यूढश्च अनेन प्रकारेण द्वौ द्वादशाह
वत्रोक्तौ समूढो व्यूढश्च तत्र द्वादशाहोऽहर्गणानां प्रकृतिरिति न्यायात्सर्वाहर्गणानां प्र
कृतिरित्यवगतः। तत्र तावंतरेण व्यूढो दशरात्र एषा प्रकृतिः सत्राणां इति विशेषग्रह

सू०वृ०३४ णात्सत्राणां व्यूढोहीनानां समूढ इत्यवसितं भवति। तमभितोतिरात्रौ। तमभितोतिरात्रा
१२४ विति तं द्विविधं दशरात्रं अभितोतिरात्रौ प्रकृतौ भवत इत्यर्थः। एवं व्यूढः समूढश्च द्वाद
शाहावित्याह। संभार्ययोर्वा वैश्वानरमुपदध्यात्। यो संभार्यनामवेकादशरात्रौ तयोर्वै
124 श्वानरमधिकं। कृत्वा द्वौ द्वादशाहावन्यौ भवतः। अहीनेष्वहीनो वैश्वानरोधिक इति प
रिभाषायैव प्राप्त एव वैश्वानरे इति वचनमिदं सत्रपक्षे प वैश्वानरस्य प्रापणार्थं। संव
त्सरं प्रवहं श्रीकामः। अतिरात्रश्चतुर्विंशं विषुवद्वर्जे नवरात्रो महाव्रतं। संवत्सर
स्य प्रवह्लस्याहानीमानि। अयं द्वादशाहोहीन एव श्रीकाम इत्येकवचनेन उपदेशात्प
रिभाषाप्राप्त वैश्वानरोपजीवनाच्च। अथ भरतद्वादशाहः। अथशब्दोहीनकैवल्यबु १२४
द्धिविच्छेदार्थः। सत्राहीनसाधारणाश्चत्वारो द्वादशाहाः उक्ताः। तत एकोहीनयुक्तः॥

उत्तमश्चसाधारणएव।अतस्तद्विच्छेदार्थमयमर्थशब्दःप्रयुक्तः।इममेवैकाहंपृथक्सं
स्थाभिरुपेयुः।भरतद्वादशाहस्याहःक्लृप्तिः।इममेवप्रकृतैकाहंपृथगेताभिःसंस्थाभि
र्युक्तंद्वादशकृत्वःकुर्युः।विकृतिषुप्रकृतेः।संनिहितत्वादिदमुच्यते।उत्तरत्रसंस्थावि
धानादेवसंबंधेसिद्धेपृथक्संस्थाभिरितिवचनं।वचनादेवस्थाननियमोनातिदेशा
दितिज्ञापनार्थं।अतिरात्रमग्रेथाग्निष्टोममथोक्थ्यानथाग्निष्टोममथातिरात्रं॥ ७
द्वादशाहसामान्येनप्राप्तानांसंस्थानांविधीयमानभरतद्वादशाहेअयमपवादः।इति
द्वादशाहाः।इत्येवंप्रकाराद्वादशाहाआम्नाताश्चवेदितव्याः।तेरात्मनाबुभूषंतःप्रजया
पशुभिःप्रजनयिष्यमाणाः।स्वर्गलोकमेष्यंतःस्वानांश्रैष्ठ्यमिच्छंतउपेयुर्वायजेतवा।
संवत्सरप्रवहस्यकेवलाहीनत्वात्कामनोपेक्षत्वाच्चइतरेषांपंचानामेवात्रग्रहणं॥

स० वृ०३४ आत्मनात्वभ्यर्षंत आत्मना भवितुमिछंत आत्मकैवल्यमिछंत इत्यर्थः। चत्वार एते कामाः। पं
१२५ चदशाहाः। तेनानंतर्ययोगो न भवति सर्वैः सर्वैरधिक्रियेरन्न नियमेनेत्यर्थः। ते यजेत
125 वा उपेयुरिति संबंधः। उपेयुरिति सत्रलिंगं। यजेतेत्यहीनलिंगं। इति पृथक्त्वं। इत्येतदे
व सत्राहीनयोः पृथक्त्वं भेद इत्यर्थः। सर्वत्रापि यदुपेयुशब्दचोदितं भवति सत्सत्रमेव।
तथा यजेतेत्येकवचनचोदितं तदहीन एव। एतदुक्तं भवति। सत्राहीनत्वे बहुयजमानै
कयजमानत्वादिकृत एव भेदो न धर्मस्य भेदकृत इति। अथ सामान्यं। अथेदानीं सत्राही
नयोरसमाम्नातयोः साधारणो विधिरुच्यत इत्यर्थः। अपरिमितत्वाद्धर्मस्य प्रदेशान्व
क्ष्यामः। धर्मप्रदेशेनात्र प्रथमसमाम्नातकर्माण्युच्यंते। प्रदिश्यंते ज्ञायंते। ये रूपा ये १२५
रसमाम्नातान्यपि कर्माणि तदुपायाः प्रदेशा उच्यंते। ते च विध्येकदेशभूतत्वात्प्रदेश

शब्दवाच्याः। एतदुक्तं भवति। कर्मणां समाम्नातानां चापरिमेयत्वात्तेषामेकैकशो वक्तु
मशक्यत्वात्सामान्येन तत्स्थानोपायान्। विध्येकदेशभूतान्वक्ष्याम इति। के तदुपायाः क
स्थानं थं वा तदुपायैः। असमाम्नातानां कर्मणां संभवतीति तमुपायमुत्तरेण दर्शयति। यथा हि
परिमिता वर्णा अपरिमितां वाचो गतिमाप्नुवंत्येवमेव परिमितानां ह्यपरिमिताः संघा म
ताः। यथा अकारादयः वर्णाः त्रिषष्टिसंख्यादिपरिमिता एव स्थानकरणानुप्रदानादि
भिर्गुणैः सम्यगुच्चारणाय शिक्षिताः संतः सर्वस्याः पदवाक्यभूताया अपरिमिताया वा
च उच्चारणाय शक्तिं स्थानं च उत्पादयंति। एवं पंचविंशतिरहानि परिमितान्येव सम्यक्
परिज्ञातानि च भवंति। तैरेवापरिमिताः संघाताः समाम्नाताश्च कर्तव्यतया चोच्यंत इ
ति। यथा दावयवभूतवर्णज्ञानेन पदवाक्यज्ञानवत्संघातावयवभूताहर्ज्ञानेन संघातज्ञा

सू०वृ०३ ४ नमेवउपपघतइतिदृष्टांतः।एतमेवार्थमुत्तरसूत्रं स्पष्टयति॥ सिद्धानि त्वहानि तेषां यः कश्च
१२६ समाहारः सिद्धमेव शास्त्रं। यथा हि परिमिता वर्णाः सर्वां वाचो गतिमाप्नुवंति। एवमत्रापि
126 सिद्धानि परिज्ञातान्यहानि तत्र यो यः संघातः समाम्नातः असमाम्नातश्च संघातः पं
चविंशतेरह्नामेव नान्येषामतः संघातशास्त्रमपि सिद्धमेव समुदायिभ्यः अनन्यत्वात्स
मुदायस्येति सिद्धं। अह्नां तु शंसेयस्तोमपृष्ठसंस्थाभिरेके व्यवस्थां। समाम्नातेषु च सं
घातेष्वहर्द्वारेण शास्त्रज्ञानमित्युक्तं। इदानीं येष्वसमाम्नातेष्वहरेव न ज्ञायत इदमेवे
ति तत्राह्नां संशये सति एवमेके आचार्या अहर्व्यवस्थामाहुः। निश्चयमिच्छंति। स्तोमपृ
ष्ठसंस्थाभिर्लिंगभूतैरह्नामुत्पत्तौ त्रिवृदादीनां स्तोमानां अन्यतमेन रथंतरादीनां पृष्ठा १२६
नामन्यतमेन अग्निष्टोमादीनां संस्थानामन्यतमयागसंयुक्तान्येवोत्पद्यंत इति वदंतः।

तदकृत्वं दृष्ट्वाव्यतिक्रमस्यातदकृत्वमसार्वत्रिकमित्यर्थः। उत्पन्नोत्तथोत्पन्नानाम
पिव्यवहारकाले व्यभिचारदर्शनादित्यर्थः। ततो नायं नियमेहेतुः। छंदोगैरेवकृत्वासम
यमह्नोबार्हतराथंतरतायामेकाहेनशस्यंराथंतराणां। अयमेवाहर्निश्चयोपायः। छंदो
गैः समयः संगमः। संवादइत्यर्थः। तैः संवादेनाह्नोबार्हतराथंतरत्वनिश्चयं कृत्वाराथं
तराणांप्रकृतेकाहेनशस्यंवेदितव्यं। द्वितीयेनाभिप्लविकेनबार्हतानां। बार्हतानांपुन
र्द्वितीयेनाभिप्लविकेनशस्यंवेदितव्यं। अपिवाकयाशुभीयतदिदासीयेएवनिविधानीये
स्यातामेकाहिकमितरत्। अथवायमन्यः पक्षोसमाम्नातेबार्हतानांराथंतराणांचम
रुत्वतीयनिष्केवल्ययोः कयाशुभीयतदिदासीयेनिविधानीयेभवतः। अन्यत्सर्वमेका
हिकमिति। अत्रत्रयः पक्षाः संति। अहः शंसेयस्तोमादीनांत्रयाणामानुगुण्येनतद्दृशा

स०वृ०उ ४ देवशास्यनिश्चयः। अन्यथा चेद्वार्हतत्वराथंतरत्वेनोपाधिनाशस्यनिश्चयः। अस्मिन्नेव पक्षे ए
१२७ तेनिविक्षाते। अन्यदैकामित्ययं वाशास्यनिश्चय इति। सर्वत्र छंदोगैः संवाद आदरणीयः॥५॥
सर्वान्कामानाप्स्यन्त्सर्वा विजितीर्विजिगीषमाणः सर्वा व्युष्टीर्व्यसिष्यन्नश्वमेधेन यजेत। ॥
127 सर्वान्कामान्साकल्येनाप्तुं यः कामयेत वा सर्वा विजितीः इंद्रियजयपर्यंता जेतुमिच्छति यो
वा सर्वा व्युष्टीः विभूतीः व्यसिष्यन् व्याप्तुमुद्युक्तः सोश्वमेधेन यजेत॥ व्युष्टिर्विभूतिरि
त्यर्थः। विपूर्वस्याश्नोतेस्त्यन तस्य रूपं। राज्ञोभिषिक्तस्यायं यज्ञः। नेतरयोर्जात्योः। अश्व
मुत्स्रक्ष्यन्निष्टीभ्यां यजेत। येनाश्वेन मध्येहनि यष्टव्यं तमश्वं विधिवदुत्सृजति। समुत्स्र
क्ष्यन् वक्ष्यमाणाभ्यामिष्टीभ्यां यजेत। अग्निर्मूर्ध्वन्वान्। पूर्वस्यामेवैका देवता। विराजौ १२७
संयाज्ये। संयाज्याग्रहणं विस्पष्टार्थं। पौष्णी द्वितीया। पूषा देवता द्वितीयेष्टेरित्यर्थः॥ ॥

त्वमग्नेसप्रथाअसिसोमयास्तेमयोभुवइतिसद्वंतौ।आज्यभावित्यर्थः।तांचित्रश्रवस्त
मयद्याहिश्वंतदग्नयेइतिसंयाज्ये।अश्वमुत्सृज्यरक्षिणोविधायसावित्र्यास्तिस्रइष्टयो
रा हरहर्वैजितंत्राः।एवमश्वमेधेनयक्ष्यइतिसंकल्प्यएताभ्यामिष्ट्वाअश्वमुत्सृज्यतस्यर
क्षकान्विधायततः संवत्सरमहरहस्त्रिषुसवनेषुसावित्रीभिरिष्टिभिर्वैराजतंत्राभिर्य
जेत।सवितासत्यप्रसवःप्रसवितासविता।सत्यप्रसवइत्याद्यायामिष्टौसवितुर्गुणाः।
प्रशब्दोमध्यमायां।एवंसगुणत्वेसत्यपिदेवतानांपूर्वसूत्रेसावित्रीभिरितिनिर्गुणा
नधितानिर्देशंकुर्वन्ज्ञापयति।निर्गुणस्यसवितुर्योधर्मउपांशुत्वंनामसगुणस्याप्य
त्रभवतीति।यइमाविश्वाजातान्यादेवोयातुसवितासुरत्नःसघानोदेवःसवितासहा
वेतिद्वे।सत्यप्रवसस्यपूर्वोक्तेएव।समामास्फसमामास्फदक्षिणतआहवनीयस्याहि

स्त०वृ०उ०७ रण्यकशिपावासीनोभिषिक्ताय पुत्रमात्यपरिवृताय राज्ञे पारिप्लवमाचक्षीत। समामा
१२८ वितिवीप्सावचनात्पारिप्लवाख्यानमपि संवत्सरमहरहः कर्तव्यमिति गम्यते। पारिप्ल
मिति प्रथमेहनीत्यादेराख्यानस्याख्या। हिरण्मये कूर्चेध्वर्युरासीनः प्रतिगृणाति। अ
ध्वर्युरपि हिरण्मये कूर्चे आसीनः प्रतिगृणाति। आख्यास्यन्नध्वर्यवित्याह्वयीत। आ
ख्यानमारप्स्यमानो होता अध्वर्युः अध्वर्यो इत्याह्वानं करोति। होहोतरितीतरः। एव
माहूतोध्वर्युर्होहो तरिति प्रत्याह्वानं करोति। अयमेव प्रतिगरः अत्रैव प्रवक्तव्यो ना
न्यत्र॥६॥ प्रथमेहनि मनुर्वैवस्वतस्तस्य मनुष्या विशस्त इम आसत इति गृहमेधिन
उपसमानीतास्स्युस्तानुपदिशत्यृचो वेदः सोयमिति सूक्तं निगदेत्। अत्र पूर्वोक्तमेव १२८
व्याख्यानं नान्यत्किंचित्। अध्वर्यो इत्युक्त्वा एवमारभते। प्रथमेहनि मनुर्वैवस्वतस्त

८म स्य मनुष्या विशस्त आसते। एतद्यथा सूत्रं कर्तव्यं। अस्यायमर्थः। अस्मिन्प्रथमे ऽहनि म
नुर्वैवस्वतस्तत्रे अधिपतिसंति तस्य राज्ञो मनुष्या विशः। तद्राज्ञो पजीविन इत्यर्थः। तद्
तिप्रकृता मनुष्या अतिदिश्यंते। इम इति पुरोवर्त्तिना मनुष्या निर्दिश्यंते। तान्मनुष्या
नादाय समंउपवेश्य तान्निर्दिश्य प्रदर्श्य त इम आसत इति वदति। गृहमेधिन उपस
मानीतास्फस्तानुपदिशति। गृहमेधिन इति मनुष्यविशेषणं। ते च कुटुंबिन इत्यर्थः।
अन्यदुक्तार्थमुपदिशति निर्दिश्य त इम आसत इत्याख्यानावयवं वदतीत्यर्थः। त
इम आसत इत्येव मंत्रमुक्त्वा अनंतरमृचो वेदः सोयमिति वदति। अस्यायमर्थः॥
अस्मिन्नहनि ऋग्वेदो वेद इति। कोयमृग्वेदो वेदो नामेत्यपेक्षायां सोयमृग्वेद इति
व तस्य स्वरूपदर्शनार्थं यत्किंमसूक्तमादित आरभ्य आंतान्निगदेत्। एवमन्येह न्याख्या

स०वृ०३४ तव्यं। अत्रविशेषः। द्वितीयान्यहोराजातदर्थमानेतथावेतिनिगमेध्वंचाभिधते। द्वितीयेहनि ये
१२९ यमोवैवस्वतस्तस्यपितरोविशस्तइमआसतइतिस्थविराउपसमानीतास्युस्तानुप
दिशतियजुर्वेदोवेदः सोयमित्यनुवाकंनिगदेत्। स्थविरावृद्धाः। तृतीयेहनिवरुण
आदित्यस्तस्यगंधर्वाविशस्तइमआसतइतियुवानःशोभनाउपसमानीतास्युस्ता
नुपदिशत्यथर्वाणोवेदः सोयमितियज्ञेषजंनिशांतस्यात्तंनिगदेत्। भेषजमि
भिषजप्रतिपादकंमंत्रब्राह्मणस्येत्यर्थः। चतुर्थेहनिसोमोवैष्णवस्तस्याप्सरसोविशस्ता
इमाआसतइतियुवानःशोभनाउपसमानीतास्कस्ताउपदिशत्यांगिरसोवेदः सोयमि
तियद्घोरंनिशांतस्यात्तंनिगदेत्। घोरमिति। अभिचारादिप्रतिपादकमित्यर्थः। पंचमेह १२९
न्यर्बुदःकाद्रवेयस्तस्यसर्पाविशस्तइमआसतइतिसर्पाःसर्पविदश्चपसमानीतास्यु

सू०वृ०उ४ सतइतिवयांसिब्रह्मचारिणइत्थपसमानीतास्युस्तानुपदिशतीतिहासोवेदःसोयमितीति
१३० हासमाचक्षीत।दशमेहनिधर्मइंद्रस्तस्यदेवाविशस्तइमआसतइतिस्रुवानःश्रोत्रिया
अप्रतिग्राहकाइत्थपसमानीतास्फस्तानुपदिशतिसामवेदोवेदःसोयमितिसामगा
यात।एवमेतत्सर्वायशःसंवत्सरमाचक्षीत।एवमेतत्सारिप्लवाख्यानंपर्यायशःसंव
त्सरमाचक्षीत।दशमीदशमीसमापयन्।दशमीदशमीसंपादयन्संवत्सरमाचक्षी
त।संवत्सरांतेदीक्षेत।ततःसंवत्सरेतीतेदीक्षेत॥७॥त्रीणिसुत्यानिभवंति।अश्व
मेधेत्रीणिस्फत्यानिभवंति।गोतमस्तोमःप्रथमं।द्वितीयस्याह्नःपशोरुपाकरेकालेश्व ण
मानीयबहिर्वेद्यास्तावेवारुपयेयुः।अध्वर्यवइतिशेषः।सचेदवघ्रायाउपवर्तेतवा १३०
यत्तसमृद्धिविद्यात्।अवजिघ्रेत।चकम्येतवेत्यर्थः।अन्यतरमश्वःकुर्यात्।तदाय

त्रसमृद्धिर्भवतीति जानीयात्। नेचेत्स्फगव्यं नो वाजी स्वश्व्यमिति यजमानं वाचयेत्। संशये तदुभयं न कुर्यात्। अश्वस्तदा नैमित्तिकमिदं। स्फगव्यं नो वाजी स्वश्व्यमिति यजमानं वाचयेत्। होतारमवस्थितमुपाकरणाय यदृक्कं दद्यादित्येकादशभिः स्तोत्रप्रणुवन्। तमिति वचनेन स्तोतृत्वचोदनाया अपि एतत्संस्कारकर्मत मश्वमभिदध्यादित्यर्थः। एकादशभिरित्युग्विशेषणं। स्तुतिविशेषणत्वे अभिधानासंभवात्। अप्रणुवन्निति प्रतिषेधसामर्थ्यात्सामिधेनीधर्मस्यैव चित्साम्निरवगंतव्या। तत्रैकश्रुत्वं। अत एकश्रुत्यार्धर्चे अर्धर्चे एव
कस्य सायप्रणुवन्। अनुस्वाध्यायमित्येके। यथाम्नात स्वरैरित्येके अनुमन्यंते। उभयोः पक्षयोः णे
म त्रिर्वचनमाद्योत्तमयोर्न भवति। अध्रिगो शमीध्वमिति शिक्षा षड्विंशतिरस्य वंक्रय इति वामानो मित्र इत्यावपेत। उपप्रागाच्छसनं वाज्यर्वेति च ह्वे। अध्रिगो शमीध्वमित्यस्मात्पुरस्ता

स०वृ०३४ साद्विंशतिरस्यवंक्रयइत्यस्माद्वापुरस्तान्मानोमित्रइतिसूक्तमावपेतउपप्रागादितिचद्वे
१३१ ऋचौ।अत्रापिनिगदांतःपातित्वात्।ऐकश्रुत्यंभवति।नान्यःसामिधेनीधर्मः।संज्ञप्तम
131 श्वंपत्न्योधून्वंतिदक्षिणान्केशपक्षानुद्ग्रथ्येतरान्प्रवृत्यसव्यानूरूनाघ्नां।उद्ग्रथ्यऊर्ध्वं नाः
ग्रंथयित्वाप्रवृत्यविस्रस्यसव्यैःपाणिभिःसव्यानूरूनाघ्नानाःदक्षिणैःपाणिभिःसंज्ञप्तम
श्वंवासोभिर्धून्वंतिपत्न्यः।अथास्मैमहिषीमुपनिपातयंति।अथानंतरमस्मादश्वा
यमहिषींज्येष्ठांभार्यामश्वसमीपेनिपातयंति।तांहोताभिमेथतिमाताचतेपिताचते
ग्रेवृक्षस्यक्रीळतः।प्रतिलामीतितेपिगर्भेमुष्टिमतंसयदिति।तांमहिषीमश्वसमीपे
शयानांमाताचतेपिताचतइत्यनयर्चाअभिमेथति।अक्रोशतीत्यर्थः।साहोतारंप्रत १३१
भिमेथत्यनुचर्यश्चिश्रतंराजपुत्र्योमाताचतेपिताचतेग्रेवृक्षस्यक्रीळतः।यीयस्वत

इवतेमुखंहोतर्मोलंवदोबाक्किति।सामहिषीहोतारंप्रत्यभिमेथाति अनुचरीभिः शतेन
राजपुत्रीभिःसहानयर्चा।वावातांब्रह्मोर्ध्वमेनमुछ्रयताशिरोभारंहरंनिव।अथास्ये
मध्यमेजन्तुशीतेवातेपुनर्निवेति।वावातांद्वितीयांभार्यांप्रत्यभिमेथातिब्रह्मा।साब्रह्मा
णंप्रत्यभिमेथत्यनुचर्यश्चशतंराजपुत्र्यऊर्ध्वमेनमुछ्रयतगिरोभारंहरंनिव।अथास्य
मध्यमेजन्तुशीतेवातेपुनर्निवेति।सावावातंब्रह्माणंप्रत्यभिमेथति।आत्मनोनुचरीभिः
शतेनराजपुत्रीभिःसह।सदःप्रसृप्यस्वाहाकृतिभिश्चरित्वा।सदःप्रसृप्येतिपुनःप्रस
र्पणाविधानादभिमेथतीत्यादिबर्हिर्वेद्यश्चसमीपेस्थिताकर्तव्यमितिगम्यते॥ ८॥ब्रह्मो
द्यंवदंति।ब्रह्मोद्यंनामवक्ष्यमाणमंत्रैःप्रश्नप्रतिवचनरूपेणयद्वचनंतस्येहसंज्ञा।कः
स्विदेकाकीचरतिकउस्विज्जायतेपुनः।किंस्विद्धिमस्यभेषजंकिंस्विदावपनंमहदितिहो

सं०ह्व०३४ ताध्वर्युं पृच्छति। सूर्य एकाकी चरति चंद्रमा जायते पुनः। अग्निर्हिमस्य भेषजं [illegible]
१३२ स भूमिरावपनं महदिति प्रत्याह। किंस्वित्सूर्यसमं ज्योतिः किं समुद्रसमं सरः। कस्वित्पृथि
व्यै वर्षीयान्कस्य मात्रा न विद्यत इत्यध्वर्युर्होतारं पृच्छति। सत्यं सूर्यसमं ज्योतिर्द्यौः समुद्र ति
समं सरः। इंद्रः पृथिव्यै वर्षीयान्गोस्तु मात्रा न विद्यत इति प्रत्याह। पृच्छामि त्वा चितये दे
व सख यदि त्वमत्र मनसा जगंथ। केषु विष्णुस्त्रिषु पदेष्वस्थः केषु विश्वं भुवनमावि
वेशेति ब्रह्मोद्गातारं पृच्छति। अपि तेषु त्रिषु पदेष्वास्मि येषु विश्वं भुवनमाविवेश।
सद्यः पर्येमि पृथिवीमुत द्यामेकेनांगेन दिवो अस्य पृष्ठमिति प्रत्याह। केष्वंतः पुरुष
आविवेश कान्यंतः पुरुष आर्पितानि। एतद्ब्रह्मन्नुपवल्हामसि त्वा किं स्विन्नः प्रतिवोचा १३२
स्यत्रेत्युद्गाता ब्रह्माणं पृच्छति। पंचस्वंतः पुरुष आविवेश तान्यंतः पुरुष आर्पितानि। एत

त्वात्र प्रतिबन्धनो अस्मिन्न मायया भवस्कन्नरो मादिति प्रत्याह । गांचमुपनिष्क्रम्यैकैकशो य
जमानं पृच्छंति पृच्छामि त्वा परमंतं पृथिव्या इति । स्वायतने प्राङ्मुखमुपविष्टं यजमानं एकैक
शो ऋत्विजः क्रमेण पृच्छंति पृच्छामि त्वा परमंतं पृथिव्या इत्यनयर्चा । इयं वेदिः परो अंतः पृ
थिव्या इति प्रत्याह । अनयर्चा यजमान इति शेषः । महिम्नावुरस्तादुपरिष्टाच्च वपानां
चरंति । अश्वमेधे महिमानो नाम ग्रहौ स्तः । तौ सौवर्णराजताभ्यां गृह्येते वपानामुभ
यतस्ताभ्यां चरंति । तयोरनुवाक्याप्रैषयाज्या वक्ष्यंते । सुभूः स्वयंभूः प्रथममंतर्महत्य
र्णवे । दधे ह गर्भमृत्वियं यतो जातः प्रजापतिः । होता यक्षत्प्रजापतिं महिम्नो जुषतां वे
तु पिबतु सोमं होतर्यजेति प्रैषः । तवेमे लोकाः प्रदिशो दिशश्चेति याज्या । अश्वो जस्तूप
रो गोमृग इति प्राजापत्याः । अश्व एकः पशुः । तूपरो जस्य विशेषणं तत्वशृंगता । गोमृगो

सू०वृ०उ४ न्यः पशुः। एते त्रयः प्रजापतिदेवत्याः पशवः। इतरेषां पशूनां प्रचरंति। अश्वादीनां यागानं
१३३ तरं इतरेषां पशूनां वपादिभिः प्रचरंति। तेषां प्रचारदेवतामाह। वैश्वदेवी क्लृप्तिः। वैश्वदे
वतात्वदेवत्वेन तेषां प्रचारः क्लृप्तिः। विश्वेदेवा एषां देवते त्यर्थः। पंचमेन षष्ठ्याह्ना शस्यं
सूक्तस्य। अश्वमेधे यद्द्वितीयमहस्तस्य शस्यं सूक्तस्य षष्ठ्यस्य पंचमेनाह्ना व्याख्यातं।
षष्ठ्यग्रहणं विस्पष्टार्थं॥ ९॥ तस्य विशेषान्वक्ष्यामः। प्रतिज्ञासूत्रमिदं। प्रतिज्ञाप्रयो
सर्व जनं च तस्यैं प्रकारस्य प्रगाथानेक इत्यादिकल्पयुक्तस्य ग्रहणार्थं। आग्नं तं मन्य इत्या
ज्यं। तस्यैकाहिकमुपरिष्टात्। एवं द्विसूक्तमाज्यं भवति। प्रउगतृचे स्वैकाहिकास्तृ
चाः। उपरिष्टात्कर्तव्या इत्यर्थः। त्रिकद्रुकेषु महिषो यवाशिरमिति मरुत्वतीयस्य प्रति १३३
पदेकात्तृचस्थाने। ऐकाहिकोनुचरः। सूक्तेषु चांत्यमुत्स्यैकाहिकमुपसं शस्य तस्मि

न्निविदं दध्यात्। इंद्र पिब तुभ्यमित्येतदुक्थं त्यक्त्वा तत्स्थाने ऐकाहिकं सूक्तमुपशंस्य तस्मिन्नैका
हिके निविदं दध्यात्। उपसंशस्येति वचनं पूर्वेण सूक्तेन एकसूक्तत्वप्रदर्शनार्थं। अतोत्र सं
शये सति तस्मादपि पुरस्तात्कयाशुभीयादिभिर्भवति। अतिरात्रस्त्वंत्य इति वचनादति
रात्रसंस्थमेव भवति। सर्वेषु सर्वस्तोमग्रहणेषु गोरुभयसामा सर्वस्तोम इत्येष एव ग्र
हीतव्यः। नाश्वमेधे। अश्वमेधे त्वहीनत्वात्तृतीयमाभिप्लविकं ग्रहीतव्यं। षष्ठहं ताप्र
भिप्लवादिति वचनात्स एव सर्वस्तोमोतिरात्रश्च कर्तव्यः। भूमिपुरुषवर्जमब्राह्मणानां
दक्षिणा वित्तानि प्रतिदिशमृत्विग्भ्यो ददाति। प्राचीदिग्घोतुर्दक्षिणा ब्रह्मणः। प्रतीच्यध्वर्योरुदी
च्युद्गातुः। एता एव होत्रका अन्वायत्ता अन्वायत्ताः। होत्रकशब्देनात्र अमुख्या उच्यंते॥
स्वस्य स्वस्य मुख्यस्य या यादिक् तामेव दिशं तदीयाः पुरुषाः अन्वायत्ताः। ऋत्विग्भ्य इति।

सू०वृ०उ४ वचनंताभ्योदिग्भ्यआहत्यदक्षिणायथेतंनीलादातव्यमित्येवमर्थः॥१०॥इत्याश्वलायन
१२४ श्रौतसूत्रवृत्तौनारायणीयायांदशमोध्यायः॥हरिःॐ।अथैतेषामह्नांयोगविशेषा
न्वक्ष्यामोयथायुक्तानियस्मैयस्मैकामायभवंति।पंचविंशतिरहान्युक्तानि।एतेभ्यए
वाहोभ्योहीनैकानितिअतिदेशप्रसंगात्तेहीनैकाहाउक्ताः।अथेदानींतेषांसात्रिका
णांअह्नांयोगविशेषात्।संघातविशेषात्।सत्रशब्दवाच्यान्वक्ष्यामः यथायथातान्यह
निव्यतिषक्तानिसत्राणिभूत्वायस्मैयस्मैकामायभवंतितथातथावक्ष्यामइत्यर्थः।अ
यमेवैकाहोतिरात्रआदौप्रायणीयः।अयमेवेतिज्योतिष्टोमोगृह्यते।एकाहग्रहणं
संनिहतस्याश्वमेधस्याह्नांग्रहणंमाभूदिति।एषसत्राणामादौकर्तव्यःप्रायणीय १२४
संज्ञश्चभवति।एषोंत्यउदयनीयः।एषएवसत्राणामंतेभवतीत्यर्थः।सउदयनीयसं

त्रोभवति। अव्यक्तो मध्ये। अव्यक्त इत्यविशेषित इत्यर्थः। सत्राणां मध्ये वा क अविशेषितो
यो ऽतिरात्रो विहितः स ज्योतिष्टोमोऽतिरात्र इत्यर्थः। तावंतरेण व्यूळ्हो दश। तयोः प्रायणी रात्रः
ययोदयनीययोरतिरात्रयोर्मध्ये व्यूळ्हो दशरात्रो भवति। एषा प्रकृतिः सत्राणां। एवं
रूपो द्वादशाहः सत्राणां प्रकृतिर्भवति। तत्रावापस्थानं। अस्यां प्रकृतौ सिद्धायां त्रयोद
शरात्रादिषु सत्रेषु अहरावापे कर्तव्ये सति आवापस्थानमुच्यते। ऊर्ध्वं दशरात्रादेका
हार्थं महाव्रतं। एकाहेन प्रयोजने साध्ये तस्यावापस्थानं इदमूर्ध्वं दशरात्रादुदयनीया
त्प्राक् महाव्रतमावप्तव्यं। एकहावापे साध्ये महाव्रतमेवावप्तव्यमुदयनीयात्प्रागेवेति
उभयत्र नियम्यते। प्राग्दशरात्रादितरेषामह्नां। महाव्रतादितरेषां व्यूहादीनामह्नां।
महाव्रतादितरेषां व्यूहादीनामह्नां आवापस्थानं प्राग्दशरात्रात्प्रायणीयादूर्ध्वं भवति।

स्०वृ०७४ द्व्यहार्थेगोआयुषीत्र्यहार्थेत्रिककुकाः।अभिप्लवत्र्यहंपूर्वंत्रिककुकाइत्याचक्षते।चतु
१३५ रहार्थेत्रिककुकामहाव्रतंच।आयुषीअपिमहाव्रतंदशरात्राहूर्ध्वमेव।इतरेषामिति
वचनात्।पंचाहार्थेभिप्लवपंचाहः।उत्तमस्यतुषष्ठात्तृतीयसवनं।अभिप्लवपंचाहे
135 यदुत्तममहः।पंचमंतस्यस्वंतृतीयसवनंउत्सृज्यअभिप्लविकस्ययत्तृतीयसवनंतदत्र
कर्तव्यं।षष्ठहार्थेभिप्लवःषष्ठहः।एवंन्यायाआवापाः।शास्त्रांतरोक्ताहरंतएवायेप्यावा
पस्थायमेवन्यायइत्यवगंतव्यं।षष्ठहांताःपुनःपुनः।एवमावापन्यायसमाप्तेयावत्स
योजनंपुनः।पुनरेकाहादयः।षष्ठहांताआवापाः।कर्तव्यइत्यर्थः।पूर्णःपूर्णश्चषष्ठहस्तं
त्रत्तामेवगच्छति।प्रकृतितांगच्छतीत्यर्थः॥१॥द्वेत्रयोदशरात्रौ।कएतेयोगविभागाः।उच्यं १३५
ते।अत्रद्व्यादयःसंख्याःप्रदर्शनार्थाः।अन्येप्यसमाम्नाताबहवःसंतीति।ऋषिकामानां

स्तीति तांस्सर्वान् कर्तव्यतयासूचितवानाचार्यः। सहभस्मानमित्यस्मिन्पक्षे दक्षिणेनवि
हारं नीत्वा गार्हपत्यायतने निधानं॥ ततइष्टिरग्निस्तपस्वान्जनद्वान्पावकवान्। एकात्र
देवता। सचाग्निस्त्रिभिर्गुणैर्युक्तः। आयाहि तपसा जनेष्वग्ने पावको अर्चिषा। उपेमां सु
ष्टुतिं मम। आनो याहि तपसा जनेष्वग्ने पावक दीद्यत्। हव्या देवेषु नो दधदिति। प्रणीतेनु
गते प्राग्घोमादिष्टिः। अग्निहोत्रार्थं प्रणीत आहवनीयेनुगते प्रायश्चित्तत्वेनेयमिष्टिः क
र्तव्या। प्राक्पूर्वाहुतिप्रक्षेपादेषैवेष्टिः प्रायश्चित्तिर्भवति। उत्पत्तिस्तु ब्राह्मणोक्ता भवति।
तदाहुर्यस्याग्निमनुद्धृतमादित्योभ्युदियाद्वाभ्यस्तमियादित्यादि हिरण्यं पुरस्कृत्य साय
मुद्धरेद्रजतमंतर्धाय प्रातरुद्धरेदित्यत्रोक्ता इयमेवोत्पत्तिरस्मिन्नवसरे। प्रणीतो वाग्घो शा२
मादुपशाम्येदिति वचनात्। अग्नावनुगते तराहुती इति वक्ष्यति। उत्तराहुत्यां हुताया

श्रौ०टी०२ मग्न्युत्पत्तेः प्रयोजनं नास्ति। एवमग्निहोत्रे निर्वाह इत्यस्मत्सूत्रानुसारेण मन्यामहे। अग्नि
१३८ ज्योतिष्मान्वरुणः। द्वे देवते। ज्योतिष्मानित्यग्नेर्गुणः। उदग्ने शुचयस्तवाग्ने बृहन्नुषसमूर्ध्वो
अस्थादिति। सर्वेश्चेदनुगतानादित्योभ्युदियाद्वाभ्यस्तमियाद्वाग्न्याधेयं पुनराधेयं वा। य
138 दि सर्वेष्वग्निष्वनुगतेषु आदित्योस्तमुदयं वा गच्छेत्तदाग्न्याधेयं पुनराधेयं वा प्रायश्चि
त्तं भवेत्। अनयोरेव कालयोः शास्त्रांतरे गार्हपत्याहवनीययोः द्वयोरेवानुगतावेतत्प्रा
यश्चित्तमुक्तं। तस्मिंश्छास्त्रे दक्षिणाग्निर्भिन्नयोनिः। अत एवं विनिवेशः। एकयोनित्वे स
र्वानुगमने भवति भिन्नयोनित्वे द्वयोरेवानुगमन इति। अत्राग्न्याधेयपुनराधेयाभ्यां से
ष्टिके ते गृह्येते। अग्न्युत्पादकत्वसामान्यात्। एतदर्थमेवाधानाद्द्वादशरात्रमित्यत्र सेष्टि १३८
केष्वाधाने आधानशब्दप्रयोगः संव्यवहारार्थं कृतः। तस्मिन्काले सर्वदा सर्व एवाग्नयो

विहृता एव प्रायेणासते। तत्र केवलगार्हपत्यानुगमने मंथनेनोत्पाद्य तप्स्वती कार्येत्युक्तं।
दक्षिणाग्न्यनुगमनेपि स्वयोनितो विहृत्य सैवेष्टिः कार्या। आहवनीयानुगमनेपि प्राय
श्चित्तविशेष उक्तः। द्वयोर्द्वयोरनुगमने तान्येव यथासंभवं कर्तव्यानि। अतः सर्वानुगम
नमेव मवशिष्यते। अतः सर्वशब्दाविवक्षायामपि नैमित्तिकस्य स्वभावपर्यालोचनया
सर्वानुगतावेवैतद्भवतीति मंतव्यं। एकयोनित्वभिन्नयोनित्व उक्तो विनिवेशः। उभयो
रनुगमनेपि विधीयमानस्याग्न्याधेयस्य सर्वोत्पादकस्वभावात्यागात्तद्विधानसाम
र्थ्याद्देवानष्टोपि दक्षिणाग्निर्नष्ट इति गम्यते। विहृतेष्वेवं भवति। अविहृतेष्वपि किं गा
र्हपत्यानुगमने सर्वानुगमोस्ति न वा। अस्तीति ब्रूयात्। तत्र हि सर्वेग्नयः समवेता इति
गम्यते। ततो विहरणदर्शनात्। कथं तत्र समवायः। अंगारसमवायस्तावन्नास्ति॥ ॥

श्रौ०वृ०२ कर्मार्थं पृथक्कृतानां कर्मसमाप्तौ तत्रैवानुगमनदर्शनात्। अर्थोयमभिप्रायः। अंगाराश्रयो य
१३९ योदक्षिणाग्न्याहवनीयाख्यः। शास्त्रगम्यः स कर्मसमाप्तौ गार्हपत्यांगारानानुप्रविशति
अन्यथा तत्तदुद्धरणविधानं नोपपद्यते। तत्संसर्गे संसर्गदोषश्च नास्ति। अंगारसंसर्गो
हि सः। तथा च शास्त्रांतरे वचनं यदि पूर्वोनुगतः संचार्यं पश्चाद्विसतर्हिगत इति। ए
वमपि न युज्यते। अविहृतावस्थायां गार्हपत्ये गार्हपत्यं प्रज्वल्येति सूत्रप्रयोगात्।।
तथा च शास्त्रांतरे सूत्रकारप्रयोगो मंत्रवर्णप्रयोगो दृश्यते। गार्हपत्यमभिमंत्रयते।।
स्फ गार्हपत्य इति। तेनावगम्यते। तत्रानुप्रवेशोऽग्न्यंतरस्य नास्तीति। यत्तु नः पश्चाद्विसन
र्हिगत इति। तदप्यन्यपरं यदि हि सर्वदानुगतस्याहवनीयस्य गार्हपत्यात्समापयनेनैवो १३९
त्पत्तिः स्यात्तदेवैतल्लिंगमनुप्रवेशस्य। तत्र हि शास्त्रे मंथनादग्न्युत्पत्तिरुक्ता। अतोस्या

यमर्थः। यस्मिन्ननुगमने गार्हपत्यात्प्रणयनेनोत्पत्तिरुक्ता तदानुगतेंतरासंचरणम
विरुद्धं मंथनोत्पाद्येनुगतेप्यंतरानसंचरितव्यमिति। अतोन्यपरत्वादेवास्यवाक्यस्या
नुप्रवेशोलिंगंनभवतितुमर्हति। अतस्तत्रसमवायः प्रत्यक्षेणशास्त्रेणवालक्षयितुंन
शक्यते। कथं तर्हि ततउद्धृतआहवनीयादिर्भवति। वचनगम्योहिसः। वचनमेवंभव
ति गार्हपत्यंप्रज्वल्यदक्षिणाग्निमुद्धृत्यगार्हपत्यादाहवनीयंज्वलंतमुद्धरेदिति। तेना
धिकृतेनपुरुषेणातन्नियुक्तेनवाग्निहोत्राद्यर्थंस्वकालेयथोक्तेनविधिनायउद्ध्रियते
सएवाहवनीयादिर्भवति। नान्यथा। अन्यथोद्ध्रियतेतदासमोप्युतमग्निंविक्षेपप्रा दे
यश्चित्तंकर्तव्यंनान्यत्। अभ्युदितेष्टौतुवचनान्मध्योद्धृतोप्याहवनीयादिर्भवति। एवं
तर्हिकर्मांतराव्काव्ठे क्का सोतिष्ठति। वयमपिनजानीमः। क्कासोतिष्ठतीति। एतावदत्रा

श्रौ०वृ०२ वगंतुंशक्यते। सर्वकर्मार्थमग्नय आहिताः। तत्र गार्हपत्यो यावज्जीवं धार्यते वचनात्॥
१४० इतरे तु कर्मणि कर्मण्युध्रियेते। गतश्रियः सर्वे धार्यंते वचनादेव। नान्यदतो वगंतुं शक्य
ते। एवं सति कर्मापूर्ववत्तिष्ठति। यथा यागादिजनितान्यपूर्वाणि यावत्फलभोगसंबंधं ति
ष्ठंति तथाहवनीयादिरपि तिष्ठतीति। अतोनुद्धृतेषु गार्हपत्यानुगमने सर्वानुगमनं ना
स्तीति तत्राग्न्याधेयं पुनराधेयं वा न कर्तव्यमिति सिद्धं। समारूढेषु चारणीनाशे। अग्नि
ष्वरण्योः समारूढेषु सत्सु अरण्योर्नाशेग्न्याधेयं पुनराधेयं वा कर्तव्यं। अन्यतरारणी
नाशेपि भवत्येतत्प्रायश्चित्तं। तयोरेकैकस्या एव कार्यविशेषे नियमाज्ज्ञायापतिसंस्कृ
तत्वाच्च। नन्वरणीनाश इति शब्द एकस्यामप्यनष्टायां न प्रवर्तत इति। सत्यमसौ शब्दो १४०
न प्रवर्तते तथापि मंथनपदार्थो नैकया संपादितुं शक्य इति। अनष्टापि नष्टेवेति कृत्वो

क्तं। यदि परमनष्टामेवाद्विधाकृत्वा मंथनसिद्धिरिति। तथापि नैवं वक्तुं शक्यते। उपादान
काले अरणी आहरेदितिद्वयोरुपादानमदृष्टार्थं स्यात्। इति युक्तं कार्यभेददर्शनादिति।
एवं सति उर्वशी पुरूरवः संस्कृतिरधरोत्तरयोररण्योः श्रूयमाणा चोपपन्ना भवतीति
युक्तं। १२। अथाग्नेय्य इष्टयः। अथानंतरं यावक्ष्यंते ता अग्निदेवता इष्टय इति वेदितव्य
मित्यस्य सूत्रस्यार्थः। यान्यत्र चतुर्थ्यंतानि पदानि तान्यग्नेर्गुण वाचकानीत्यर्थः। एते
नावगम्यते सर्वत्र चोदितैव देवता चोदनायां सत्यां। असत्यां तु चोदनायां याज्यानुवा
क्यालिंगादवगंतव्या देवता॥ गुणास्तु चोदनात एवावगंतव्याः। कथं तर्हि वैश्वानरपा
र्जन्यायां वैश्वानरशब्दोग्नेर्गुणः। तयोरेव याज्यानुवाक्ययोरत्र प्रवेशात्। अत्र हि वै
श्वानरशब्दस्याग्निगुणत्वं चोदितमेवेति। व्रतानि पत्नो व्रतपतये। यस्मिन्कर्मणि या

 निचोद्यंतेअ्रतशब्देनधर्मशब्देनवातत्रतेषामतिपत्तौएषेष्टिः कार्या। सान्नाय्याग्निप्रणाय
 नेग्निवर्तोनिवृत्तकर्मणा अनिवृत्तकर्मणावाग्निनासाहितेआहवनीयायतनेयद्यन्यो

ग्निराहवनीयार्थउध्रियतेतमग्निमनिधायैवस्मरतिचेदायतनरूपमुहूर्त्यइदानीमु
द्धृतंनिदध्यात्। तथासतीष्टिर्नभवति। एतस्मिन्नपिपक्षेयधनप्रवृत्तकर्मोहूर्त्येतत
दाव्याहृतिहोमः कर्तव्यः। अप्रवृत्तकर्माचेन्नाकिंचिदपिप्रायश्चित्तंविद्यते। यद्यस्म
स्यैवतस्मिन्पूर्वप्रणीतेनिदध्यात्तदाइयमिष्टिः कार्या। क्षामायागारदाहेशुचयेसंस
र्जनेग्निनान्येन। अन्यइतिशब्दाग्निरुच्यते। मिथश्चेद्विविचये। गार्हपत्यादयःसर्वे
द्वौद्वौवापरस्परंयदिसंसृज्येरन्तदाविविचयइष्टिः कार्या। गार्हपत्याहवनीययो १८१
र्वृतये। पूर्वस्यायमपवादः। ग्राम्येणासंवर्गाय। ग्राम्यःपचनाग्निः। वैद्युतेनासुमते

वैश्वानराय विमतानामंनभोजने। विमताविमनस्काः शत्रव इत्यर्थः। द्विषदन्नं यद्या
हिताग्निर्भुंजीत तदा वैश्वानरायेष्टिः कार्या। एषैव कपाले नष्टे नुद्वासिते। केषांचिद
ध्वर्यूणां पुरोडाशश्रपणानंतरमेव कपालोद्वासनं॥ विहितं। केषांचित्कर्मसमा
प्तौ। केषांचिदनुद्वासनमेव। तत्र पूर्वपक्षयोरनुद्वासिते नष्टे एषेष्टिर्भवति। अनु
द्वासनपक्षेपि प्रयोगमध्ये भवति। प्रयोगसमाप्तौ न भवति विध्यपराधाभावात्॥
अभ्याश्राविते वा। येषां श्रपणानंतरमुद्वासनं तेषामनुद्वासिते कपाले सत्याश्राव
णे कृते प्येषेष्टिः कर्तव्या। स्फुरभय एव यस्मिं जीवन्मृतशब्दः। यस्मिन्नाहिताग्नौ जी
वत्येव मृत इति यादृशशब्दः संजायेत तदा इयमिष्टिः कार्या। एवशब्दो गुणानियमार्थः।
स्फुरभय एवन स्फुरभिमत इति। तेनान्यत्र गुणांतरसंबंधोप्यभ्युपगतो भवति॥ ॥

श्रौ०वृ०३ यथाक्षामायक्षामवर्त्तेवेत्येवमादि। त्वमग्नेव्रतपाअसियद्वोवयंप्रमिनामव्रतान्यग्निना
१४२ ग्निःसमिध्यतेत्वंह्यग्नेअग्निनाग्नेत्वमस्मद्युयोध्यमीवाअक्रंदद्ग्निस्तनयन्निवद्यौर्वि
तेविष्वग्वातजूतासोअग्नेत्वामग्नेमानुषीरीळतेविधोग्नआयाहिवीतयेयोअग्निंदेव
वीतयेकुविस्तुनोगविष्टयेमानोअस्मिन्महाधनेस्त्वग्नेसाधिष्ठवयदग्नेदिविजाअस्य
ग्निर्होतान्यसीदद्यजीयान्त्साध्वीमकर्देववीतिंनोअद्येति। यस्यभार्यागौर्वायमो
जनयेदिष्टिर्मरुतः। मरुतोयस्यामिष्टौदेवता। सान्नाय्येपुरस्ताच्चंद्रमसाभ्युदितेग्निर्दी
तेन्द्रःप्रदाताविष्णुःशिपिविष्टः। सान्नाय्यशब्देनामावास्यंकर्मोच्यते। तस्मिन्नारब्धे
सतिचंद्रमायदिपुरस्तादभ्युदियात्एतामिष्टिंकुर्यात्। अस्यांअमावास्याविकारत्वात्। १४२
प्रायश्चित्तेष्टीनांयोधर्मउपांशुत्वंवात्रेआज्यभागताचनभवति। एकदेशविकृतमनन्य

वञ्चवतीति। दृष्टधन्वं तावित्याह योमावास्याधर्मा एव भवंति। एतदुक्तं भवति। अकालेमावा
स्याकर्मण्यारब्धे सत्यकालोयमिति ज्ञाते तामेवामावास्यां देवताभिर्विकृतां समापयेत्।
अत्रकाले प्राप्तेपुनर्योगोस्ति नास्तीति अत्राध्वर्युभिः सहनिश्चयः कार्यः। ज्ञातागेर्गुणः।
प्रदातेंद्रस्या। शिपिविष्टो विष्णोः। अग्नेदादाशुषेरयिं सयंताविप्रएषांदीर्घस्तेअस्त्वंकु
शोभद्रातेहस्तासकृतोतपाणीवषड्ते विष्णावासआकृणोमिप्रतन्नेअद्यशिपिविष्टना
मेति। अपिवाप्रायश्चित्तेष्टीनां स्थाने तस्यै तस्यै देवतायै पूर्णाहुतिं जुहुयादिति विज्ञा
यते। प्रायश्चित्तप्रकरणे याः इष्टयः इष्टिशब्देनैवचोद्यंते याश्च ब्राह्मणोक्तास्तासामयं
वैकल्पिको विधिरुच्यते। यास्तासामिष्टीनां देवतास्तासामेकैकस्यै देवतायै एकैकां पू
र्णाहुतिं जुहुयात्। द्वादशगृहीतेन स्रुचं पूरयित्वा यत् हूयते सा पूर्णाहुतिरुच्यते। अथ

श्रौ० सू० ३ पुनरनुपक्रान्तदर्शपूर्णमासस्य भवति॥ दर्विहोममध्ये च। नान्यत्र भवति। हविषां स्कन्नमभि
१४३ मृशेद्देवांजनमगन्यत्तस्तस्य माशीरवतु वर्त्तां। भूतिर्घृतेन मुंचतु यज्ञो यज्ञपतिमंहसः॥
143 भूपतये स्वाहा। भुवनपतये स्वाहा। भूतानां पतये स्वाहा। यज्ञस्य त्वा प्रमयोन्मया भिमया प्रतिमया।
द्रस्य श्च स्कंदेति। देवांजनमित्यादिना स्कंदेत्यंतेन स्कंनं हविरभिमृशेत्। आहुतिश्चेद्
बहिष्परिध्याग्नीध्र एनां जुहुयात्। यदि हूयमानाहुतिर्बहिष्परिधि स्कंदेत्तदा तस्या स्कन्नाभि
मर्शने कृते तत आग्नीध्रस्तामादाय तूष्णीमेव जुहुयात्। हुतवते पूर्णपात्रं दद्यात्। हो
मं कृतवते आग्नीध्राय तदानीमेव येन केन चित्क्षान्यरसादिना पूर्णपात्रं दद्यात्। देवते
अनुवाक्ये याज्ये वा विपरिहृत्याज्य अवदाने हविषी वा। यद्वो देवा अतिपातयानि वा १४३
चान्च प्रयुती देवहेळनं। अरायो अस्माँ अभि दुच्छुनायतेन्यत्रास्मन्मरुतस्तानि धेतनस्वा

धर्नं हेत्याज्याहुतिं हुत्वा मुख्यं दद्यात्। देवताविपर्यास आवाहनादिष्वनुक्रमः। अनुवाक्या
विपर्यासोऽन्यदीयामन्यस्यानुब्रूयात्। एवं याज्याविपर्यासः॥ आज्यविपर्यासो जौहवऔ
पभृतयोरित्यादि॥ अवदानविपर्यासः पूर्वार्धात्स्विष्टमित्यादि। हविर्विपर्यासो निर्वप
पणादिष्वनुक्रमः। यागे चान्यदीयेनान्यस्य यागः॥ एतेषु सर्वेषु यद्देवत्याहुतिं हु
त्वा स्वगृहे यस्तत्प्रधानभूतं द्रव्यं तत्सोमकर्त्रे ब्राह्मणे दद्यात् यजमानः। हुत्वेत्यत्र समा
न कर्तृकमविवक्षितं। याज्यानुवाक्ययोस्तस्मिन्कर्मण्यविहितयोस्तद्देवत्ययो
रन्यदेवत्ययोर्वा विपर्यासे सति यागात्प्रागेव भ्रेषज्ञाने सति प्रायश्चित्तं पुनर्वृतिएवा कृत्वा
नूच्य यष्टव्यं। कृते तु यागे अनुवाक्याविपर्यासज्ञाने प्रायश्चित्तमेवं पुनर्यागाभ्यासः। न
याज्यायामप्यविहितायां तद्देवतायां विहितदेवतादेशं कृत्वा विहितमेव देवतांध्या

हि ३

श्रौ०सू०३ यन्यदि वषट्कुर्यात्तदापि नाभ्यासः। अन्यदेवत्यायामपि आदेशाध्याने विहितविपर्यये
१४४ स्यातां चेत्तदापि नाभ्यासः। अतोन्यथा चेद्यागावृत्तिः कार्या। यागविषयेपि हविर्विपर्या
से यागावृत्तिशंका नैव कर्तव्या। कृतत्वाद्यागस्य। एतद्धि लक्षणं यागस्य देवतोद्देशेन
स्वद्रव्यत्यागो याग इति। देवतानां व्यवहिते वास्मिन्कर्मणि द्रव्यमपि स्वमेव। अथायम
भिप्रायः। [illegible] अन्यस्यै संक
ल्पितत्वात्स्वत्वमपगच्छतीति। एवं चेत्तस्या अपि देवतायै यष्टुं न शक्यते स्वत्वाभावा
त्। अथ संकल्पनकाल एव यागः क्रियत इति। कृतत्वाद्विपर्यासे यागो नावर्तयितव्यः
।यागस्यावैगुण्यात्। तस्माद्यथासंकल्पकरणमेवात्रापराधो न यागासिद्धिरिति॥ १४४
यदि पुनराग्नेयेनाग्नीषोमीययागे कृते भ्रेषो ज्ञायेत तत्तदाग्नीषोमीयेणाग्नेयः कर्तव्यः।

संनिहितत्वात्तस्य द्रव्यस्य कार्यस्य चाभावात् तस्मिन्संनिहिते सति स्वद्रव्ये द्रव्यांतरोपा
दानमशक्यमिति। तस्मादेवं कृत्वा प्रायश्चित्तमेव कुर्यात्। अत्र व्याहृतिहोमश्च कार्यः।
एतद्विपर्यासे तरितव्यमत्रैवोक्तं। स्थानि नीमनावात्यदेवतामुपोथायावाहयेत्। यस्मि
न्कस्मिंश्चित्कर्मणि यष्टव्यां देवतामनावाह्यैवोत्तरं कर्म कुर्यात्तदा यावति गते स्मरति
तदैवोत्थायावाहयेत्। वर्तमानावधिस्वरेण न मंद्रेण। यदि मंद्रेणैव स्यादुपोत्थानं न
विदध्यात्। तस्यापयावाहनधर्मत्वात्तस्मादुपोत्थानविधानत्वान्न मंद्रत्वनियमः। अव
धिस्वर एवेति सिद्धं। मनसेत्येके। आज्येना स्थानिनीं यजेत्। यद्यस्थानिनीं प्रमदादावा
हयेत्। तदा तस्मिन्नेव क्रमे तां यजेत्। निगमेषु च निगमयेत्। यजेदिति वचनं तद्देव
त्यो याग एवायं नाहुतिहोम इत्येवमर्थं। १३॥ हविषि दुःश्रृते चतुःशरावमोदनं ब्राह्म

लौकिकाग्नावितिदेवतातः दक्षिणाग्निं पुनर्विहृत्य तत्रेति मंत्रेणाचार्यः २

श्रौ०सू०२ णान्भोजयेत्। यदा हविरपक्वं भवति तदा तेनैव हविषा तत्कर्म समाप्य चतुःशराव
१४५ परिमितव्रीहिभिरोदनं पक्त्वा चतुरो ब्राह्मणान्भोजयेत्। क्षामे शिष्टेनेष्ट्वा पुनर्यजेत्।
145 एकदेशक्षामस्याशक्यपरिहारत्वात्प्रायश्चित्तं न भवति। यदा पुनरदग्धं किंचिद
स्त्यवदानेभ्यो न पर्याप्तं च तदैतत्प्रायश्चित्तं भवति। अशेषे पुनरावृत्तिः। हविष्य
शेषे दग्धे पुनरावृत्तिः कार्या। पुनर्योगः पुनरावृत्त्योरयं विशेषः। वर्तमानं प्रयोगं
समाप्य पुनरप्यादित एवारभ्यं तात्क्रिया पुनर्योगः। पुनरावृत्तिस्तु वर्तमान एव
प्रयोगे नष्टस्य हविषः पुनरुत्पादनमिति। पुनरावृत्तौ तु पुनरुत्पादितेन हविषा स
एव प्रयोगः समापयितव्यः। अथ मनयोर्विशेषः। प्रागावाहनाच्च दोषे पुनरावृत्ति १४५
प्रसंगात्। सूत्रत्रयमारब्धं। आवाहनात्प्राग्घविर्दोषे सति पुनरावृत्तिरेव। अथ यत्सं

तंगुणभूतानां गुणभूतानामत्यंतमपि पुनरावृत्तिरेव। अत्यंतमित्याकर्मपरिसमा
प्तेरित्यर्थः। प्राक्स्विष्टकृत उक्तं प्रधानभूतानां यत्तु नर्हविषां व्यापत्तावित्युक्तं तत्प्र
धानहविषामेव स्विष्टकृतश्च प्रागेवेति चोभयमनेन नियम्यते तेनात्राङ्गानां पुन
रावृत्तिरेव। अवदानदोषेषु पुनरायतनादवदानं प्रसक्तानुप्रसक्तमिदं। मध्यात्पूर्वा
र्धाद्गृहीतस्यावदानस्य दोषे सति तस्य हविषो मध्यपूर्वार्धाभावात्सदप्यसदेवेति म
न्यमानः प्रधानहविषश्चेदाज्येनेष्टिमित्यादि कर्तव्यां अंगहविश्चेत्तु पुनरावृत्तिरेव।
मध्यपूर्वार्धयोरेव साधनत्वेनोपसंहारादिति यो व्यंतिष्ठते। तस्योत्तरमिदं सूत्रं॥ २
अवदानदोषेषु पुनरप्यवदानायतनान्मध्यात्पूर्वार्धादेवावदातव्यं आपेक्षितत्वात्त
योः शब्दयोरिति। चतुर्मुष्ट्यादिभिश्चर्वादिभिः संपादितं हविः सर्वयागार्थमेव। तत्रैद्य

श्री०दृ०२ वदानेनयागसिद्धौसत्यांतादर्थ्यंतत्रोपसंहृतंभवेत्।यत्कार्यार्थंयउपादीयतेतस्यतत्का
१८६ र्यकरणेतस्मिन्तितादर्थ्यंनापैति।अतस्तादर्थ्यानपायात्तेनैवहविषायष्टव्यमितिसि
146 द्धं।द्वेष्टेलिहदक्षिणांदद्यात्।प्रकृतमनुसृतं।सामेधुष्टेनेष्टेतस्मिंदक्षिणासाद्वेष्टे ∼प्रयोगेया३
दातव्या।नालिंभ्यइत्यर्थः।दक्षिणादानउर्वरांदद्यात्।सर्वार्थमिदंसूत्रं।सर्वे
षुकर्मसुविहितदक्षिणा ... दानेउर्वरांदद्यात्।सस्यसंपन्नाभू
मिरुर्वरेत्युच्यते।कपालंभिन्नमनपवृत्तकर्मयं गोत्र्यालाशतासरयासंदधामी
तिसंधायापोभ्यवहरेयुरभिन्नोघर्मोजीरदानुर्यतआर्तस्तदगन्पुनः।इध्मोवेदिः
परिधयश्चसर्वेयतस्यायुरनुसंतरंतु।त्रयस्त्रिंशत्तंतवोयान्वितन्वतइमंयज्ञंस्व १८६
धयायेयजंते।तेभिश्छिद्रंप्रतिदध्मोयजत्रस्वाहायज्ञोअप्येतुदेवानिति।अनप

वृत्तकर्मवचनात्पुरोडाशश्रपणाद्दूर्ध्वेनप्रायश्चित्तमितिगम्यते। एवमवलीढाभि
क्षितेषु। अवलीढानिश्वादिभिरभिक्षितानि तद्दर्शनादिभिः अन्यथाशुचिसंबंधी
निकपालान्यभिंनानिअप्येवंकुर्यात्। भेदाभावात्संधानमर्थलुप्तं। तेनाभिन्नइत्या
दिनाअपोभ्यवहरेयुः। अपएवान्यानिमृन्मयानिभूमिर्भूमिमगान्मातामातरम
प्यगात्। भूयास्मपुत्रैःपशुभिर्योनोद्वेष्टिस भिद्यतामिति। कपालेभ्योन्यानिमृन्म
यानिभिंनान्यभिंनानिचभूमिर्भूमिमितिमंत्रेण। अपएवाभ्यवहरेत्। नसंदध्यादि
त्यर्थः। यदिपुरोडाशःस्फुटेद्वास्यतेतवा वार्हस्प्येनंनिधायाभिमंत्रयेत। किमुत्स
सि त्तोकिमुत्स्रोष्माः शांतः शांतेरिहागहि। अघोरोयज्ञियोभूत्वासीदसदनंस्वमासी
दसदनंस्वमिति। माहिंसीर्देवप्रेरितआज्येनतेजसाज्यस्वमानः किंचनरीरिषः।

श्रौ०वृ०२ योगक्षेमस्यशांत्याअस्मिन्नासीरवर्हिषीति।स्फुटेतुभिंद्यादित्यर्थः।उत्पतेततउत्छेदित्य
१४७ र्थः।पूर्वोनिधानमंत्रउत्तरोभिमंत्रणार्थः।आनंतर्ययोगात्।अग्निहोत्रायकालेग्ना
वजायमानेप्यन्यमानीयजुहुयुः।अग्निहोत्रहोमार्थंप्रणयनकालेसमारूढोग्नि
र्मथ्यमानोयदिनजायेततदान्यंलौकिकमग्निमानीयप्रणीयतत्रैवहोमःकार्यः॥
एतदनुगतेनभवति।अनुगतेतुमंथनादितपस्वतीत्यंतंतत्रप्रायश्चित्तं।तत्राग्नि
संधानमेवमंथनप्रवृत्तौनिमित्तंनाग्निहोत्रहोमः॥समारूढेतुनैमित्तिकस्याभावात्।
अग्निहोत्रा[illegible]द्येवमंथनंसनिमित्तंनान्यत्।अतःसमारूढएवेतिसुक्तमुक्तांतेनानु
गतावजायमानेपियावज्जन्मतावन्मथितव्यमिति।ततस्तपस्वतीष्टिः।तत्राग्निहोमा १४७
होमोनुष्टितप्रायश्चित्तेनसह।यदिहोम[illegible]कालोतिपन्नस्तदामनस्वतीहोमश्चकार्यः॥

अथ्यन्यमितिअन्यशब्दालौकिकमग्निमानीयजुहुयुः। अपिशब्दाद्ब्राह्मणपाण्यादि

वक्ष्यमाणमपिगम्यते। पूर्वालाभउत्तरोत्तरं। अग्न्यादीनां पृथिव्यंतानां पूर्वपूर्वालाभे

उत्तरोत्तरं गृह्णीयुः। पूर्वालाभइति अलाभवचनात्। अलाभेवैचैनांतरविधिरयंनप्र ईर्ष्यां

तिनिधिनियमइति अध्यवसीयते। तेन दृष्टार्थानामंगानां मध्ये यस्य कार्यमस्ति देवका त

र्येनान्यत्। ब्राह्मणपाण्यजकर्णदर्भस्तंबाप्सुकाष्ठेषु पृथिव्यां। अग्नौसर्वसंभवात्॥

तस्य पृथग्योगभावः। पाण्यादीनांचतुर्णां इंधनादिप्रपणादिवर्जयित्वान्यत्सर्वं संभ

वतीति पृथग्भावः। काष्ठानामभावेविधानादुदककार्याण्यपिकाष्ठेषुनस्युरिति तेषां

पृथग्भावः। पाण्यादिषु पंचसु आहुतिधारणार्थासमिद्भवति। इंधनार्थास्तु नभवंत्येवस

मिधः। पृथिव्यां तु धारणार्थापि समिन्नभवति। काष्ठभावे तस्याविधानात्। एवमन्यदपि

श्री०गृ०३ विचार्य कर्तव्यं। कृत्वाल्पिमंथनं। होमं कृत्वानंतरमेव मंथनमपि भवति। अपिशब्दात्कालां
१४८ तरेपि मंथनं भवति। अत्र विनिवेशः। यदा प्रयाणकाले प्रयाणं परिसमाप्तं तदा होमानंत
रमेव मंथनं भवति। यदा त्वपरिसमाप्तं प्रयाणं तदा पुनरपि होमकाल एव मंथनमिति। तु
शब्दोवधारणार्थः। कृत्वा मंथनमेव भवति न पुनर्होम इति। प्राणो चेद्वासेनवरोधः। य
दि प्राणो जुहुयात्तदा ब्राह्मणस्य वासार्थिनो नावरोधः कार्यः। कर्णे चेन्मांसवर्जं। अत्राज
मांजवर्जनं भवति। स्तंबे चेन्नाधिशयीत। अत्र दर्भाणामनधिशयनं। अप्सु चेदविवेकः।
अत्राविवेको यां इमा भोजनीया इमा अभोजनीया इत्येवंरूपः। एतत्सांवत्सरं व्रतं। याव
ज्जीविकं वा। पूर्ववद्विकल्पप्रतिभासहेतुर्द्रष्टव्यः। अग्नावनुगते तराहुती हिरण्यउत्तरां १४८
जुहुयाद्धिरण्य उत्तरां जुहुयात्। आहुत्योरंतराग्नावनुगते सति हिरण्यं निधाय तस्मिं

द्वितीयामाहुतिं जुहुयात्। हिरण्य एव यथासंभवं शेषकार्याणि जुहुयात्। पुनरग्निरुपस्थ न
तव्यः। अभ्यासोऽध्यायपरिसमाप्त्यर्थः॥१४॥ इत्याश्वलायनसूत्रवृत्तौ नारायणीयायां तृतीयो ३॥
हरिः ॐ दर्शपूर्णमासाभ्यामिष्ट्वेष्टिपशुचातुर्मास्यैरथ सोमेन। उक्ता हविर्यज्ञास्तेषु च प्रायश्चि
त्तमुक्तं। इदानीं सर्वसोमानां प्रकृतिभूतं ज्योतिष्टोमं वक्तुकामस्त्व सर्वसोमानां प्रकृति
भूतं ज्योतिष्टोमं वक्तुमनु ऽधिकारिविशेषणार्थं केषांचित्कर्मणामनुष्ठानक्रममुक्त्वाना
चार्यः। इष्टिराग्रयणेष्टिः। पशुर्निरूढः। आधानानंतरं दर्शपूर्णमासयोरारंभ उक्तः। तदा
रंभोत्तरकाले इष्टिपशुचातुर्मास्यैरिष्ट्वा सोमेन यष्टव्यं। अथशब्दः सोमेन संबध्यते। स
चाधिकारार्थः। सोमगुणकं कर्म सोम इत्युच्यते। तच्च ज्योतिष्टोमाख्यं। एतदुक्तं भवति। अ
ग्न्याधेयानंतरमनेन क्रमेण दर्शपूर्णमासादिभिरिष्ट्वा ज्योतिष्टोमाख्येन सोमेन यष्टव्यं॥

* आगपि सोमेनैके २

श्रौ० सू० ४ इत उत्तरमाषष्ठाध्यायपरिसमाप्तेस्तमेवाधिकृत्य सर्वमुच्यत इति। ऊर्ध्वं दर्शपूर्णमासाभ्यां
१४९ यथोपपत्त्येके। सोमेन यक्ष्यमाण इत्यस्मिन्सूत्रे वसंतादिकालेभ्यः कालांतरविशिष्टाधा
नाविधिपरे वाक्ये सोमाधानयोरानंतर्यमप्युक्तं भवति। अतस्तस्यार्थस्यावक्तव्यत्वाद्
इमन्यदानंतर्यमित्यवगम्यते। तच्चाधानं कृत्वाग्निहोत्रहोमं कुर्वतः प्रागेव दर्शपूर्ण
मासयोरारंभात्सोमेन यष्टुं यद्युपपद्यते तदा तस्मिन्नपि काले यष्टव्यमिति सूत्रार्थः।
तस्यर्त्विजः। वक्ष्यंत इति शेषः। ऋत्विजः कर्तार इत्यर्थः। त एवंरूपा इत्याह। चत्वारस्त्रि
पुरुषाः। त्रयः पुरुषा येषां ते त्रिपुरुषाः। ते ऋत्विक्षु वक्ष्यमाणेषु चत्वारः पुरुषवंतः।
मिमे २ तेभ्यश्चतुर्भ्योऽन्ये तेषां चतुर्णामेव पुरुषा इति वेदितव्याः। अनेन प्रकारेण चतुर्णां मु १४९
ख्यत्वं इतरेषाममुख्यत्वमित्यवगतं भवति। एते मुख्याः एतेषां पुरुषा इत्याह।

तस्य तस्योत्तरे त्रयः। अस्मिन्नृत्विजामनुक्रमणे यस्य यस्योत्तरे त्रयस्त्रयः संभवंति समु
ख्यः। उत्तरे च ये त्रयस्त्रयस्ते तस्य तस्य पुरुषा इति प्रतिपत्तव्याः। होता मैत्रावरुणो छावा
कोग्रावस्तुद्ध्वर्युः प्रतिप्रस्थाता नेष्टोन्नेता ब्रह्मा ब्राह्मणाछंस्याग्नीध्रः पोता उद्गाता प्रस्तो
ता प्रतिहर्ता सुब्रह्मण्य इति। परिकर्तृनिर्देशः सर्वपुरुषव्यापिपदार्थानुष्ठाने अयमेव
क्रम इति ज्ञापनार्थं। एते हीनैकाहैर्यायजंति। एते याजयंतीति वचनादहीनैकाहैः षोड
शैव पुरुषा याजयंति न सदस्यशामित्रचमसाध्वर्यव इति ज्ञापितं भवति। अतः सत्यपि
वरणे तेषामृत्विक्त्वं न भवति। अहीनैकाहैरिति वचनं सत्रेष्वेतेषामपि वरयानिवृत्त्यर्थं।
॥ अतः स्वामिकर्तृक एव यागपदार्थो भवतीति सिद्धं। एत एवाहिताग्नय इष्टप्रथमय
ज्ञा गृहपतिसप्तदशा दीक्षित्वा समोप्याग्नीस्तन्मुखाः सत्राण्यासते। एत एवैत्स्यवधार

याजयंतीति वचनं स्वद्रव्यसाध्यागाः सकलाद्योग पदार्थस्य कर्तृत्विग्भिः कर्तुं न शक्य तदिति ज्ञापनार्थं

सह

श्रौ० टी० ४ णामसद्दस्यादिवर्जिताः पूर्वोक्ता एव षोडश पदार्थसंबंधिनः पुरुषा अग्नीनाधाय प्रथमय
१५० ज्ञेनेष्ट्वा गृहपतिसंज्ञकेन केवलयजमानपदार्थकारिणा सप्तदशेन पुरुषेण सहिताः
संतः स्वांस्त्वानग्नीन्सर्वान्मिश्रयित्वा सर्वे च दीक्षित्वा गृहपतिमुख्याः सत्राण्यासते सत्त्रे
र्यजंत इत्यर्थः। इष्टप्रथमयज्ञा इत्याहिताग्निविशेषणं। यद्याहिताग्नयस्तदेष्टप्रथमय
ज्ञा भवेयुरिति। तेनानाहिताग्नीनामपि सत्रासनमस्तीति गम्यते। तन्मुख्या गृहपतिप्र
धानाः गृहपत्यभिप्रेतसर्वैकल्पिकपदार्थकारिणस्तथा विरुद्धधर्मसमवाये च गृहपते
रविरोधेन कर्तव्यमित्यर्थः। तेषां समावापादियथार्थमभिधानमेष्टिकेतंत्रे। तेषामिति स
त्त्रिणः पुरुषा उच्यंते। समावाप इति यस्मिन्कर्मण्यग्नयः समोप्यंते तत्कर्म समावापश
ब्देनोच्यते। साग्नीनां अनग्नीनां च सत्रासनमुक्तं। तत्र साग्नीनां सत्त्रिणां समावापादिय १५०
नराशंसतनूपात्तादयो विरुद्धधर्माः

तेषामग्नयः समोप्यंते तेन तआरभ्य यजमानस्य बहुत्वभंते तत्र यावंत- स्तदेतदनुसारेणाय यजमानवाचकेशब्देऊहः कर्तव्यमित्यर्थः॥१

वनस्पतियागेसूक्तवाकाहोत्र- वनस्पतेयाज्या दातारमित्यस्य यजमानवाचित्वादूहः प्राप्तः सनेत्यर्थः॥१

थार्थमूहः कर्तव्यः। ऐष्टिके तंत्रे। नानैष्टिकेनपाशुक इत्यर्थः। तंत्रग्रहणं ऐष्टिकसंब

न्धेपि तंत्रशब्दवाच्य एव भवति। नान्यत्रेत्येवमर्थं। तेन प्रथमाध्यायविहिते प्रायश्चित्तेपि

भवति। तस्मिन्नध्याये तंत्राधिकारात्। न तृतीयाध्यायविहिते इति तंत्रवचनं। दीक्षणा

द्यनग्नीनां। साग्नीनां समावापप्रभृति यथार्थमभिधानमुक्तं। इदानीमनग्नीनां दीक्षणी

याप्रभृत्येव यथार्थमभिधानमैष्टिके तंत्र इत्युच्यते। सत्राणामग्निसाध्यत्वादनग्नीनां

सत्रा साग्निभिः सहैवैसनं भवति। तत्र दीक्षणाप्राक्तनेषु एकश्चेत्साग्निरेकवचनेन द्वौ चेद्द्वि

वचनेन बहवश्चेद्बहुवचनेन इत्येवं भवति। सत्रेष्वग्निबहुत्वे यजमानबहुत्वे च सति

सर्वेषु यजुर्निगदेष्विति यथार्थमूहे प्राप्ते समावापादीत्यनेन सूत्रेणा यजमानाभिधायि

नामेवेति नियम्यते। ऐष्टिके तंत्र इत्यपि च। ततउत्तरसूत्रेण तावेव नियमावनग्नीनां दी

यजमानविषयस्यैव प्रयच्छामीति यदस्योहविधिरिति देवत्रातः॥=३

श्रौ॰सू॰ ८ क्षणीयायेवं प्रागभाविष्णुस्त्वा संभरयाद्यावितिविधीयते। अग्निर्मुखमिति च याज्यानुवाक्ययोः
१५१ । ऋत्कादप्राप्त ऊहो विधीयते। दंडप्रदाने। अनैष्टिकत्वादस्य मंत्रस्योहविधानं। अस्मिन्मं
त्रे यजमानविषयस्य पदस्याभावे प्यूहविधानसामर्थ्याद्दंडविषयस्यैवायमूहविधिरि
ति कल्पनीयं। अत्र बहवो दंडाः संति दीक्षितबहुत्वात्। दीक्षितदंडस्य च प्रकृतौ मैत्राव
रुणदंडत्वमवगतं। अत्र च ते बहवः संनिहिताः संति तेषां च सर्वेषां सहप्रदानं प्राप्तं॥
एवं प्राप्ते ऊहो विधीयते। मैत्रावरुणश्च सर्वान् दंडान् गृहीत्वा एकेन [illegible] दंडेन दंडित्व
सिद्धेस्तेषामेकेनाभिमतेन सहितः स्वपदार्थान् कुर्यादित्येवमत्र कल्पयितव्यं। प्रैषेषु
निवित्सु। अप्राप्ते विधीयते। घृतयाज्यायां। अनैष्टिकत्वादृत्कार्चाप्राप्तविः। ऋकांच। १५१ धिः
ऋत्काद्दप्राप्तिः। अच्छावाकनिगदो पहवप्रत्कपहवे च। निगदश्च उपहवश्च प्रत्कपह

निगदस्योपहवत्वादच्छावाकनिगदोपहवश्च प्रत्युपहवश्चेति द्वंद्व इति देवत्रातः =
उपहूता इत्ययं तमुपहवः उपहूत इति प्रत्युपहव इत्युभयोरुदाहरणमित्याशयः = २
वश्च निगदोपहवप्रत्युपहवमिति द्वंद्वैकवद्भावः। पुनश्चाच्छावाक [illegible]
[illegible] शब्देन षष्ठीसमासः। अच्छावाकस्य निगदे यजमान होतरध्वर्यो इत्यत्र उपह
वप्रत्युपहवे प्रत्येतास्कन्वान्नित्यत्र। आर्षेयाणि गृहपतेः प्रवरित्वा सादीनां मुख्यानां।
आर्षेयवरणे गृहपतेः प्रथमं वरित्वा सादीनां मुख्यानां प्रवृणीते। गृहपतेः पृथक्प्रव
चनं यावंतो नं तर्हिता इत्यत्रापि पृथग्वरणार्थी आत्मादिवचेद्दीक्षाक्रमनिवृत्त्यर्थं तेन नं
स्या सूक्तवाकादौ नामादेशे दीक्षाक्रमस्य च विकल्पः सर्वत्रासिद्धो भवति। एवं द्वितीयतृ
तीयचतुर्थानां। सर्वत्रास वर्गादित्वमस्मत्सूत्रोक्त एव क्रमश्च। यावंतो नंतर्हितास
मानगोत्रास्तावतां सकृत्। समानगोत्राः समानार्षेया इत्यर्थः। सगोत्राणामपि भि
न्नार्षेयत्वसंभवात्समानार्षेयत्वमेव तंत्रासिद्धौ निमित्तलक्षणार्थत्वमत्राश्रितं
मित्तं

संस्कर्ता होता। संस्कार्या आहवनीयाः आहवनीयस्य यजमानेनोत्पादितत्वाद्यजमानस्य पुत्रवदुपचर्यते तस्माद्यजमा
नस्य गोत्रमाहवनीयस्यापि भवति तस्मात्संस्कार्यस्य भेदात्संस्कारभूतस्य प्रवरणस्यावृत्तिर्भवति। अनग्नीनां तु गृहपतेराह
वनीयँवनीयो भवति। अतोनग्नीनामपि प्रवरणं कर्तव्यमेव अनेनैव प्रकारेण सूक्तवाकेनामादेशाश्च कर्तव्य इति सिद्धांतभाष्ये = ०२
१ श्रौ०सू०४ समानगोत्रस्य शाब्दस्यार्षेयवरणस्याहवनीयसंस्कारत्वे सत्याहवनीयभेदे च सत्यार्षे
१५२ यस्यैक्याद्वरणकाले क्याच्च वरणोच्चारणे विशेषाग्रहणात्तत्रानुष्ठानमुक्तवानाचार्यः।
आवर्तयेद्वा द्रव्यान्वयाः संस्काराः। वाशब्दः पक्षं व्यावर्तयति। आवृत्तिरेवात्र कर्तव्या
द्रव्यान्वयाः संस्कारा यतः। द्रव्ये अन्वयो येषां ते द्रव्यान्वयाः॥ संस्कारा यां द्रव्यवशा
वर्तित्वादित्यर्थः। प्रतिप्रधानं गुणा आवर्तंत इति प्रसिद्धो न्यायः। यत्पुनर्विशेषाग्र
लि हणात् अनावृत्तिरित्तिं दर्पिना एकवचनांतस्यार्षेयस्य बहुष्वनभिधानादिति। एवं
चेद्वचनोहः किमिति न क्रियते। तेषां समावापादिरत्र यजमानवाचिनामेवोहनि
यमात्। अत आवृत्तिरेवात्र युक्ता। साग्निचित्येषु क्रतुषूखासंभरणीयामिष्टिमे १५२
के। अग्निचयनमग्निचित्या तया सह वर्तंत इति साग्निचित्याः क्रतवः तेषूखारंभ
क्रतुग्रहणं सत्राधिकारनिवृत्त्यर्थं उखासंभरणं तु नित्यं इष्टेर्विकल्पः = २

सं

णीयानां मेष्टिमेके शाखिन आमनंति। उखासंभरणप्रयोजना उखासंभरणीया। अग्निर्ब्रह्मण्वा
वानग्निः क्षत्र नग्निः क्षत्रंभृत्। ब्रह्मण्वान् क्षत्रवान् क्षत्रभृत् छन्दः। अग्नेर्गुणास्तिस्रो देवताः। एतेनाग्ने ब्र
ह्मणा वावृधस्व ब्रह्म च ते जातवेदो नमश्च पुरूण्यग्ने पुरुधा त्वा या स चित्रचित्रं चितयंतम
स्मे अग्निरीशे बृहतः क्षत्रियस्यार्चामि ते सुमतिं घोष्यर्वागिति॥ इदंप्रभृति कर्मणां शने
स्तरामुत्तरोत्तरं। इदंप्रभृतिर्येषां तानीदंप्रभृतीनि। इदंप्रभृतीनि च तानि कर्माणि चेदंप्र
भृतिकर्माणि तेषामुत्तरोत्तरं शनैस्तरां भवति। एतत्त्वपि पौर्णमासात्। एतदुखासंभ
रणीयं पौर्णमासाच्छनैस्तरां भवति। अत एतत्सिद्धं भवति। मंद्रादि त्रिषु स्थानेषु षष्ठेन
यमेन दर्शपूर्णमासयोर्मंत्राणां प्रयोगः। सप्तमेन वषट्कार इति। एवं पंचमचतुर्थत्वतो
पशुः=१ यद्वितीयप्रथमे रुखासंभरणीया प्राजापत्या दीक्षणीयातिथ्याः प्रयोक्तव्याः तस्मा [illegible] प्रायणीया। प्रा
इष्टिं अधिकृत्य विहितस्वरो यमिष्टिष्वेव भवति नानुवचनेष्विति बोध्यं=४

नरो

श्रौ० सू० ॥स्माडुच्चैरेण वषट्कारः प्राय णीयावत्सोमप्रवहणं। मंत्रस्य द्वितीयेन यमेनेत्यर्थः। उर्ध्वं प्रथ
१५३ माया अग्नि प्रणयनीयाया औपवसथ्ये नियमः। औपवसथ्ये यदग्निप्रणयनं तस्य प्रथमा
153 याऊर्ध्वं स्वरेष्वनियमो भवति। मंद्रो वा मध्यमो वा उत्तमो वा सर्वे वा। सर्वप्रयोगपक्षे मंद्रा
दीनुत्तमपर्यंतानारोहयोरेव प्रयुंजीत। एकस्वरप्रयोगे यमानेवारोहयेत्। मध्यमादि
घर्मे। घर्मे मध्यमोत्तमयोरेव नियमः। न मंद्रस्य तत्र प्रवेश इत्यर्थः। अत्रापि स्वरयोर्यमा
नां चारोहित्वमेव स्यात्॥१॥ दीक्षणीयायां धाय्ये विराजौ। दीक्षाप्रयोजना इष्टिः दीक्षणी
या सा कर्तव्या तस्यां धाय्ये विराजौ भवतः। अग्नाविष्णू। अस्यामियं देवता। अग्निर्मुखं
प्रथमो देवतानां संगतानामुत्तमो विष्णुरासीत्। यजमानाय परिगृह्य देवान् दीक्षयेदं ह
विरागच्छतं नः। अग्निश्च विष्णो तप उत्तमं महो दीक्षापालाय वनतं हि शक्रा॥ विश्वैर्देवैर्य १५३

त्तियैः संविदानौ दीक्षामस्मै यजमानाय धत्तमिति। साग्निचित्ये त्रीण्यन्यानि। हवींषीति शेषः।
वैश्वानर आदित्याः सरस्वत्यादितिर्वा। अंत्ययोर्विकल्पः। त्रीण्यन्यानीत्युभयविशेषणात्।
द आग्नावैष्णवाधिकानि त्रीणीति गम्यते। धारयंत आदित्यासो जगत्स्था इति द्वे। एत एव
भुवद्वद्भ्यो भुवनपतिभ्यो वा। एते वचौ आदित्येभ्यो भुवद्वद्भ्यः आदित्येभ्यो भुवनपतिभ्यश्च या
ज्यानुवाक्ये भवतः। भुवनपतिपल्लिंगयोरेव भुवनपती नां विधानादेतद्गम्यते सगुणेऽपि
ये पि निर्गुणायां विहितेवं नाद्यते सगुणायास्ते न भवत इति। नेदमादिषु मार्जनमवागुदय
नीयायाः। इदमादिषु कर्मसु प्रागुदयनीयायां मार्जनं भवति। द्विविधं चेह मार्जनं गृह्य न ३
ते चोदितं लैंगिकं च। परिस्तरणे रंजलिमंतर्धायाप आसेचयते। सब्रह्मकाश्चालाले
मार्जयंत इति चोदितं। प्राच्यां दिशि देवा ऋत्विजो मार्जयंतामिति लैंगिकं। तदुभयं प्रति

श्रौ०सू०४ षिध्यते। शास्त्रांतरे च स्पष्टं वचनमस्ति दीक्षणीयादिषु योक्त्रविमोकादि न भवतीति। तेन उ
१५४ भयप्रतिषेधोवगम्यते। एवं सति दर्शनादग्नीषोमीयसवनीययोश्चात्वालमार्जनं न प्रति
षिध्यते। कुतः चात्वाले मार्जयित्वाध्वर्युपथ उपातिष्ठंत इति सवनीये दर्शनं। अग्नीषोमी
154 येणा चात्वालमार्जनादिति सिद्धवदनुवादादग्नीषोमीयेप्यस्तीति गम्यते। एवं सत्यन
योर्न प्रतिषेध इति सिद्धं। इदमादीळायां सूक्तवाके चागूराशीस्स्थाने। इळायां सूक्तवाके
च या आशिषस्तासां स्थाने आगूर्नाम मंत्रः प्रयोक्तव्यः। आगुरं प्रक्षिप्याशिष उद्धृत्य
यथा तौ प्रयुज्येते इळासूक्तवाकौ तथा पाठेनैव दर्शयति। उपहूतोयं यजमानोस्य यज्ञ
स्यागुर उदृचमशीयेति तस्मिन्नुपहूतः। एवमिळानिगद इत्यर्थः। उपहूतोयं यजमान १५४
इत्यस्मा उपरिष्टात्तस्मिन्नुपहूत इत्यस्मात्पुरस्ताद्यः पदसमुदायस्त आशिष इत्युच्यंते।

मल्लक्षणेन यः पदसमुदाय इदानीं पठ्यते असावाग्रूरित्युच्यते। एवमिष्ठानिगदः। आशा

स्तेयं यजमानोस्य यज्ञस्यागुरउद्दृचमशीयेत्याशास्ते। इत्येवं सूक्तवाक इत्यर्थः। आशास्ते

यं यजमान इत्यस्माद् उपरिष्टात्। आशास्तेयदनेन हविषेति अस्मात्पुरस्ताद्यः पदसमुदा

यस्ता आशिषस्तल्लक्षणेन यः पदसमुदाय इदानीं पठ्यते स चाग्रूः। एवं सूक्तवाकनिगदः॥

अस्य यज्ञस्यागुरउद्दृचमशीयेत्क्रमयत्राग्रूः। अस्यायमर्थः। अस्य यज्ञस्य प्रारब्धस्य

समाप्तिं प्राप्नुयामिति। तस्मिन्नुपहूत इतीष्ठायां। प्राप्नुयामि साशास्त इति सूक्तवाके॥

अत इयमप्याशीरेव। आग्रूरित्यस्य उद्दृगाशासनरूपत्वादागुरित्युच्यते। न चात्र नामादे

शः पाठादेव नामादेशाभावे सिद्धे पुनः प्रतिषेधवचनं अन्यत्सर्वं प्रकृतिवदेवेति ज्ञापना

र्थं। प्रकृतात्समाद् ऊर्ध्वं पाश्विष्ठायाः। सवनीय पाश्विष्ठात्रेग स्यते। तच्छब्दचोदितत्वात्। अंत

— उद्दृक्समाप्तिः ३

४। प्रकृतेरिदं दीक्षाविधानं। यस्मिन्नहोरात्रे दीक्षणं क्रियते तदेवारभ्य रात्रीरेव संख्याय परिमिता दीक्षाः ४

श्रौ॰ सू॰ ४ इति वचनादहर्गणे ध्वंत्येहनि पश्चिक्षाशत्यते। एकाहेषु तदेवाद्यमंत्यं च भवति। दीक्षितानां संच
१५५ रो गार्हपत्याहवनीयावंतराग्नेः प्रणायनात्। संचरश्च आसनशायनादीनां प्रदर्शनार्थः। तेना
स्मिन्नवधौ तयोरेवाग्न्योर्मध्ये समीपे यजमानावर्तेरन्। अग्निप्रणयनोत्तरकालं संचरदे
शः शास्त्रांतरादवगंतव्यः। दीक्षणादिरात्रिसंख्यानेन दीक्षा अपरिमिता दीक्षाः कर्तव्याः।
तस्माद्दीक्षितो द्वादशाहं भृतिं तन्वीतेति प्रकृतौ नित्यवदाम्नातं। तथा मासं संवत्सरं यद्वा
वा कृशः स्यादिति परिमिता ये अपरिमिताश्च दीक्षाकल्पाः शास्त्रांतर आम्नातास्तेषां प्रद
र्शनार्थमपरिमितवचनं॥ अध्वर्युप्रत्ययत्वाद्दीक्षा नियतेस्तत्सूचनमात्रमत्रोक्तवानाचा
र्यः। सत्राणां दीक्षाविधानसूचनमत्रोच्यते। एकाहप्रभृत्यासंवत्सरात्। संवत्सरं त्वेव स १५५
त्रे। महाव्रतसहिते सत्रे अयं विशेषः संवत्सरमेवेति। द्वादशाहता पक्षे तेषु यथास्व

त्सोपसदः। ते तु सत्रेषु यथा स्फत्योपसदस्तथा दीक्षा अपि कर्तव्याः। उपसत्संख्याया अप्यत्र
त्राविहितत्वादत्रैव विहितविधिः कल्प्यते। यत्संख्याः सुत्याउपसदश्च तत्संख्यादीक्षा एवेति॥
एतदुक्तं भवति। द्वादशाहतापश्चितेषु यत्संख्याः सुत्यास्तत्संख्या एवोपसदश्च दीक्षा भ ९
वंतीति। कर्माचारस्त्वेकाहानां। आचर्यतेस्मिन्नित्याचारः कालः। कर्मणा आचारः कर्मा
चारः। एकाहानां प्रयोगकालो वक्ष्यत इत्यर्थः। एकाहशब्देनात्र विकृत्येकाहा उच्यंते॥
न बहुवचनसंबंधात्। प्रकृतौ दीक्षाणां विहितत्वाच्च। तुशब्दो विशेषविध्यर्थः। अस्मिन्प्र
करयो दीक्षाकाल एव विधातव्ये दीक्षोपसत्सहितानामेकाहानां प्रयोगकालो विधी
यत इति विशेषः। एका तिस्रो वा दीक्षास्तिस्र उपसदः स्फत्यमहरुत्तमं। उत्तमग्रहणं
प्रातरनुवाकाद्युदवसानीयांतमेकमेवाहः स्यात्तच्च स्फत्यशब्देनोच्यत इत्येवमर्थं॥

श्रौ॰सू॰४ दीक्षाकालेविधातव्येउपसत्कल्पानामपिविधानंत्रिप्रकाराणामेवसोमित्वसिध्यर्थंतेन क
१५६ दीक्षणीयायाःप्राग्भाविनउखासंभरणीयादेःसोमिकधर्मउपांशुत्वादिर्नभवतीतिसिद्धं
दीक्षांतेराजक्रयः।दीक्षाहःस्वपरिसमाप्तेषु अनंतरंयदहस्तस्मिन्नहनिराजक्रयःकर्त
व्यः।सोमःक्रेतव्यइत्यर्थः॥२॥तदहःप्रायणीयेष्टिः।यस्मिन्नहनिसोमःक्रेष्यतेतदहःप्रा
यणीयानामेष्टिःकार्या।दीक्षांतेराजक्रयइत्युक्त्वातदहरितिवचनाद्दीक्षांतेयदहस्तस्यरा
जक्रयइतिसंज्ञा।अर्थात्कृताभवतीतिगम्यते।तेनायमर्थः।तदहरितियद्राजक्रयसंज्ञम
हस्तस्मिन्नित्यर्थः।पथ्यास्वस्तिरग्निसोमःसवितादितिः।स्वस्तिनःपथ्यासुधन्वस्वितिद्वेअ
ग्नेनयसुपथारायेअस्मानादेवानामपिपंथामगन्मत्वंसोमप्रचिकितोमनीषायातेधामा १५६
निदिवियापृथिव्याआविश्वेदेवंसत्पतिंयइमाविश्वाजातानिसुत्रामापांपृथिवीद्यामनेह

= प्राजस्तनीयीतुनौ साज्यभागा २ य

×४ यथा प्रायणीयो या: आवृत्तिनीस्ति तथा क्रस्यापि आवृत्तिर्नास्तीति भाव: ॥×४

संमहीमृषुमातरं स्क्वव्रतानां सेदग्निरग्नीँरत्यस्त्वन्यानितिदेसयाज्ये। शंयंवतेयं। इयमितिव

चनादियमेव शंयंवता नोदयनीयेत्यर्थ:। अनाज्यभागा। चशब्दोध्याहर्तव्य:। अनाज्यभागा

चेयमेव भवति नोदयनीया। संस्थितायां॥ ३॥ राजानं क्रीणंति। संस्थितायामितिवचनं प्रा

यणीययाराजक्रयस्य संबंधार्थं। तेनाहर्गणे षु प्रायणीयावद्राजक्रयो नाभ्यावर्तयितव्य:।

सकृदेव कर्तव्य इत्यर्थ:। क्रीणंतिवचनं सोमप्रवहणे यदस्माकं कर्मविहितं तत्क्रयोत्तरका

लवर्तिन्येव प्रहर्षणे भवति॥ नान्यकालीन इत्येवमर्थं। तं प्रवक्ष्यत्सु पश्चाद्दनसस्त्रिपदमा

त्रेंतरेणवर्त्मनीअवस्थाय प्रेषितोभिहिंकारा त्वंविप्रस्त्वंकविरस्त्वंविश्वानिधारयन्। अप

जन्यंभयंनुदेत्यसंदयन्या ष्णंश्प्रपदेनदक्षिणापांसूंस्त्रिरुदूयानुब्रूयाज्ञ्शारभिश्रेय: प्रे

हिबृहस्पति: पुरएतातेअस्तु। अथेमवस्यवरआपृथिव्या आरेशत्रून्कृणुहि सर्ववीरस्ति

श्रौ०सू०४ तिष्ठन्। तं क्रीतं सोमं राजानं प्राग्वंशसमीपं नेष्यत्स्वध्वर्युषु पश्चादनसा त्रिपदमात्रे तीते
१५७ चक्रयोर्यैर्वर्त्मनी तयोश्च मध्यदेशस्यार्जवेन योदेशस्तस्मिन्नवस्थाय प्रेषितः सन्नभि
157 हिंकारात्प्राक्प्याष्यश्मचालयन्प्रपदेन दक्षिणस्यां दिशि पांसूंस्त्रिरुद्वपेत्। त्वं वि
प्रहति मंत्रेण। ततस्तस्मिन्नेव साम्येऽस्थित्वाभिहिंकृत्यानुब्रूयात्। तिष्ठन्निति वचनं
व्रजत्स्वप्यध्वर्युषु प्रथमामसमाप्य न व्रजेदित्येवमर्थं। अनुव्रजन्नुत्तरा अंतरेणैव
वर्त्मनी। अंतरेणैव वर्त्मनी अनेन पथा अनुव्रजन्नुत्तरा अनुब्रूयादित्यर्थः। व्रजन्नेवा
नुब्रूयान्न व्रजनविक्षेप इत्येवमर्थं व्रजन्निति ग्रहणं। सोमयास्त्वमयोभुव इति तिस्रः
सर्वेनं दंति यशसा गतेनागं देवक्रतुभिर्वर्धतुस्वयमित्यर्थ र्च आरमेत्। अवस्थितेन १५७
सिद्दक्षिणास्सक्षादभिक्रम्य राजानमभिमुखोवतिष्ठते। अनस्यवस्थितेतस्य दक्षिण

पार्श्वेनराजसमीपंगत्वातमीक्षमाणस्तत्रैवतिष्ठेत्।प्रपाद्यमानेराजन्यग्रेयानोनुसं
व्रजेत्।अनुव्रजन्नुत्तराइतिसर्वास्वृक्ष्वनुव्रजतोनुवचनसिद्धौसत्यामनुसंव्रजेदि
रो तिवचनंसम्यग्गानंतरमेवानुव्रजेन्नत्वव्यवायमध्येकुर्यादित्येवमर्थं।अतोग्रेयाहव
नीयंगतस्यानुव्रजनंकृतंभवति।यातेधामानिहविषायजंतीमांधियंशिक्षमाणस्य
देवेतिनिहितेपरिदध्याद्राजानमुपस्पृशन्।निहितइतिव्रजनसमाप्तिदर्शनात्तिष्ठ
न्नेवपरिदध्यात्।वसनेंशुष्वा।उपस्पर्शनविषयस्यविकल्पोयं।मंत्रेयाबद्धस्यावि
स्रंसनेबंधनशास्त्रविरोधःवसनोस्पर्शनेचराज्ञोस्पर्शनशास्त्रस्यविरोधःतत्रान्यतर
स्यलक्षणाश्रययोसतिउपस्पर्शनस्यैवलक्षणाश्रयणंयुक्तं।बंधनोत्तरकालेविहि
तत्वादितिवसनइत्युक्तं।वचनाद्बंधस्यवचनादेवविस्रंसनेनदोषइतिमत्वांशुष्वे

श्रौ॰ वृ॰ ४ स्रुक्तं वा शब्दः पूर्वपक्षव्यावृत्त्यर्थः। बध्नो वसतीति वचनात्पुनरपि बंधनं कर्तव्यं॥ ४॥
१५८ अथातिथ्येष्टं तातिथ्यानामेष्टिरनंतरं कर्त्तव्या। तस्या अग्निमंथनं। तस्या इति वचनं।
1558 तदंगतासिध्यर्थं तेनास्मिन्नग्निमंथने मंदस्य प्रथमे यमः साधितो भवति। धाय्ये अति
थिमंतो। समिधाग्निं दुवस्यता प्यायस्व समेतु त इति विष्णुरिदं विष्णुर्विचक्रमे तदस्य
प्रियमभि पाथो अश्यां होतारं चित्ररथमध्वरस्य प्रभाय मग्निर्भरतस्य शृण्व इति संया
ज्ये। संस्थितायामाज्यं तानूनप्त्रं करिष्यंतोभिमृशंत्यनाधृष्टमस्यनाधृष्यं देवानामो
जोभिशास्तिपाः। अनभिशस्त्यंजसा सत्यमुपगेषं स्विते माधा इति। संस्थित इति व
चनमहर्गणे श्रुतानूनप्त्रस्यानावृत्त्यर्थं। तानूनप्त्रमित्याज्यविशेषस्य नाम। करिष्यंत १५८
इत्यार्त्विज्यं करिष्यंतः करिष्यद्ग्रहणं सर्वेस्वयमेवाभिमृशेरन्नान्योन्यस्य प्राति

निध्येनेत्येवमर्थः। स्पृष्ट्वोदकंराजानमाप्याययंति। आप्यायनस्वरूपमुक्तमाद्भिःसंस्पर्शना
धिक्यादिति। इदमादिमदंतीरेवर्थउपसत्का। इतःप्रभृत्युपसत्कायउदकोपस्पर्शनंक्रिय
तेतत्रमदंतीरेवगृह्णीयात्। मदंत्योनामनामतप्ताआपः। उपस्पर्शनंसंनिधाउक्तत्वा
उपस्पर्शनएवायंनियमोनाचमनादावपीतिगम्यते। अर्थग्रहणमर्थप्राप्तेष्वुपस्पर्शने
भवतीत्येवमर्थः। अंशुरंशुष्टेदेवसोमाप्यायतामिंद्रायैकधनविद आतुभ्यमिंद्रःप्यायता
मात्वमिंद्रायप्यायस्वाप्याययास्मान्त्सखीन्त्सन्यामेधयास्वस्तितेदेवसोमसुत्यामुदृच
मशीयेति। आप्यायनमंत्रोयं। स्पृष्ट्वोदकंनिह्नवंतेप्रस्तरेपाणीनिधायोत्तानौदक्षिणं
त्सव्यंनीचंएष्टारायएष्टावामानिप्रेषेभगाय। ऋतमृतवादिभ्योनमोदिवेनमःपृथि
व्याइति। निह्नवोनामनमस्कारः। द्यावापृथिवीभ्यामेवतन्नमस्कुर्वंतीतिदर्शनात्। तेनपा

श्री०भा०२४ पिनिधानं नमस्काराञ्जलिरूपेण कर्तव्यं ॥५॥ स्तुत्वोद्दकं प्रवर्ग्येण चरिष्यन्नुत्तरेणाखरं
१५६ परिव्रज्य पश्चाद्दक्षस्योपविश्य प्रेषितो भिक्षुयाद्दगावानं। एतान्युदकोपस्पर्शनान्युत्तरां
गानि आप्यायमनिहत्वस्य वर्ग्यणामंगानीत्यर्थः। प्रवर्ग्यशब्दः कर्मविशेषवचनः तेन
चरिष्यन्त्विति वचनं होतुरभिष्टवनकालविधानार्थं। तेन कालांतरे यद्यध्वर्युरवश्चरं तित
दाप्यभिक्षुयादेव। खरो नाम यत्र महावीरः संसाद्यते स देशः। एतदुक्तं भवति। अध्वर्या
दिशु प्रवर्ग्येण चरिष्यत्स्होता तीर्थेन प्रपद्य खुरमुत्तरेणापरिव्रज्य तस्य पश्चादुपविश्य
ततः प्रेषितः संनभिक्षुयाद्दगावानं। ऋगावानलक्षणमाह। ऋचमर्धचमनवानमुक्त्वा
प्रणुत्यावस्येत्। अस्य विधानस्य ऋगावानमिति संज्ञेति प्रदर्शनार्थं पूर्वसूत्रे ऋगावान १५६
शब्दप्रयोगः। अवसानमुच्छ्वासार्थमित्युक्तं। तेनार्धर्चाः संहितया वक्तव्याः। तत्रार्धर्चो

= तत्रस्थानात्स्थानसंक्रमण इति सूत्रे = १

तसंधानेभाषिकैवसंहितास्यान्नच्छांदसीतिमंतव्यं। ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतः
सुरुचोवेनआवः। सबुध्न्याउपमाअस्यविष्ठाः सतश्चयोनिमसतश्चविवः। इयंपित्रेराष्ट्र्य
त्यग्रेप्रथमायजनुषेभूमनेष्ठाः। तस्माएतंसुरुचंह्वारमह्यंघर्मंश्रीणंतिप्रथमस्य
धासेः। महान्महीअस्तभायद्विजातोद्यांपितासद्मपार्थिवंचरजः। सबुध्नादाष्टजनुषा
भ्युग्रंबृहस्पतिर्देवतातस्यसम्राट्। अभित्यंदेवंसवितारमोण्योःकविक्रतुमर्चामिस
त्यसवंरत्नधामभिप्रियंमतिंकविं। ऊर्ध्वायस्यामतिर्भाअदिद्युतत्सवीमनिहिरण्यपा
णिरमिमीतसुक्रतुःकृपास्वःसत्पास्वरितिवासंसीदस्वमहांअसीतिसंसाद्यमानेजंति
यंप्रथयंतोनविप्राइत्यज्यमानेपतंगमक्तमसुरस्यमाययायोनःसनुत्योअभिदास
दग्नेभवानोअग्नेसुमनाउपेतावितिद्वचाःकृणुष्वपाजःप्रसितिंनपृथ्वीमितिपंचपरि

श्रौ०वृ०४ त्वाग्निर्वयोगिरोधिद्वयोरद्धाउक्थ्यं वचः शुक्रं ते अन्यद्यजतं ते अन्यद् पश्यं गोपामनिप
१६० घमानं स्वर्के इत्यस्यायं वेनश्चोदयत्पृश्निगर्भाः पवित्रं ते विततं ब्रह्मणस्पत इति द्वे वियस
160 वित्रं धिषण्या अतन्वत घर्मं शोचंतं प्रणवेषु बिभ्रतः। समुद्रे अंतरायवो विचक्षणं त्रि
रह्नो नाम सूर्यस्य मन्वत। गणानां त्वा प्रथश्च यस्या पङ्क्त्यं त्वे त्येतस्याद्ययाय जमानमी
क्षेत द्वितीयया पत्नीं तृतीयया त्वा मानं का राधद्धोत्राश्विना वामिति नवाभात्यग्निर्ग्रावा
णो वेद्ये द्यावापृथिवी इति प्रागुत्तमाया अरूरुचदुषसः पृश्निरग्रिय इत्यावपेतोत्त
रेणार्धर्चेन पत्नीमीक्षेतो नमया परिहिते समुद्यायेनानध्वर्यवो वाचयंतीति नु पूर्वं
पटलं। एतावत्सूत्रमभिष्टवनं। अत्र मध्ये यद्व्याख्येयं वचनं तदेव व्याख्यायते। रूपा १६०
स्वस्त्वपास्वरिति वा। रुगवयवभूतयोः रूपात्वपाशब्दयोः प्रयोगविकल्पोयं संसी

ह्स्वमहाँ ऽअसि० साधमाने। सम्यक् साधमान इत्यर्थः। अंजंति यं० माने। अभिपूर्यमा
णो ऽउत्तरास्त्वयाभिरूपं यथाशक्ति संपाद्य पठनीयं। अप० क्षते। द्विती० पत्नी। इती० मा
त्मानं। प्राग्नु० पेत ऽउत्तरे० क्षेत। अत्र क्रियांतरसंबंधाया ऋचस्ता सामण्याभिष्टवनमे
व कार्यं। अभिष्टवनं नाम घर्मस्य संस्काराभिधानरूपः। एतच्च घर्ममभिष्टुहीति सं
प्रैषादवगतं तत्र यत्क्रियांतरमीक्ष[illegible]यादिति तदानुषंगिकं तदपि वचनात्कर्तव्यमेव।
तत्क्रियमाणमेवं क्रियेत यजमानादीनीक्षमाणा एताभिरभिष्टुयादिति। अरूरुचदि
त्यस्यामृच्युत्तरमेवार्धर्चमीक्षमाणो ब्रूयात्। ऽउत्तरे यो इति वचनात्। अस्मादेव वचनात्पू
र्वस्त्विथ्याधारंभोवगतः। ऽउत्त० यंति। परिधानीयानंतरं ऽअध्वर्युभिर्यदुक्तं तदस्मदीयैर
पि कर्तव्यमित्यर्थः। ऽउत्थाप्य वाचयंती[illegible]त्यध्वर्युशास्त्रोक्तस्य होत्रादिभिरनुष्ठेयत्वंस्

१०।

एवमपरयाब्रह्माप्रसृप्यदक्षिणापुरस्तान्मैत्रावरुणस्योपविशेत्।एवमित्यपरुणानादिज
पांतमतिदिश्यते।तमन्वंचऋत्विजःप्रसर्पकाः।ऋत्विग्ग्रहणंप्रसर्पकविशेषणं।येप्रस
र्पकाऋत्विजश्चतेब्रह्माणंप्रसर्पंतमनुतेनैवद्वारेणप्रसर्पेयुः।येदशपेयेवक्ष्यंतेतेतए
वेत्यर्थः।तेनार्थितयादिदृक्षयावप्रसृप्तानांमंत्रप्रसंगोनास्तीतितेषामयंनियमोनभवति।

स०वृ०५ पूर्वेणोदुंबरीमपरेणाधिष्ण्यान्यथांतरमनुप्रविशंति। इदमपि तेषां स्थानविधानं। यथांतरं यथा
१९१ संनिकृष्टमित्यर्थः। योयस्य चमसभक्षसंबंधितया संनिकृष्टः स तस्य समीपमुपविशतीत्यर्थः।
एतयावृताग्नीध्रआग्नीध्रीयमप्याकाशं। आग्नीध्रोप्यनेन प्रकारेणोपस्थानादिजपांतं कु
१९१ र्यात्। आग्नीध्रीयं तु प्रविशेत्। संछादितमसंछादितमपीत्येवमर्थमप्याकाशमिति वचनं।
दक्षिणाद्योधिष्ण्या उदकसंस्थाः प्रसर्पणां। स्वस्याधिष्ण्यस्य पश्चादुपवेशनमुक्तं तत्र
कोधिष्ण्यः कस्येत्येतन्निर्णयार्थमिदमुच्यते। प्रसर्पिणो होत्रादयस्तेष्वधिकृतेषु तदधिका
रार्थं पुनः प्रसर्पिग्रहणं। अनधिकृतस्यापि प्रसर्पिणो छावाकस्य ग्रहणार्थं। दक्षिणादय
इत्येतावतैवोदक्संस्थे सिध्येयत् उदक्संस्थवचनं तज्ज्ञापयति सर्वत्र दक्षिणोत्तररूपेणाव १९१
वस्थिते षूदक्संस्थेव क्रियाकर्तव्यानानान्यथेत्येवमर्थं। आग्नीध्रोतु विपरीतो। मैत्रावरुणस्यद

क्षिणतस्तस्योत्तरतो होतुरिति। तेषां विसंस्थितसंचरा यथा स्वं धिष्ण्यानुत्तरेण। तेषां धि
ष्ण्यवतां स्वधिष्ण्यस्योत्तरतो यो देशः स विसंस्थितसंचरो वेदितव्यः। विसंस्थिते समाप्ते स
वने संचर्यते नेनेति विसंस्थितसंचरः। दक्षिणमाधिष्ण्यानां। अधिष्ण्यानामृत्विजां दक्षि
णाधिष्ण्यमुत्तरेण विसंस्थितसंचरो भवतीत्यर्थः। ३। अथैंद्रैः पुरोळाशैरनुसंचरंति। या
ज्यानुवाक्यालिंगादेव ऐंद्रत्वे सिद्धे सत्यैंद्रैरिति वचनं धानादीनां निर्वापकाले यद्दिदेवताः
संबध्यंते तासामपनयनार्थं। पुरोळाशैर्न सोमैरित्यर्थः। किंच धानादीनां पुरोळाशशब्दे
नैव संव्यवहारार्थं। अनुसवनं सवने सवन इत्यर्थः। पुरोळाशाद्युक्तमित्यतिदे[illegible]शादेवा
नुसवनत्वे सिद्धे यदनुसवनवचनं तज्ज्ञापयति अनुसवनं चरंत्येव नान्यदावाहनाद्यपी
ति। धानावंतं करंभिणमिति प्रातःसवने नुवाक्या। प्रातःसवनवचनं मध्याह्नसमये प्रा

सू० ह० ५ तेष्वस्मिन्सवन इयमेवानुवाक्या स्यात् नान्या कल्प्येत्येवमर्थः। माध्यंदिनस्य सवनस्य धाना इ
१९२ ति माध्यंदिने। तृतीये धानाः सवने पुरुष्टुतेति तृतीयसवने। होता यक्षदिन्द्रं हरिवाँ इन्द्रो धा
ना अत्त्विति प्रैषो लिङ्गैरनुसवनं। प्रैष इत्येकवचनं जात्यभिप्रायं। त्रयाणां पाठसिद्धत्वात्।
उह्यत्वादेशपदं तेनैवेज्या। अत्राप्येकवचनं पूर्ववत्। देवतादेशस्वरूपत्वादिन्द्रमिति श
ब्द आदेशपदमित्युच्यते। उह्यन्ते तैरेव प्रैषैर्यष्टव्यमित्यर्थः। होता यक्षदसौ यजयोः स्था
स्थान आगूर्वषट्कारौ यत्र क्व च प्रैषेण यजेत्। यत्र क्व चेति वचनात्सार्वत्रिकोऽयं विधिः।
यत्र क्वचित्कर्मणि प्रैषेण यागे कर्तव्ये एतावुह्येते तयोः स्थाने तौ कृत्वा यष्टव्यमित्यर्थः।
अथ स्विष्टकृतो ऽग्ने जुषस्व नो हविर्माध्यंदिने सवने जातवेदो ऽग्ने तृतीयसवने हिकानिष १६२
इत्यनुसवनमनुवाक्याः। अनुसवनाधिकारे पुनः अनुसवनवचनं माध्यंदिने सवनेष

शु पुरोडाशो न सह स्विष्टकृति क्रियमाणे तस्य मुख्यत्वे सत्यपि एता एव याज्यानुवाक्या भवेयुरित्येवमर्थं। होता यक्षदग्निं पुरोडाशानामिति प्रैषो हविरग्ने वीहीति याज्या। एतास्वनुवाक्यासु पुरोडाशशब्दं बहुवदेके। एतास्वनुवाक्यासु ये पुरोडाशशब्दास्ते बहुवचनांताः कर्तव्या इत्येके आचार्यमन्यंत इत्यर्थः। तत्सामानाधिकरण्यादेव चरुशब्दादयोपीति।
पुरोडाशशब्दस्यात्र छत्रिन्यायेन धानादिलक्षणार्थत्वाच्च बहुत्वसंबंधः। विज्ञायते प्रयतिवा एतदृचो क्षरं यदेनदृहति तस्मादृचं नोहेत्। प्रयतिस्रवतीत्यर्थः। स्रवणं तावच्छंदोवृत्तभंगादृत्कनाशः। तन्नाशे ऋचा यष्टव्यमिति नातीव दोषः। तस्मादिमौ विधिप्रतिषेधौ ब्राह्मण संकीर्तितावपि न्यायमूलावेवेति मंतव्यौ। तेनायमृक्षूह प्रतिषेधः सार्वत्रिक इति मत्वा सर्वेषु यजुर्निगदेष्विति यजुष्वेवोहमुक्तवान्भगवानाश्वलायन आचार्यः॥
३४ साधनत्वनाशः। अन्यहे पुनरनष्टे साधनत्वे कस्यचिस्सदस्कलक्षणयागो २
३५ ग्याचाभिधानं संभवतीति। २

ण५

स्० द्र०५ ४॥ द्विदेवत्यैश्चरंति। वक्ष्यमाणग्रहाद्विदेवत्यसंज्ञा भवंति। तेन वायविंद्रवायुदेवत्योपि द्विदे
१९२ वत्यसंज्ञो भवति। तैश्चरंति तेषां याज्याप्रैषानुवाक्या वक्ष्यंत इति संबंधः। वायवइंद्रवायु
भ्यां वायवायाहि दर्शत इंद्रवायू इमे सुता इत्यनुवाक्ये अनवानं पृथक्प्रणवे। एते द्वे ऋ
193 चौ द्वि अनुवाक्ये भवतः। ते च सहानवानं वक्तव्ये पृथक्प्रणवे च पृथक्प्रणवेचनमनु व
वाक्याद्वित्वादेव प्रणवद्वित्वे सिद्धेपि आयाम्नग्द्वित्वेपि अनुवाक्याद्वित्वाभावात्प्रणव
द्वित्वं नास्तीत्येवमर्थं। होतायक्षद्वायुमग्रेगां होतायक्षदिंद्रवायू अर्हंतेति प्रैषावनवानं।
अत्राप्यनवानवचनं परस्परसंतानार्थं। अग्रंपिबामधूनामिति याज्ये अनवानमेकागु
रे पृथग्वषट्कारे। अस्मिन्प्रतीके द्वे ऋचौ द्वे याज्ये भवतः। ते च सहानवानं भवतः। तत्र या १९२
ज्याद्वित्वादागुरो द्वित्वे प्राप्ते एकागुरे एवेति नियम्यते। पृथग्वषट्कारवचनं धर्मान्विन

याज्यास्तु ऋग्द्वित्वेपियाज्याद्वित्वाभावात्साधनद्वारेण एकवषट्कारतां वक्तुं। यत्रपुनर्द्वा
भ्यामृग्भ्यामेकमेवयाज्याकार्यमनुवाक्याकार्यंच साध्यते तत्र पूर्वस्याऽंते प्रणवो नक
र्तव्यो वषट्कारश्च। कार्यभेदाभावात्। सामिधेनीष्वपि प्रत्यृचं प्रणवसंबंधः कार्यभेद
निमित्त एवेति मंतव्यः। इदमाद्यनवानं प्रातःसवनस्यानुवाक्ये। अयं विधिः प्रातःस
वने प्रयुज्यमानानामपि भवति नोत्तंनानामेवा तेन वाजिनामनुवाक्याप्यनवानं वक्त
व्या। प्रैषोचोत्तरयोरित्यस्मादेव चशब्दादुत्तरयोरपिग्रहयोरनुवाक्ययोरप्यनवानेसि
अ ध्येन्यानुवाक्योक्तं नात्र नास्तीति कृत्वा प्रयुज्यमानविषयत्वमस्य सूत्रस्यावगम्यते।
प्रैषोचोत्तरयोर्ग्रहयोः। प्रैषोच याज्यानुवाक्याश्चोत्तरयोर्ग्रहयोरनवानं भवंतीत्यर्थः॥
हुत्वैतद्ग्रहपात्रमाहरत्यध्वर्युः। एतदिति प्रकृतं वाय्विंद्रवायुसंबंधियत्पात्रं तदित्यर्थः।

सू०ह०५ गृह्यत इति ग्रहः सोमः तस्य पात्रं। एतदुक्तं भवति। यदेतद्वाय्विंद्रवायुसंबंधि ग्रहपात्रं कृत्वा
१९४ तदेवाहरत्यध्वर्युरेवेति। तेनान्योप्यत्र ग्रहो हूयते पात्रमप्यन्यदस्तीति ज्ञायते। अध्वर्युरा
२ हर्तीति वचनात्प्रतिप्रस्थाताप्यत्र जुहोतीति गम्यते। तेनास्मिन्वक्ष्यमाणे प्रतिप्रस्थातर्यु
उन्नर्भसे- पह्वयाचनं कर्तव्यमित्यवगंतव्यं। तं गृह्णीयादेतु वसुः पुरूवसुरिति। तदिति वचन
194 माहृतं गृह्णीयान्नाक्रीयमाणमित्येवमर्थं। प्रतिगृह्य दक्षिणामूरुमपोछाद्य तस्मिंत्सा
दयित्वा। काशवतीभिरंगुलीभिरपिदध्यात्। प्रतिगृह्येति वचनं ग्रहस्य हस्तांतरसंक्र
हस्तस्य मणानिवृत्त्यर्थं। दक्षिणावचनमपोछादने सव्यस्य प्रापणार्थं। आकाशवतीभिरंगुली
भिरित्थंभूतेन पाणिनापिदध्यात्। अंगुलीभिरेवाकाशवतीभिरपिधातुमशक्यत्वात्। १६४
एवमुत्तरे। एवमुत्तरे अपि पात्रे प्रतिगृह्य सादनापिधाने कुर्यादित्यर्थः। सव्येन त्वपि
तेन सव्येनापोछादनं भवति। तस्मिन्निति वचनमुरोरपोछादितप्रदेशे सादनार्थं २

धायतयोः प्रतिग्रहो भक्षणं च। प्रतिग्रहभक्षणकाले तु सव्येनापिधानं भवतीत्यर्थः। मैत्रा

वरुणस्यायं वां मित्रावरुणा होता यक्षन्मित्रावरुणा गृह्णा नाज मदग्निनेति। एते तु वसुर्वि

दद्वस्कारिति प्रतिगृह्य दक्षिणेनैंद्रवायवं हृत्वाभ्यात्मं सादनं। आश्विनस्य प्रातर्युजा वि

बोधय होता यक्षद् अश्विना नासत्या वा ऋधाना शुभस्पती इत्येते तु वस्कः संयद्वस्कारिति प्र

तिगृह्यैवमेव हृत्वोत्तरेणाध्रिरः परिहृत्वाभ्यात्मतरं सादनं। एवमेवेति। यथा मैत्राव

रुणः पूर्वमासादितमैंद्रवायवं दक्षिणेन हृत्वाभ्यात्ममासादितः। एवमाश्विनः पूर्व

सादितावैंद्रवायवमैत्रावरुणौ दक्षिणेन हर्तव्य इत्यर्थः। ततस्तमुत्तरेणाशिरः पश्चा

न्नीत्वा पुनर्दक्षिणेन शिरः पुरस्तान्नीत्वा मैत्रावरुणाद् अप्यभ्यात्मतरं सादयेत्। अनुव

चनप्रैषयाज्यास्कानित्योध्वर्युतः संप्रैषः। अनुवचनादिष्वध्वर्युसंप्रैषः आकांक्षणी

सू० वृ० ५ यः। अध्वर्युग्रहणमध्वर्युपुरुषाणामपि प्रदर्शनार्थं। अत एवाध्वर्यंत इत्युक्तवान्नाध्वर्यो
१६५ रिति। नित्यवचनं नित्य एव प्रैष आकांक्षणीयो नानित्य इत्येवमर्थं। तेन पशुसूक्तवाक
प्रैषादौ न नियमेन प्रैष आकांक्षणीयः। उन्नीयमानेभ्योऽन्वाहा ता वह त्वसा विदेव
195 मिहोपयातेत्यनुसवनं। उन्नीयमानेभ्य इति वचनं चमसेषून्नीयमानेभ्यः सोमेभ्य
इत्यर्थः। अनुसवनं सवने सवन एतेषामेकैकं सूक्तमनुब्रूयादित्यर्थः। होता यक्ष
दिंद्रं प्रातः प्रातःसावस्य होता यक्षदिंद्रं माध्यंदिनस्य सवनस्य होता यक्षदिंद्रं तृतीय
स्य सवनस्येति प्रेषितः प्रेषितो होतानुसवनं प्रस्थितयाज्याभिर्यजति। एतैस्त्रिभिः प्रै
षैर्यथालिंगमेव प्रेषितो होतानुसवनं स्वाभिः प्रस्थितयाज्याभिर्यजति। होतृग्रहणं १६५
होतुरेव प्रैषेण प्रेषणं नान्येषामित्येवमर्थं। अनुसवनं सवने सवने प्रैषेण प्रेषितो
= प्रस्थितानां सोमानां संबंधिन्यः याज्याः प्रस्थितयाज्याः इति विद्यारण्यः = २

होतैव यजेदित्यर्थः। नामादेशमितरे। इतरे प्रशास्त्रादयो नामादेशं प्रेषिता यजेयुः न हो
ता। तेन यद्यप्यध्वर्यवो होतर्यजेति प्रेष्यंति। तथाप्यत्र प्रशास्त्रैव यजेत्। नामादेशमिति
नामादिश्यादिश्येत्यर्थः। इतरेषां क्रमस्वरूपे आह। प्रशास्ता ब्राह्मणाछंसी पोता नेष्टा
ग्नीध्रः। अछावाकश्च। सूत्रभेदकरणं तस्यैवोत्तरसूत्रे विशेषविध्यर्थं। उत्तरयोः सव
नयोः पुराग्नीध्रात्। इदं ते सोम्यं मधु मित्रं वयं हवामहे इन्द्र त्वा वृषभं वयं मरुतो यस्य हि
क्षये ग्ने पत्नीरिहा वह होक्षान्नाय वशान्नायेति प्रातःसवनिक्यः प्रस्थितयाज्याः। पुनः
प्रस्थितयाज्यावचनं प्रशास्त्रादिसंबंधिनीनामपि तत्संज्ञाप्रापणार्थं। अछावाकस्या
२ यजतीति ज्ञनोच्यते प्रातर्यावभिरागतमिति स्वावसरे वक्ष्यते। पिबा सोममभि यमुग्र तर्द इति ति
स्त्रो वीडे हि सोमकामं त्वाहुः त्वं वायं सोमस्त्वमेह्यर्वाङ् इन्द्राय सोमाः प्रदिवो विदाना आ

सू०वृ०५ पूर्णोऽस्य कलशः स्वाहेति माध्यंदिन्यः। इंद्रक्रतुभिर्वाजवद्भिः समुक्षितमिंद्रावरुणा सुत
१६६ पाविमं क्रतमिंद्रश्च सोमं पिबतं बृहस्पत आ वो वहंतु सप्तयो रघुष्यदो मे वनः स्पृहवा आ
हि गंतनेंद्राविष्णू पिबतं मध्वोऽस्येमं स्तोमम र्हते जातवेदस इति तातश्यसवानिक्यः।
सोमस्याग्ने वीहीत्यनुवषट्कारः। अयमनुवषट्कारः कर्तव्यः। अनुवषट्कारस्य प्रवृ
196 त्तिविषयमाह। प्रहितया [illegible] कृशस्त्रयाज्यास्क मरुत्वतीये हारियो
जने माहिम्नि। आश्विने च तैरोअह्न्ये। सूत्रभेद ग्रहणं वैषम्यख्यापनार्थं। वैषम्यं च शा
स्त्रांते क्रियमाणापि शास्त्रयाज्या न भवतीत्येवमर्थं। तेनायाज्यमाश्विनमित्यवगतं भवति।
तदेषाभियज्ञगाथा गीयते। क्रतुयाजां छ्विदेवत्यान्यश्च पात्नीवतो ग्रहः। आदित्यग्रह सा १९६
वित्रौ तां स्म मानुवषट्कुर्यादिति। एतद्यज्ञगाथा समको वेदो यष्टारं शास्ति। गाथाशब्देन

× प्रतिवषट्कारभक्षणे २

आत्मपागताक्रु चउच्यंते। यत्रार्थीगाथायत्र गाथासेषा तदनुवषट्कारविधानं प्रत्युतइत्य च्य
न र्थः। कोटिद्वयसंकीर्तनंसानुवषट्कारा अनुवषट्काराश्चैतावंत एवेति ज्ञापनार्थं। प्रति
वषट्कारं भक्षणं प्रयत्नं कुर्यान्नात्र भक्षो विधीयते अन्यैर्विहितत्वात्तेन वचनांतरेण वि त्र २
२ मात्र हिते भक्षे तस्यावृत्तिर्मात्रगुणो विधीयते। यत्र द्विर्वषट्कारोस्ति तत्र भक्षोपि द्विरावर्तते। य
त्रतु सकृदेवेति सिद्धं। तूष्णीमुत्तरं। उत्तरं प्राशनं तूष्णीमेव कर्तव्यं। वषट्कारद्वयप्रसंगाद
त्रैवेदमुक्तं। एत्यध्वर्युः। आहवनीयप्रदेशात्सद आगच्छतीत्यर्थः। अयाळग्नीदिति पृच्छति।
आगच्छंतमध्वर्युं होता पृच्छतीत्यर्थः। अयाळिति प्रत्याह। प्रत्याहाध्वर्युरित्यर्थः। सभद्र
मकर्योनः सोमस्य पाययिष्यतीति होता जपति। होतृग्रहणमध्वर्य्वधिकारात्॥५॥ ऐंद्रवाय ध्व २
वमुत्तरेर्धे गृहीत्वाध्वर्यवे प्रणाम्य ये देवा वसवः पुरूवस्कारिहवसः पुरूवसुर्मयि वस्कः उरु

× सकृदेव वषट्कारो ति लत्रा ५

स्तु० सू० ५ वस्कर्वाक्यावाचं मे पात्युपहूता वाक्सह प्राणेनोपमां वाक्सह प्राणेन ह्वयतामुपहूतात्कयोर्दे
१९७ व्यासस्तनूपावानस्तन्वस्तपोजा उपमां ह्वयोर्देव्यासो ह्वयं तां तनूपावानस्तन्वस्तपोजा इति।
नहोतृ० ३ इतरे पात्रे सव्येनापिधायेंद्रवायवं दक्षिणेनोत्तरे भागे गृहीत्वाध्वर्योरपि ग्रहणायप्रणाम
येत्। एष वसुरिति मंत्रेण। अध्वर्यउपह्वयस्वेत्युक्त्वावघ्राय नासिकाभ्यां वाग्देवी सोमस्य
197
तृप्यत्विति भक्षयेत्सर्वत्र। अत्रोपहवविधानं क्रमार्थं। उत्तरत्र विहितत्वात्। नासिकाभ्या
इ० एकमप्य स्तेनघ्र मिति वचनं नासिकाद्वयेनावघ्राणं नियमेन कर्तव्यं। तेनान्यत्रेंद्रियकार्यमानियमेकेने
तव्यं। एकेन द्वाभ्यां वेति सिद्धं। सर्वत्रेतिवचनमन्यत्राध्ययमेवं भक्षणमंत्रस्यादित्येव सोम ३
मर्थं। प्रतिभक्षितं होतृचमसे किंचद्द्रवनीयानाचम्योपक्रानादिपुनः संस्थायित्वानसा म १९७
मेनोच्छिष्टा भवंतीत्युदाहरंति शेषं होतृचमस आनीयोत्सृजेत्। होत्रा भक्षितमध्वर्यु

णाच प्रतिभक्षितं होतृचमसे किंचिद्दासिच्यानाचम्यैवोपक्वानादि पुनः सह भक्षयित्वा
शेषं होतृचमस आनीय तस्मात्त्रमुत्सृजेत्। न प्रागुत्सृजेदित्यर्थः। पुनर्भक्षे प्रतिप्रस्था
तर्युपहवयाचनं कर्तव्यं। अस्य सूत्रस्य मध्ये भक्षयानिमित्ताशुचित्व। निर्हरणाय प्रस
क्तमाचमनमकृत्वोपहवादि कर्तव्यमित्युक्तं। आँच म्योपक्वानादीति। सोयमाचमनप्र ना४
तिषेधः सोमभक्षणेऽशुचित्वाभावादुक्त इति तदुपपादनार्थं तत्सूत्रमध्य एव न सोमेनो
च्छिष्टा भवंतीत्युदाहरंतीत्युक्तवानाचार्यः। उदाहरंतीति वचनादिदमपि स्मृतिवचनमि
ति दर्शयति। सोमेनेति। सोमभक्षणेनेत्यर्थः। तेनान्यद्रव्यभक्षणेनाशुचित्वमेवेति गम्य
ते। सोमाधिकारे पुनः सोमग्रहणं सर्वसोमभक्षणप्रापणार्थं। एवमुत्तरे। एवमुत्तरेष्व
पि ग्रहपात्रे भक्षयेत्। तत्र विशेषमाह। न त्वेनयोः पुनर्भक्षः। अनयोरपि प्रतिप्रस्थात

स्रु० द्व० ५ र्युपहवयाचनमस्ति। नकंचनह्विर्देवत्यानामनवनीतमवसृजेत्। ह्विर्देवत्यानां मध्ये कंच
१६८ नग्रहं होतृचमसेऽनवनीतं नोत्सृजेदित्यर्थः। मैत्रावरुणा मेषवस्कविद्वस्करिहवस्क
विद्वस्क र्मयिवस्कार्विद्वस्क श्वस्क व्याश्वस्कोर्मे पात्युपहूतं चक्षुः सह मनसोपमां चक्षुः
198 सह मनसाह्वयतामुपहूताॠषयो दैव्यासस्तनूपावानस्तन्वस्तपोजा उपमामृषयो दै
व्यासो ह्वयंतां तनूपावानस्तन्वस्तपोजा इति। अध्वर्यवेप्रणामयेदिति शेषः। अक्षीभ्यां
विहावेक्षणं दक्षिणेनाग्रे। पश्चात्सव्येनेत्यर्थः। सव्येन पाणिना होतृचमसमाददीतेतु
वसूनां पतिर्विश्वेषां देवानां समिदिति। मैत्रावरुण पात्रोत्सर्गांतं कर्म कृत्वा दक्षिणेना
श्विनमपिधाय सव्येन पाणिना होतृचमसमाददीत मंत्रेण पाणिग्रहणामपिधानम १६८
पिपाणिनैवाकाशवत्संगु लीभिरपिदध्यात्। तस्येति सव्यस्येत्यर्थः। ऊरोरितिवचन
×\ लियुक्तेन कुर्यात्। नांगुलीभिरेवेत्येवमर्थं। तस्यारत्निनातस्योरोर्नसनमपोच्छाद्यतस्मिंस्साद\
+\ यित्वाकाशवलीभिरंगु\×

म्रोरैकदेशस्यथावत्संयोजनमपोच्छादनंनसर्वस्यैतेनैवमर्थं।अपिधानमपिसव्येनाधि
हृतत्वादन्यस्यान्यत्रव्यापृतत्वाच्च।आश्विनंयथाहृतंपरिहृत्यपुनःसादयित्वाध्वर्युर्वै
प्रणामयेद्देववस्कः संयद्वस्कारिहववस्कः संयद्वस्कर्मयिवस्कः संयद्वस्कः श्रोत्रपाश्रोत्रं
मेपाह्युपहूतंश्रोत्रंसहात्मनोपमांश्रोत्रंसहात्मनाह्वयतामुपहूताऋषयोदैव्यासस्तनू
पावानस्तान्वस्तपोजाउपमामृषयोदैव्यासोह्वयंतांतनूपावानस्तान्वस्तपोजाइति।होतृ
चमसंसव्येनापिधायततोदक्षिणेनाश्विनंगृहीत्वांगिरसोदक्षिणतःपश्चान्नीत्वात स्व
स्यैवोत्तरतःपुरस्ताद्दानीयस्यस्थानएवोरोसादयित्वाततःप्रणामादिकुर्यात्।कर्णाभ्यां
त्विहोपोयच्छेद्दक्षिणायाग्रेनिधायहोतृचमसंस्पृष्ट्वोदकमिव्वामुपक्रयते।आश्विन
मुत्सृज्यततोदक्षिणेनैवपाणिनाहोतृचमसंनिधायस्पृष्ट्वोदकमिव्वामुपक्रयते।उपो

स०सू०५ यच्छंति चमसान्। इडोपह्वानकाले च मासिनः स्वं स्वं चमसमिडासमीपे उद्यच्छंति चमसा
१६६ ध्वर्यवो वा। अवांतरेडां प्राश्याचम्य होतृचमसं भक्षयेदध्वर्यउपह्वयस्वेत्युक्तः। अवांत
रेडाप्राशनविधानमंत्रक्रमार्थं। आचमनविधानं नियमार्थं। इडोपह्वानानंतरमवां
तरेडाप्राशनमेव कृत्वाचम्य चमसमेव भक्षयेदिति। तेन इदानीमिडाभक्षणं नास्तीति
विज्ञायते। इदमप्यनेन ज्ञायते प्रकृताववांतरेडाप्राशनमिडाप्राशनं च कृत्वा पश्चाच्छौ
चार्थमाचमनं भवति न तयोर्मध्ये पीति। अध्वर्यउपह्वयस्वेत्युक्त्वा भक्षयेदित्यनेन वच
नेनात्र चत्वारोर्थाः सूचिता भगवता सूत्रकारेण। तत्रायमेकोर्थः। नानुपहूतेन सोमः
पातव्यः। न वै सोमपीथेन हवार्धुको भवतीति श्रुतिवचनात् उपहूतेनैव सोमो भक्ष १६६
यितव्य इति। अयमपरोर्थः। उपहवयाचनं कर्मनामधेयेन संबध्यते नोपह्वयस्वेत्ये

वमेतेन वाक्येनेति। अयमप्यपरोर्थः। यत्र क्व च सोमे वषट्कारेण वा समाख्यया वा भ
क्ष्यमाणे होमाभिषवनिमित्तेन भक्षणेनैकस्मिन्पात्रे प्रतिभक्षितया स भक्षो नास्ति
तत्राध्वर्योरिवोपहवयाचनमिति। अयं चापरो भक्षणामपि कर्तव्यमिति। एतदुक्तं भ
वति। अवांतरेडां प्राश्य भक्षणमकृत्वा चम्य होता स्वचमसं भक्षयेदध्वर्यो उपहवमि
ष्ट्वा वाग्देवीत्यनेन मंत्रेणेति। दीक्षितो दीक्षिता उपह्वयध्वं। दीक्षितश्चेद्धोता तदा दी
क्षितामुपह्वयध्वमित्युक्त्वा स्वचमसं भक्षयेत्। यजमाना इति वा। दीक्षित इत्यनुवर्त
३ ना ते। यजमानो उपह्वयध्वमित्युक्त्वा वा भक्षयेत्। मुख्यान्वा पृथग्घोत्रका उपह्वयध्वमि
तीतरान्। एवं चोपहवयाचनं दीक्षितस्य मुख्यानध्वर्य्वादीनध्वर्यउपह्वयस्व ब्रह्म
न्नुपह्वयस्व उद्गातरुपह्वयस्वेति पृथगुक्त्वा अमुख्यांत्सर्वांत्सकृद्देव होत्रका उप

स०दृ०५ ह्वयध्वमित्येवमर्थः। एवमितरे। अदीक्षितो दीक्षितश्च होता यथोक्तमुपहवयाचनं कृत्वास्वं
२०० चमसं भक्षयेदित्युक्तं। एवं दीक्षिता अदीक्षिताश्च मैत्रावरुणादयः स्वंस्वं चमसं भक्षयेयुः
२४० तेनैवोपहवयाचनप्रकारेण। दीक्षितानामयमेवोपहवयाचनप्रकारः सर्वत्र। प्रतिभ
क्षिणि सत्यसति वा। अदीक्षितानां कश्चिद्विशेषोस्तीत्याह। यथासभक्षं त्वदीक्षिताः। यो
यस्य सभक्षः स यथासभक्षः। सभक्षो नाम समानभक्षः। एतदुक्तं भवति। एकस्मिन्का
ले एकस्मिन्पात्रे ययोर्भक्ष उत्पद्यते तयोरन्यतरोन्यतरं प्रतिभक्ष इत्युच्यते। स एव हो स
स माभिषवकर्ता वषट्कर्तारं प्रतिभक्ष इत्यर्थः। यत्रैवं भवति तत्र तमेवोपह्वयभक्षये
न्नाध्वर्युमित्यदीक्षितानामेवायमपवादः। दीक्षितानां तु ग्रहेषु चमसेषु च दीक्षिता उ २००
पह्वयध्वमित्यादयस्त्रय एव प्रकाराः नान्यः कश्चिदपीति। मुख्यचमसादचमसाः।

=ग्रावस्तुदुन्नेतःसुब्रह्मण्यानामपीत्यर्थः।=१

होतास्वंचमसंभक्षयेदित्युक्त्वाएवमितरइत्युक्तं। तेनहोतुरन्येषांसर्वेषांभक्षयांविहि
तमितिमन्यमानाश्चमसिनश्चमसेभ्योभक्षयंति। अचमसाःपुनःप्रत्यासत्त्यास्ववर्ग्य
स्यमुख्यस्याद्वितीयस्यतृतीयस्यवासन्नोंतरतमस्यचमसवतश्चमसान्भक्षयेयुः। य
स्यपुनर्होमाभिषवनिमित्तंभक्षणमस्तितस्यतदेवभवति। इतरेषांमुख्यस्यचमसादि
तियेभ्रमंतितेषांभ्रांतिमपनुनुत्सुरपिपूर्वपक्षेनुष्ठाननिर्वाहंवर्णितवानाचार्यः। एवं
प्रकारेष्वेवंन्यायोनुसर्तव्यइतिप्रदर्शयितुंमुख्यशब्दोत्रापेक्षिकोगृह्यते। प्रत्यासत्त्या
नुगुण्यादेनंपक्षंदूषयति। द्रोणकलशाद्वा। वाशब्दःपक्षंव्यावर्तयति। नात्राचमसानां
सोमभक्षणमस्तिविधानाभावात्। सोमभक्षस्यहिनिमित्तंवषट्कारोहोमाभिषवौ
चमसिनांच। अचमसानांतुतेषांनिमित्तानामन्यतमदपिनास्ति। अतस्तेषामत्रभ

सू०९०५ ...क्षोनास्तीतिसिद्धं।द्रोणकलशात्तुभक्षणमस्तिवचनाद्यथाचमसमन्यांश्चमसांश्च
२०१ मासिनोभक्षयंतिअथैतस्यहारियोजनस्यसर्वएवलिप्संतइतिश्रुतिवचनं।तेनद्रोण
201 कलशेहारियोजनशेषस्यचमसिभिरचमसैश्चभक्षणंहितं।तदनेनप्राप्तंभक्षणम वि
यंसूत्रकारोवध्यापास्वरूपेणविधास्यति।तदेवंरूपमेवानेनोच्यतेनभक्षांतरमित्यव
गंतव्यं।उक्तःसोमभक्षजपःसर्वत्र।यउक्तःसोमभक्षणमंत्रोवाग्देवीतिसर्वत्रसोम
नै भक्षेभवतिनद्रव्यांतरभक्षे।पूर्वंसर्वग्रहणाद्धिदेवत्येष्वेवचरितार्थमितिपुनस्तद्विधी
यते।चमसानांभक्षणमुक्त्वातत्प्रसंगेनसर्वत्रसोमभक्षस्यानिमित्तमुद्गात्रादिचम
सभक्षयितृत्वविचारव्याजेनदर्शयितुमाचार्यांतरमतान्युपन्यस्यतिस्म।होतुर्वषट्का २०१
रेचमसाहृयंतदुद्गातुर्ब्रह्मणोयजमानस्यतेषांहोताग्रेभक्षयेदितिगौतमोभक्षस्य

वषट्कारान्वयत्वात्। सोमभक्षयोत्री। यानि निमित्तानि श्रुतौ निर्दिष्टानि। वषट्कर्तुः प्रथमभ
क्ष इति प्राथम्यविशिष्टं भक्षणं वषट्कारनिमित्तं विदधाति। अभिषुत्य हुत्वा भक्षयतीति
होमाभिषवनिमित्तं विदधाति। होतृश्चमस इत्यादि समाख्याबलात् सापि समाख्या भक्ष
त्तमि योनिमि[त्तमि]ति गम्यते। तत्र होमाभिषवावस्मदीयेषु न स्त इति तन्निमित्तस्य भक्षस्यात्र विचा
रो न कृतः। तत्र वषट्कारनिमित्तं समाख्यानिमित्तं च भक्षणं विहितमेवास्तीति मन्य
मानो गौतमस्तेषां होताग्रे भक्षयेदित्युक्तवान्। अग्रवचनसामर्थ्यादुद्गात्रादिचमस
ग्रहणं च सर्वचमसानां प्रदर्शनार्थं। तथाहि सर्वे चमसाः शास्त्रेण वषट्कारेषु हूय
माना दृश्यंते किं त्वेषां त्रयाणां विशेषोस्ति सर्वदा परवषट्कारेषु हूयंत इति। भक्षस्य व
षट्कारान्वयत्वादिति वषट्कारनिमित्तत्वादित्यर्थः। एवं गौतमेनोक्ते समाख्याया भ
४ क्षयोपि प्रख्यापद्भक्षयेयुरिति अस्याभिप्रायोऽवगम्यत एव। होतृग्रहणं शास्त्रेण चतुर्णामपि प्रदर्शना ४
४ र्थं। उद्गात्रा ४

मंत्र्य
सू० १६० ५ सोनविधातुं शक्यते इति मानस्तोल्वलिराह। अभक्षणमितरेषामिति तोल्वलिः कृतार्थ
२०२ त्वात्। वषट्कर्तृभक्षणेनैव शेषस्य प्रतिपत्त्यंतरान्वेषणेनैरपेक्ष्यं भवतीति कृतार्थत्वाद्
त्यक्तं। यद्यपरं समाख्यापि भक्षस्य विधायिका स्यात्तदा तस्मिन्कृतेप्यकृतार्थमेवावति
202 ष्ठते। सा च न विधायिका नामधेयत्वात्तयापि तादृशानामेव पदानां समन्वयदर्शनादिति।
एवमुक्ते गाणगारिर्गौतमपक्षमेव समर्थयितुमाह। भक्षेयुरिति गाणगारिरतः सं अस्मात्
स्कारत्वात्काचतचमसतास्यान्न चान्यः संबंधः। उन्नात्रादयोपि भक्षयेयुः वषट्कार
निमित्तभक्षणेन संस्कृतानामपि शेषाणामस्मात्समाख्याभक्षणादपि संस्कारत्वात्॥
वचने सति संस्कृतानामपि संस्कारस्य संभवोस्तीत्यर्थः। येतु तत्संस्कारत्वादिति पठंति। २०२
तेषामयमर्थः। योयं समाख्याभक्षात्संस्कारः वषट्कारभक्षसंस्कारोन भवति ततोन्य

१४ वेत्यर्थः। ननु समाख्या भक्षणं न विदधाति स्तुत्यं। तत्संख्यरूपेण न विदधाति कार्यत्वस्तुत्यविदधात्येव। कथं ज्योति ~

त्वादित्यर्थः। अन्यत्वे चाविरोधाच्च समुच्चय ऐन्द्राग्नमाधिकारनियोगः स्वप्रकरणाधीत सकलपदोद्बोधितपदार्थावच्छिन्नः प्रतीयमानः कार्यात्मकत्वादात्मनः स्वावच्छेदकभू तानपि कार्यतयावगमयन् होतृचमसपदाद्यभिहितान् संबंधिविशेषान् कार्यतयावग मयतीत्येवं। स च संबंधिविशेषो होतास्मिंश्च भवतीति होतृचमस इति। एतमुक्त्वान्यः स्व स्वाम्यादिलक्षणोत्र न संभवति। एवमप्यर्थं सूत्रकारः सूचितवान्। का च तच्चमसतास्या न्न चान्यः संबंध इति वदन्। यदा चमसिनां चमसेषु वषट्कारनिमित्तं समाख्यानिमि त्तं च भक्षद्वयमागच्छति पूर्वं वषट्काराद्भक्षयित्वा होमाभिषवभक्षयोश्च कृते ततः स माख्यातो भक्षयेत्। यत्र पुनः प्रतिभक्षिता नास्ति तत्रोभौ भक्षौ तंत्रेण सिध्यतः। वष ट्कारनिमित्ते भक्षे सानुवषट्कारेषु सर्वत्र द्विरावृत्तिरस्त्येव। भक्षयित्वा पामसोमम

॥ ऐद्राग्नेष्वो नियोगाख्यो धर्मः स एव ॥ मिसंख्यानां मध्ये प्रकरणैः ॥ ~

सू०श्रौ०५ मृताअभ्मृ म शंनोभवहृद आपीतइंदविति मुखहृदयेअभिमृशेरन्। भक्षणानंतरमेताभ्या
२०३ मृग्भ्यांमुखहृदयेअभिमृशेरन्। अद्भिर्यथासंख्येन। अनयोराप्यायनत्वं दर्शयिष्यति। प्र
तिपदायद्रोणकलश मात्मानमाप्याय्येति। आप्यायनत्वेचाद्भिः संस्पर्शनंभवत्येवेति।
आप्यायस्वसमेतुते संतेपयांसिसमुयंतुवाजा इति चमसानाद्योपाद्यान्पूर्वयोः सवनयोः
। स्वंस्वं चमसं द्वाभ्यामृग्भ्यामद्भिरभिमृशेरन् पूर्वयोः सवनयोराद्यांहितीयांश्च चमसान्।
आद्यांस्तृतीयसवने। तृतीयसवने आद्यानेव चमसानभिमृशेरन्। एतदप्याप्यायनं।
चमसमाप्याययत्यभिरूपाभ्यामिति फलचमसेष्कृतोदर्शनात्। सर्वत्रात्मानमन्यत्रैक
पात्रेभ्यः। एकपात्राण्यूर्ध्वपात्राणि तानिवर्जयित्वासर्वत्रात्मानमाप्याययेयुः। आत्मश ३०३
ब्देनात्रमुखहृदयेउच्येते। आप्यायितांश्चमसान्सादयंति। तेनाराशंसाभवंति। नारा

शंससंज्ञाभवंतीत्यर्थः। अन्वर्थसंज्ञेयं नराशंसानामत्र यः पितृगणाः ऊमाऔर्वाः का
व्याश्चेति। ते चानुसवनं यथासंख्येनाप्यायितानां चमसानां देवताभवंति इति नाराशंसा
श्चमसाभवंतीति॥ ६॥ एतस्मिन्काले प्रपद्याच्छावाक उत्तरेणाग्नीध्रीयं परिव्रज्य पूर्वे
णासद आत्मनो धिष्ण्यदेशउपविशेत्। अच्छावाकस्य कर्मकालत्वादेवास्मिन्कर्म
काले प्रपदने सिद्धे कालोपदेशो च्छावाकः कर्मकाल एव प्रपद्येतेत्येवमर्थो। ते नान्ये
ष्कर्मकालात्प्रागेव प्रातरनुवाककाले सर्वे प्रपद्येरंनिति सिद्धं भवति। प्रपद्येति व
चनं यजमानत्वेनान्यथा वा प्रपन्नोप्यच्छावाकीयत्वायास्मिन्काले नियमेन प्रपद्ये
तेत्येवमर्थं। स्वस्य धिष्ण्यस्य पुरस्तादहूरे सदसो बहिरुपविशेत्। पुरोळाशशकलं प्र
तामिळामिवोद्यम्याच्छावाकवदस्वेत्युक्तोऽच्छावोऽग्निमवस इति त्वं च मन्वाह। शकलं शाकलं

स्रु०ह०५ केलैशेमित्यर्थः।प्रत्तमध्वर्युणा।इडामिवोद्यम्यास्यसंमितंप्राणसंमितंवेत्यर्थः।संप्रेष
२०४ पाठःस्वशास्त्रचोदनयासंप्रेषस्यासंवादेसत्यप्यनुवचनसिध्यर्थं।अंत्येनप्रणवेनोप
204 संतनुयाद्यजमानहोतरध्वर्योग्नीन्ब्रह्मन्पोतर्नेष्टरुतोपवक्तरिषेषयध्वमूर्जोर्जयध्वं
निवोजामयोजिहतान्यजामयोनिःसपत्नायामनिबाधितासोजयताभीत्वरीजयता
भीत्वर्याःश्रवद्वइंद्रःशृणवद्वोअग्निःप्रस्थायेंद्राग्निभ्यांसोमंवोचतोपोअस्मान्ब्रा
ह्मणान्ब्राह्मणाह्वयध्वमिति।अंत्येनप्रणवेनेतिएतावतैवप्रणवेननिगदस्यसंता
नेसिद्धेउपसंतनुयादितिवचनंकृत्स्नस्यास्यनिगदस्यानवानत्वसिध्यर्थं।समाप्ते
स्मिंनिगदेध्वर्युर्होतर्युपहवंकांक्षते।एतदध्वर्योरुपहवयाचनमछावाकार्थं।समा २०४
प्तइतिवचनमुपहवयाचनकालविधानार्थं।अस्मिन्नितिवचनमुत्तरोपिनिगद

एवनकृत्स्न उपहवमंत्रइत्येतद्दर्शयितुं।तेनप्रत्येतेत्यादिउपहूताइत्यंतोनिगदएवउ
पहूतइत्येतावानेवोपहवमंत्रइतिवेदितव्यः।प्रत्येतास्कन्वन्यजमानःसक्तावामाग्र
भीत्।उतप्रतिष्ठातोपवक्तरूतनोगावउपहूताउपहूतइत्कपक्षयते।उपहूताइत्कृत्वा
उपहूतइत्कपक्षयतेइतिमध्येध्याहारःकर्तव्यः।उपहूतइत्येषप्रत्क्षपहवमंत्रः।सर्व
त्रचायमेवप्रत्क्षपहवमंत्रः।अपेक्षितत्वादन्यस्यचानाम्नानात्।उपहूतःप्रत्यस्मा
इत्कन्नीयमानायानूच्यप्रातर्यावभिरागतमितियजति।उपहूतइतिवचनमछा
वाकस्यग्रहणार्थं।तेनोन्नीयमानायचमसायप्रत्यस्माइत्येतत्सूक्तमछावाकएवा
नुब्रूयात्।ततःप्रातर्यावभिरित्यनयायजतिएषास्यप्रस्थितयाज्या।निधायपुरोळा
शद्दगखंस्पृष्ट्वोदकंचमसंभक्षयेत्।निधायेतिवचनादेतावंतंकालंद्दगखमुधेवा ध्ये

सू० ६२०५ सीत। नास्पृष्टोदकाः सोमेनेतराणि हवींष्यालभेरन्। सोमेनेति सोमेन संस्पृष्टा इत्यर्थः।
२०५ तेन सोमस्पृष्टवंतः उदकोपस्पर्शनमकृत्वेतराणि पुरोडाशादीनि हवींषि नालभेरन्।
पुरोडाशं स्पृष्टवंतः सोमस्पर्शने उदकोपस्पर्शनं विधाय तदुपपादनाय वक्तव्ये सति
विपरीतमुक्तं। तस्यायमभिप्रायः। यथास्पृष्टसोमस्य हविरंतरालंभने उदकोपस्प
र्शनं तथास्पृष्टपुरोडाशादिकस्य च सोमस्पर्शने इत्युभयथापि भवतीति। न के
वलमिदं तत्स्पर्शन एव तद्धस्तात्र स्पर्शनेपि भवति। निधाय होतृचमसं संस्पृष्टोदक
स मितिच मसस्पर्शनेपि विधानात्। आदायैनद्दादिस्यप्रभृतीधिष्ण्यानुपरुह्यापर
याद्वारा सदः प्रसृप्य पश्चात्स्वस्य धिष्ण्यस्योपविश्य प्राश्नीयात्। एतदृग्गच्छमादा २०५
यतश्चस्त एव धिष्ण्योपरुह्यानादियोऽग्रे स्वेवमंतं कृत्वा तत्र रुह्य एव तत्प्राश्नीयात्।

उपविश्यप्राश्नीयादितिउपविश्यजपित्वाप्राश्नीयादित्यर्थः। अपरयाद्वाराप्रसर्पण
विधानात्कार्य[illegible]भिमर्शनंचतस्यामेव। सदःप्रसर्पणेकृतेस्वस्यैवधिष्ण्यस्यपश्चा
दुपवेशनेसिद्धेयत्पश्चात्स्वस्यधिष्ण्यस्योपवेशनंविदधातितत्तत्रैवदृगब्धप्राश
नार्थं। तत्रैवोपविश्यदृगब्धंप्राश्नीयात्। नबहिर्निष्क्रम्येति। इममेवार्थंशाखांतरे
चोद्योत्तरभंग्याश्रुतिरेवसाधयति। तदाहुर्यदन्यऋत्विजोंतःसदसिसोमंप्राश्नं
ति। अथकस्मादच्छावाकोबहिःसदसिप्राश्नातीति। यद्देवैतदंतःसदसिपुरोळा
शदृगब्धंप्राश्नातितेनास्यांतःसदसिसोमःप्राशितोभवतीति। उपविष्टेब्रह्माग्नी
ध्रीयंप्राप्यहविरुच्छिष्टंसर्वेप्राश्नीयुःप्रागेवेतरेगताभवंति। यदाच्छावाकउपवि
ष्टस्तदाब्रह्मातीर्थेननिष्क्रम्यबहिर्वैघाग्नीध्रीयंप्राप्नोति। अच्छावाकश्चदृगब्धं

स्मृ॰ वृ॰ ५ प्राश्यतीर्थेन निष्क्रम्याचम्य तं देशं प्राप्नुयात्। इतरे होत्रादयो ऽप्यनुपविष्ट एवाग्नीध्रात् तं दे-
॥२०६ शं प्राप्ता भवेयुः। एते सर्वे संहतास्तस्मिन्देशे हविःशेषं प्राश्नीयुः। सर्वग्रहणं पौर्णमासिक-
कर्तृनिवृत्त्यर्थं। आग्नीध्रीयं प्राप्येति वचनं प्राशनस्य बहिर्वेदिदेशत्वे सिद्धे ऽप्याग्नीध्रीयमं-
206 उपबहिर्वेदिदेशप्रापणार्थं। तत्रार्धमंतर्वेद्यर्धं बहिर्वेदि भवति। हविरुच्छिष्टशब्देन चा-
त्र धानादीनां शेषाभिक्षापात्रस्थमन्यदप्युच्यते। प्राश्य प्रतिप्रसर्प्य॥ ७॥ ऋतुयाजैश्चरं-
ति। प्राशने प्रकृते प्राश्य वचनमन्यदप्यस्मिन्नेव काले कर्तव्यं निवृत्त्यर्थं भोजनादि कुर्यात्
न प्रागित्येवमर्थं। प्रतिप्रसर्प्य वचनं सर्वेषु प्रतिप्रसृप्तेष्वृतुयाजचरणार्थं। तेषां प्रे-
षाः। तेषामृतुयाजसंज्ञानां यागानां प्रैषा जपि भवंति। पंच मं प्रैषसूक्तं। प्रैषसमा- ॥ २०६
म्नायेयत्पंचमं प्रैषसूक्तं तदेषां प्रैषा भवंति। तेन तेनैव प्रेषितः प्रेषितः स स यथा प्रे-

षं यजति। प्रैषास्तावत्सर्वे मैत्रावरुणेन वक्तव्याः। अस्मिन्सत्रे ऋतुयाजानां याज्या यष्टा
रश्च विधीयंते। येन येन प्रैषेण यथा प्रैषं यः प्रेषितस्तेन तेनैव प्रैषेण स स एव यजति ना
न्यः। तेनैतत्साधितं भवति मैत्रावरुणस्य यष्टृत्वमपीति। होताध्वर्युगृहपतिभ्यां होतरे
दि तद्यजेत्युक्तः। यजेति शेषः। होतरेतद्यजेत्येताभ्यामुक्तो होता यजेत्। स्वयं षष्ठे पृष्ठ्याह
नि। पार्ष्ठिके षष्ठेहनि स्वयमेवाध्वर्युगृहपती यजतः। पश्चादुत्तरवेदेरुपविश्याध्व
र्युः पश्चाद्गार्हपत्यस्य गृहपतिः। अध्वर्युर्यजमानश्चानिरसनं कृत्वा मंत्रदेवतयोः प
श्चादुपविश्य यजतः। पश्चादिति प्रकृते पुनः पश्चादिति वचनमन्येषामुपवेशनकाला
त्पश्चाद्यागकाल एव उपवेशनं गृहपतेरित्येवमर्थं। अध्वर्यू यजतमिति द्वित्वयुक्तेपि
संप्रैषे मुख्य एवाध्वर्युर्यजति नान्यः। अथैते ऋतुपात्रमानंतर्येण वषट्कर्तारो भक्षयंति।

सू० ह० ५ अथेति सर्वेष्वेवेष्टेष्वनंतरमित्यर्थः। अत्र होता चतुर्वषट्कारः। पोतृनेष्टारौ द्विर्वषट्कारौ। ए
ग२०७ कवषट्काराअन्ये। तत्र सर्वेष्विष्टेषु भक्ष्यमाणे अनेकवषट्काराणामपि शेषाविभागात्कर्तृ
कालेक्याच्च सकृदेव भक्षणं प्राप्नोतीति तं निवृत्त्यर्थमानंतर्ये योक्तं। इष्टं गध्वर्युः प्रति
भक्षयेत्। अध्वर्युग्रहणं प्रतिप्रस्थातुरपि प्रदर्शनार्थं। अत्रापि तंत्रशंकानिवृत्त्यर्थं इष्ट
क्रमेव तत्र विधीयते इतरत्वनूद्यते। तस्मिंश्चैवोपहवः॥८॥ तस्मिन्नेव प्रतिभक्षयित
र्युपहवश्च भवति अवधारणं दीक्षिता अप्यत्र प्रतिभक्षयितारमेवोपहवं याचेरन्। न
दीक्षितान्त्सर्वानिति। अन्यत्र दीक्षिताद्दीक्षितान्त्सर्वानिव॥८॥ पराङ्ध्वर्यो वावृत्ते सुम
त्सद्गदेपितामातरिश्वाच्छिद्रा पदाधादच्छिद्रोक्था कवयः शंसन्। सोमो विश्वविन्नीथा २०७
निनेषद्बृहस्पतिरुक्थामदानि शंसिषद्वागायुर्विश्वायुर्विश्वमायुः क इदं शंसिष्यति स

इदं शंसिष्यतीति जपित्वानभिहिंकृत्य शोंसावोमित्युच्चैराहूय तूष्णीं शंसं शंसेडुपांशु स
प्रणवमसंतन्वन्। पराङिति सप्तम्यर्थे प्रथमा प्रयुक्ता छंदोवत्सूत्राणि भवंति। ऋतुपा
त्रभक्षणानंतरमध्वर्युर्होतर्मुखत आसीनः पराङावर्तते पृष्ठतः करोतीत्यर्थः। तस्मिन्
परांच्यावृत्ते होतास्कमदित्यादि जपित्वाभिहिंकारमकृत्वा शोंसावोमित्युच्चैराहूय तूष्णीं
शंसं शंसेडुपांशु सप्रणवमसंतन्वन्नध्वर्यावावृत्त इति शस्त्रकालोपदेशार्थं शस्त्राग
मयं जपः। जपित्वेति शस्त्रेण संबंधदर्शनात्। अनभिहिंकृत्येति प्राप्तः निषिध्यते शों
सावेति शंसावेत्यर्थः। स एव प्रणवांतः शोंसावोमिति पठ्यते। तेन शब्देनाध्वर्युमाहूय
अभिमुखीकृत्येत्यर्थः। अनेनाहूयेति वचनादस्य शब्दस्याहाव इति संज्ञा भवति। उच्चै
र्वचनं मंद्रस्वरप्राप्त्यर्थं। शस्त्रांगत्वादाहावस्य शस्त्रस्य च मंद्रस्वरत्वात् आहावानंतर

सू०वृ०५ वर्तिनः शस्त्रैकदेशस्योपांशुत्वात्। मुख्यानुग्रहन्यायेनोपांशुत्वाधं काथांभूयसामनुग्रह
२०८ एवात्राश्रयितुंयुक्त इति मंद्रस्वरासिध्यर्थमुच्चैरित्युक्तवानाचार्यः। यः पुनराहावः शस्त्रा
वयवभूतस्य स्तोत्रियादेरेवांगं सतस्यैव स्वरं भजते तेनानिष्केवल्येनु ब्राह्मणस्वरपक्षे
आहावस्यापि स्वरविशेषः सिद्धो भवति। तूष्णींशंस इति नामधेयं। सप्रणवं समान
प्रणवं तूष्णींशंसेयेप्रणवास्ते पठिता अपि संतानार्थिके लक्षणिकेः समानास्त्रि
मात्रा इत्यर्थः। असंतन्वन्नित्ययमप्राप्तप्रतिषेधः अन्तरंगत्वात्स्वरस्वान्तत्वात्॥
तेन ज्ञायते पठितोपि प्रणवः संतानार्थ इति तेन शस्त्रादिना आहावेनोत्तरः संत
तो वक्तव्यः। अत्र तूष्णींशंसस्याहावस्य च स्वरस्थानभेदाल्लक्षणसंततं भवति। एषआ २०८
हावः प्रातःसवने शस्त्रादिषु पर्यायप्रभृतीनां चा सर्वत्र चांतः शस्त्रं। एषु स्थानेषुव

चनांतरेणाह्वाने विहिते शोंसावोमित्यनेनैव शब्देनाह्वानं कुर्यात्। नान्येनेति नियम्यते।
सूत्रत्रयेण॥ शस्त्रादिषु प्राप्तिरेवमाहूयेति वचनात्सुरोरुक्त्वा स्तोत्रियत्वात्प्रतिपत्स्वाद्दा
नुरूपा श्विने॥ अंतःशस्त्रेपि स्तोत्रियानुचरप्रगाथधाय्यातदनंतरवर्ति परिधानीयत्वा द्वृच
नाद्येति माध्यंदिने तृतीयसवने च पर्यायेभ्यः प्राक् शस्त्रादिषु वचनादध्वर्य्वादि शब्दो
विधीयते तेषु शस्त्रादिषु तयोर्विहितत्वात्तदादिभूतानां प्रतिपदादीनां तावेव भवत इति
नाह्वानांतरं कल्प्यते। तेन चोपसंतानः। तेनाह्वानेनोत्तरस्योपसंतानः कर्तव्यः। चषा
व्यात्तस्य च पूर्वेणेति गम्यते। इदमंतःशस्त्रे विधानमसंतत्वं नित्यप्राप्ते संतानेप्राप्त
वत्प्रतिषेधात्। शस्त्रादिभूतेनाह्वानेनोत्तरस्य संतानः क्तः। ए
स्त्रस्वरः प्रतिगरः ॐ थामोदैवेति। शस्त्रस्वर इव स्वरो यस्य स शस्त्रस्वरः। उत्तरपदलो

स०वृ०५ पोत्र इष्टव्यः॥ शस्त्रस्वरस्वर इत्यर्थः। सवनस्वरस्याविधेयत्वादन्योपि योविशिष्टस्वरोवि
२०१ हितः शस्त्रस्य तस्य प्रापणार्थं वचनं। ॐ थामोदैवेत्ययं प्रतिगरसंज्ञो भवति। शस्त्रस्वर
२०७ श्चभवति। प्रतिगीर्यते प्रत्यक्ष्यार्यते इति प्रतिगरः। वक्ष्यमाणाविशेषविशिष्टतयास्फु
टेवविधातुं शक्येपि सामान्यस्य पृथग्विधानं प्रतिगरशब्दव्यवहारेपि सामान्येनास्य
ग्रहणार्थं। शोंसामोदैवेत्याहावे प्रतिगरो भवतीति शेषः। यः पुनरयं प्रतिगरांतर
विधिमध्ये विधीयते तत्स्थापयति प्रतिगरांतरमध्यवर्तिन्याहावे यं नियम्यते। तेन
शस्त्रमध्ये यमेवस्यात्। शस्त्राहाव यं ब्राह्मणोक्तः शंसामोदैवोमिति वा प्लुतादिः प्र
णावे प्लुतादिरवसाने। व्यवहितस्येमो विशेषविधौ। अनंतरस्य प्रणवावसान २०७
रूपेणाविषयमेदासंभवात्। प्रणवे प्रणव आहावोत्तरे। प्लुतादेरयमपवादः। आ

हावोत्तरे प्रणवे प्रणाव एव प्रतिगरो भवति। अवसाने च। प्रणावः प्रतिगरो भवतीति शे
शः। शस्त्रांते शस्त्र मध्ये चावसाने प्ययं विधिर्भवति। प्रणावांतो वा। विषयद्वये यं विक
ल्पः। यत्र यत्र चांतः शस्त्रं प्रणवेनावस्यति प्रणवांत एव तत्र प्रतिगरः। शस्त्रांते तु प्र
णवः। पूर्वोक्तस्य प्रतिगरद्वयस्य विषयव्यवस्थापनमात्रमत्रा क्रियते। ननु यद्यय
मर्थो विवक्षितः स्यात्तदैवं प्रणेतव्यं स्यात्। अवसाने चेत्यादि सर्वमकृत्वा शस्त्रांते
चांतः शस्त्रं प्रणवांत इति प्रणेतुं युक्तं सत्यमेव प्रणेतुं युक्तं। तथा च न प्रणीतवाना
चार्यः किं कुर्मः। एवं सति प्रणीतमनुसरामः। तत्र यदि पूर्वसूत्रे अवसान शब्दं समा
प्तिवचनमभ्युपगम्य द्वाभ्यां सूत्राभ्यां शस्त्रांते विकल्प उक्तः। उत्तरेणांतः शस्त्रं प्रणवांत
विधिरिति कल्प्यते तदा शस्त्रांते तु प्रणव इत्यतिरिच्यते। अथ मतं। यत्रेत्यादि सूत्रे व

=त्रां सावेसत्र लोटउत्तमस्य द्विवचनमिति भावः =५

सू० द०५ स्यतिशब्दसंबंधात्कर्मचोदनायां होतारमिति होतृविषयमिदं सूत्रं पारिशेष्यात्पूर्वोक्तिवि
२१० क कल्पो होत्रैविषय इति। तदपि नोपपद्यते। अवस्यतीत्यत्र विधानाभावात्कर्मविधोसाप
रिभाषानकर्मानुवाद इति। अतः पूर्वोक्त एवार्थः। यत्र यत्रेत्यादि प्रपंचोक्तिश्चैवमेवे
२१० तिसूचयति। अत्र संक्षेपविस्ताररूपेण प्रपंचोक्तिरेवाश्रितासूत्रकारेणेति। प्रतिग
रस्य शस्त्रसमकालत्वाद्धोतुरवस्य च द्विवचनश्रुतत्वात्प्रतिगरशब्दवाच्यत्वाच्च कर्त्रं
तरमस्यान्वेषणीयं। तत्राध्वर्युरेव भवति। पराङध्वर्यावित्यस्यैवाधिकारात्सर्वत्र चा
ध्वर्युरेव भवति। शंसामोदैवोमित्यध्वर्युः प्रतिगृणातीति दर्शनाभावात् दर्शनात्। शं
सावाध्वर्यो प्रतिमे गृणीहीति च दर्शनात्सवनांतरे च अध्वर्यो शोंसावोमित्याहावादि सं २११
दर्शनात्। अत्राध्वर्युशब्दः प्रतिप्रस्थातुरपि प्रदर्शनार्थः। गृह्णीमए तत्। किमित्याध्व

र्यवमत्रविधीयते। शस्त्राङ्गत्वात् शस्त्रस्य च ऋग्वेदविहितत्वात्तस्याप्यार्ग्वेदिकत्वमेवेति। अध्वर्युकर्तृत्वं तु वचनात् न समाख्यात इति सिद्धं। प्रतिगरस्वरूपमुक्त्वा शस्त्रमेवानुसरति। भूरग्निर्ज्योतिर्ज्योतिरग्नौ। इन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्रः। सूर्यो ज्योतिर्ज्योतिः स्वः सूर्य इमिति त्रिपदस्तूष्णींशंसः। यद्युवै षट्पदः पूर्वैर्ज्योतिःशब्दैरग्रे वस्येत। त्रिपदः षट्पदो वायं शंस्तव्यः। त्रिपदपक्षे यथापठितमेव। षट्पदपक्षे त्रीणि वाक्यानि द्विधाकृत्वा शंसेत्तत्र द्विधाकरणे अवसानस्थानं पूर्वैर्ज्योतिःशब्दैरग्रे वस्येदिति। उच्चैर्निविदं यथानिशान्तमग्निर्देवेद्ध इति। उच्चैर्वचनमुपांश्वधिकारनिवृत्त्यर्थं निविदिति निविदां नामधेयं। यथानिशान्तं यथापठितं पदे पदे वसायेत्यर्थः। ऐकश्रुत्यं तु शस्त्रत्वादेव प्राप्तं नास्याश्चाह्वानं। आह्वानं च निविदामिस्यत्र पदसमाम्नायनिवृत्त्यर्थं निविद्ग्रहणं कृतं।

सू० वृ०५ उत्तराधिकारश्च तत्रास्ति। तत्रानिविद्धृयांपदसमाम्नायानिरृत्यर्थंक्रियमाणामुत्तराधिका
२११ रंचनिवर्तयितुं शक्नोतीति प्राप्तस्यायमपवादः। नचोपसंतानः। अस्या निविदस्तूष्णींशं
सेन सहोपसंतानश्च न कर्तव्यः। तेनासंतन्वंनिति प्रतिषेधस्तूष्णींशंसेषु परस्परमेव
पूर्वापरयोरिति। अत आह। वेन तूष्णीशंसस्य संतानः सिद्धो भवति। सतु स्वरविरोधा
त्प्राणसंतान इत्युक्तः। उत्तमेन पदेन प्रवो देवायेत्याज्यमुपसंतनुयात्। निविद उत्तमे
नपदेन सूक्तमुपसंतनुयात्। अनुक्तादिदं विधीयते। आज्यमिति सूक्तस्येतत्स्थाना
पंनस्य नामक्रियते। एतेन निविद उत्तराः। अस्या निविदः शंसनप्रकारो यो विहितस्ते
नसर्वानिविदः शंस्तव्या इत्यर्थः। उत्तरवचनं पूर्वा अपि निविदः शंसतीति ज्ञापनार्थं॥ २११
तेन देवेभ्यो मन्विष इत्यादीनां चतुर्दशानां पदानां निविल्लं सिद्धं भवति। सर्वे च पदसमा

एतदपेक्षयान्यास्त्वित्यर्थः

म्नाया:। अन्ये चैतश प्रलापादयो ये पदशः आम्नाता मंत्रास्ते निविद्वदेव शंस्तव्याः। निवि
दामपि पदश आम्नाने सत्यपि निविदां पृथग्ग्रहणं निवित्सु क्वचित्सदसमासोस्तीति ज्ञा
पनार्थं ब्रह्मपे दं ब्रह्मपेदं क्षत्रमित्यादौ। उपसंतानस्त्वन्यत्र। अस्यां निविदोन्यासु निवित्सु प
दसमाम्नायेषु च पूर्वेणोपसंतानश्च कर्तव्यः। आह्वानं च निविदां। निविद्ग्रहणं पदसमा
म्नायनिवृत्त्यर्थं आह्वानं चान्यासु निवित्सु भवति। आज्याद्यास्त्रिः शंसेदर्धर्चशोविग्राहं।
इदं त्रिर्वचनं शस्त्रादौ प्रागंसूक्तादौ नियम्यते। आज्यग्रहणं सूक्ताद्यानिवृत्त्यर्थं। तेनय
त्रैकस्सूक्ते त्रीणि वा आज्यकार्ये विहितानि तत्राद्यस्यैवाद्यास्त्रिः शंसेन्नोत्तरस्येत्येवमर्थं।
४ अर्धर्चशः इत्युगावानपक्षेप्यर्धर्चसंताननिवृत्त्यर्थं। विग्राहं विगृह्येत्यर्थः। क्व विग्राहः
कथं वा विग्राह इत्येतन्निदर्शनेन दर्शयितुमाह। तन्निदर्शयिष्यामः। प्र वो देवायाग्नये २

=अर्धर्चेवसायानुष्टुस्येवोत्तरं ब्रूयात्॥ ६=अश्वमेधे तस्य विशेषान्वक्ष्याम इत्यस्मिन्खंडे अग्निं तमन्य इति प्र वो देवाया ग्नय इत्याज्ये उक्ते ६=

सू०वृ०५ बार्हिष्ठमर्चास्मै। गमद्देवेभिरासनो यजिष्ठो बर्हिरासदो ३मिति। विग्रहे प्राणसंतानः कार्यः।
२१२ पूर्वस्मिन्नेवार्धर्चे स विग्रहो भवति। ऋगावानं वैव मेव। एतेनाद्याः प्रतिपदामन्तृगावानं।
प्रतिपदां या आद्या ऋचस्ता एतेन प्रकारेण शंस्तव्याः। प्रतिपद्दिवप्र तिपदामिति बहु
वचनं ज्योतिष्टोमाभ्याससूचनार्थं। तथा प्रथमयज्ञे नैके धर्ममित्यत्र प्रथमशब्दस्तमे
वार्थं सूचयति। तथा शाखांतरे स्पष्टं वचनमस्ति। वसंते वसंते ज्योतिष्टोमेन यजेतेति।
तत्र वीप्सयाभ्यासोवगतः तदाश्रयोयं बहुवचनप्रयोगः। अन्यत्र ऋगावानवर्जन
मिति। प्रतिपच्छब्दोयं प्रतिपत्संज्ञितं तृचमेव गृह्णाति न यौगिकं। तेनाश्विनप्रत्ययंध
मेनिभवति। अनुब्राह्मणं वानुपूर्व्यं। ब्राह्मणोक्तस्य क्रमस्य क्रत्वर्थत्वात्समाम्नायसि २१२
द्धस्या क्रत्वर्थत्वात्समाम्नायसिद्धस्य प्रयोगो न प्राप्नोतीति तस्यापि विकल्पेन प्रयोगसि

ध्यर्थमिदं सूत्रं। आहूयोत्तमया परिदधाति। उत्तमयाः परिधानीयात्वेसिद्धे सत्युत्तमावच
नं याज्यां तानि शस्त्राणीत्यन्यार्थमभ्युच्यमानं याज्याया उत्तमत्वभ्रांतिं जनयतीति तद्भ्रां
तिनिवृत्त्यर्थं। सर्वशस्त्रपरिधानीयास्वेवं। सर्वासु शस्त्रपरिधानीयासु आहूय परिदध्यात्।
परिधानीयास्विति बहुवचनेनैव सर्वत्वे सिद्धे सर्वग्रहणं होत्रकपरिग्रहार्थं। उक्थं वा
चि घोषाय त्वेति शस्त्वा जपेत्। अग्न इंद्रश्च दाशुषो दुरोण इति याज्या। उक्थपात्रमग्रे भ
क्षयेत्। उक्थं शस्त्रं शस्त्रसंबंधितया कश्चिद्ग्रहो गृह्यते। शस्त्रयाज्यायां हूयते च। तच्छेष
वयत्पात्रं तदुक्थपात्रमित्युच्यते। तस्य भक्षणं वषट्कारनिमित्तत्वादविधेयं तदत्र क
मार्थं विधीयते ग्रह इति। ततश्चमसांश्चमसिनः सर्वशस्त्रयाज्यांतेषु। ततश्चमसांश्चम
सिनो भक्षयेयुः। सर्वेषु शस्त्रयाज्यांतेषु। भक्षणं च कर्मत्वात्र विधीयते। भक्षणेन सह

स०वृ०५ त्कृतेनैवसमाख्यायाः प्रवृत्तिनिमित्तसंभवाद्वचनादृतेभ्यासो नास्तीति विधानं। सर्वशास्त्र
२१३ याज्यास्विति वक्तव्ये सति अंतवचनमाश्विनस्य शास्त्रस्य याज्याभावात्तदंते चैभक्षणं भस
न प्राप्नोतीति तत्संग्रहार्थं। तेनायमर्थः। सर्वशास्त्रयाज्यासु भक्षयेयुः। सर्वशास्त्राणा
213 मंते चेति। सर्वशास्त्राणां याज्यानां चांताः सर्वशास्त्रयाज्यांता इति विग्रहः। नन्वप्तोर्या
मे आश्विनशास्त्रमंतो न भवति। सत्यं नांतः। तथाप्यतिरात्रास्त्विहेत्यतिरात्रातिदेशा
त्तत्र चमसभक्षणं भवत्येव। सर्वग्रहणं होत्रकशास्त्रपरिग्रहार्थं। एवं सर्वत्र चमस
भक्षणाविधानाद्यत्रोक्थ्यपात्रमस्ति तत्र तद्भक्षयित्वा चमसानां भक्षणं। अन्यत्र चमसा
नामेवेति गम्यते। वषट्कर्तैकपात्राण्यादित्यग्रहसावित्रवर्जं। आदित्यग्रहसावित्र २१३
ग्रहयोर्वषट्कर्तुर्भक्षो नास्तीत्येतावदत्र विधीयते अन्यदनूद्यते प्राप्तत्वात्सांसर्गिकं

चेदं सूत्रं।७॥ स्तोत्रमग्रे शस्त्रात्। भवतीति शेषः। शस्त्र कालपरिज्ञानमनेनाक्रिय
ते। एषेति प्रोक्त उद्गातुर्हिंकारे प्रातःसवन आक्रयीरन्। एषेति प्रोक्ते प्रस्तोत्राय उद्गा
तुर्हिंकारस्तस्मिन्काले च प्रातःसवनग्रहणं प्रातःसवने शस्त्राया आक्रयीरन्। बहुवच
च नं होत्रकशस्त्रकसंग्रहार्थं होत्रकपरिग्रहार्थं। प्रतिहार उत्तरयोः सवनयोः। एषेति
प्रोक्ते यः प्रतिहारस्तस्मिन्नुत्तरयोः सवनयोराक्रयीरन्। वासुरग्रे गायत्रमीरितिस
प्तानां पुरोरुचां तस्यास्तस्या उपरिष्टात्तृचं तृचं शंसेत्। एताः सप्त पुरोरुचो नामर्च
स्तासामेकैकस्या उपरिष्टादेकैकं तृचं शंसेत्। सप्तवचनं षष्ठ्याः सप्तपदत्वसिध्यर्थं।
वायवायाहिदर्शतेति सप्ततृचाः। सप्तवचनं सप्तानां तृचानां ग्रहणार्थं इतरथा पाद
ग्रहणादेकैकवर्ग्यथा सप्ततृचा भवेयुस्तथाभ्यसितव्या स्यात्तस्मात्सप्तवचनं॥ ॥

सं०वृ०५ द्वितीयां प्रउगेत्विः। प्रउगमिति अस्य शस्त्रस्य संज्ञा। अस्मिंश्छस्त्रे प्रकृतिप्राप्तं यद्दाधाया
२१४ स्त्रिर्वचनं तत् द्वितीयायां नियम्यते न त्रिर्वचनांतरमपूर्वं विधीयते। पुरोरुग्भ्य आ
क्रयीत षष्ठ्यां त्रिरवस्येदर्धर्चेऽर्धर्चे। विश्वांदेवानि त्येषा षष्ठी सा सप्तभिः पादैरेकानत्तैः
सप्तभिः पादैर्हूं अनुष्टुप् गायत्र्याविति समानां पुरोरुचामित्यत्र सप्तग्रहणे नोक्तं। आ
नोऽर्धर्चमित्यनेनार्धर्चशंसनमित्युक्तं। अर्धर्चाश्च द्विप्रकाराः। समाम्नायसिद्धा ला
क्षणिकाश्च। समाम्नायसिद्धाः प्रसिद्धाः। ऋचोऽर्धमर्धर्चमिति लाक्षणिकाः। तत्र क
थमर्धर्चशः शंसनमिति शंसये त्तन्निर्णयार्थं षष्ठ्यां त्रिरवस्येदर्धर्चेऽर्धर्च इत्युक्तं। तेना
स्याम् ऋच्यवसान त्रयविधानात् समाम्नाय सिद्धाएवार्धर्चाः सूत्रकारेणा २१४
र्धर्चशंसने परिगृहीता इति ज्ञायते। एतत्सर्वासां विषमपदावसानानां प्रदर्शनार्थं

मुक्तं। उक्तमानशंसे छंसंत्येके तत्वच आह्वानमशंसने उक्तमायाः पुरोरुच असंसने उक्तमे
तत्वे आह्वानं कर्तव्यं। माधुछंदसं प्रउगमित्येतद्दीक्षते। अत्रायं प्रउगशब्दः कृतत्वंवा ७२
च्यपितत्चापेक्षयाप्रयुक्तः। एवमन्यत्रापि यत्रयत्र ऋषिछंदोभ्यांप्रउगंविशेष्यतेतत्र
त्रतवत्चापेक्षमेव न पुरोरुङ् इत्यर्थमितिद्रष्टव्यं। उक्थंवाचिम्लोकाय त्वेतिशस्त्वा
जपेद्विश्वेभिः सोम्यंमध्वितियाज्याप्रशास्ताब्राह्मणाछंस्यच्छावाकइतिशास्त्रिणोहो
त्रकाः। होत्रकाणांमध्येएतेशस्त्रवंतः। एतेषांशस्त्राणिभवंतीत्यर्थः। एतेशस्त्रिण
इत्युक्तंक्वतेषांशस्त्राणिभवंतिकिंरूपाणिचतेषांशस्त्राणीत्येतदुभयंवक्तुमाह।
तेषांचतुराहावानिशस्त्राणिप्रातः सवनेतृतीयसवनेपर्यायेष्वतिरिक्तेषु चाएषु
स्थानेष्वतेषांशस्त्राणिभवंतितानिचतुराहावानीत्येतदुभयंविधीयते। पर्यायाति

=१+ तृतीयसवनेउक्थ्यशस्त्राण्येव तेषामेवंभूतां तिंद्वरीकर्तुं। नित्यर्थः॥२=

स०१०५ रिक्तोऽथातृतीयसवनत्वे सत्यपि पृथग्ग्रहणमुक्थ्यशस्त्रेभ्योन्यानि तेष्वपि भवेयुरित्येवमर्थं शस्त्राणि
२१५ र्थं। अतिरिक्तेष्विति बहुवचननिर्देशाद्द्वितीयमातिरिक्तेष्वेव भवंति। न वाजपेयातिरिक्ते।
तत्रैकत्वादतिरिक्तस्येति। पंचाहावानि माध्यंदिने। अत्रापि पूर्ववदुभयं विधीयते। आह २
वपरिमाणवचनं निमित्ताधिक्येपि एतेषामेता[वत्]वत्वसिध्यर्थं। इदानीमाहावस्य निमि
त्तानि प्रसंगादुच्यंते। स्तोत्रियानुरूपेभ्यः प्रतिपदनुचरेभ्यः प्रगाथेभ्यो धाय्याभ्यश्च
पृथग्गासूक्तानां। एतेभ्यः सर्वेभ्य आहावः कर्तव्यः। एतेषां बहूनां संनिपाते पृथक्पृथक्
कर्तव्यः इत्येतदुभयमत्र विधीयते। सर्वत्र यदर्थतया आहावो विधीयते तस्यादौ क स३
र्तव्यः। होतुरपि होत्रकाणामधिकाराद्धोतृग्रहणं। होतुरपि एतेभ्य आहावः कर्तव्यः। २१५
आदौ निविद्धानीयानां सूक्तानां। अनेकं चेत्प्रथमेष्वाहावः। निविद्धानीयसूक्तस्य चा
२ तेभ्यश्चान्यदनंतरं॥ होतुरपीत्यत्राप्यनुवर्तते। स्तोत्रियादिभ्यो नंतरं प्रस्तुतीकं विधीयते तत्रापि +२
२ होतुर्होत्रकाणां चाहावः कर्तव्यः॥२

द्दो भवति। तस्याने कल्ले प्रथम एवाहावः। निविद्धानीयकार्यमाहावस्यानिमित्तं न सूक्तस्य
स्वरूपं। आपोदेवतेत्यत्र चे। आपोदेवतमहेवतमित्यर्थः। स च आग्निमारुत आपोहिष्ठेति
त्वचउच्यते। तत्र चाहावः कर्तव्यः। तेषां त्वचाः स्तोत्रियानुरूपाः शस्त्रादिषु सर्वत्र। तेषाम
धिकारेपुनस्तेषामिति वचनमस्मिंस्तन्त्रे सर्वार्थेपि काश्चिद्विधिरस्तीति प्रदर्शनार्थं। ते न त्व
चाः स्तोत्रियानुरूपाः सर्वत्रेत्येकोर्थः सर्वार्थः। अपरश्च ते षां शस्त्रादिषु आदेशास्ते स्तो ये
त्रियानुरूपास्तेष्वाहावः कर्तव्य इति व्यवहितयोजनया भवत्यर्थः। माध्यंदिने प्रगाथास्त्व
तीयाः। माध्यंतदिने तेषामेवं वेदितव्यं। प्रगाथ इत्यक्ते प्रगाथः। प्रगाथस्तोत्रिया इत्यक्ते स्तो
त्रियो भवति नान्यथेति। याज्यां तानि शस्त्राणि। यत्र बहूनां शस्त्राणाम्रुच आम्नायंते या
ज्याश्च विधीयंते तत्र कियदेकं शस्त्रमित्येतत्संशयनिवृत्यर्थमितद्वचनं। अन्यदपि प्रयो

३ शास्त्रेणुत्वती याउ आदिशा स्त्र प्रगाथावे दित व्याः। यथा ग्रहणमन्यत्र। अतोन्यत्सर्वं यथाग्रह ३
३ णमेव ३

स०वृ०५ जनमस्तियच्छस्त्रार्थंवाग्यमनंविहितंतद्याज्यापर्यंतमनुवर्ततइति।उक्थ्यंवाचीत्येषांशस्त्रा
२१६ जपः प्रातःसवनेप्रातःसवनवचनंस्पष्टार्थं।ऊर्ध्वंचषोळशिनःसर्वेषां।षोळशिनऊर्ध्वं
216 यानिशस्त्राणितेष्वयमेवशस्त्राजपःसर्वेषांभवति।सर्ववचनंहोतुरपिप्रापणार्थं।उ
क्थ्यंवाचीश्शयेतिमाध्यंदिनउक्थ्यंवाचीन्द्रायदेवेभ्यइत्युक्थ्येषुसषोळशिकेषु।उक्थ्ये
षुषोळशिनिचायंभवतीत्यर्थः।उक्थ्यानीतितृतीयसवनेहोत्रकशस्त्राण्युच्यंते।अनं
तरस्यपूर्वेण।यत्रानेकपदार्थाःक्रमवर्तिनःस्युरेकरूपास्तत्रयदितेषांकस्यचिध
र्मोकांक्षास्यात्तदातेषामेवानंतरेणपूर्वेणधर्मविधिर्वेदितव्यः।किमुदाहरणं।तृतीय
सवनेषुरोळाशाद्युक्तमित्युक्तं।तत्रमाध्यंदिनेनविधिर्भवति।तथासोमातिरेकेशा २१६
स्त्रेनंतरस्यशस्त्रस्ययःशास्त्राजपःसभवतीत्येवमादिद्रष्टव्यं।स्तोत्रियेणानुरूपस्य

छंदः प्रमाणलिंगदैवतानि। छंदोगायत्र्यादिः प्रमायामेकस्मिँश्छंदस्यूनाधिकाँरतां लिंगं नपि
आवतीप्रवतीत्येवमादिदैवतं प्रसिद्धं। स्तोत्रियस्य यान्येतानि तानि एवानुरूपस्येत्यर्थः।
आर्षं चैके। एक आचार्या आर्षं च तद्दैवं छंति। आ नो मित्रावरुणा नो गंतं रिशादसा प्र वो
मित्राय प्र मित्रयोर्वरुणयोरिति नवायातं मित्रावरुणेति याज्या याहि सुषुमा हि त इति
षड् स्तोत्रियानुरूपावनंतराः स त्वं द्वत्वा वृषभमुद्वेदभीतिति स्त्र इंद्र क्रतुविदं सुतमि
तियाज्ये इंद्राग्नी आगतं सुतं मिंद्राग्नी अपसस्परितो शाद् वृत्रहणा हुव इतिति स्त्र इहेंद्रा
ग्नी उप येयं वामस्य मन्मन इति नवेंद्राग्नी आगतं सुतमिति याज्या। अत्र मध्ये आयाहि
सुषुमा हि त इति षड् स्तोत्रियानुरूपो इत्यत्र षड्ग्रहणमासाम्टचां यास्सु कासु चिद्य
दिछंदोगाः स्तुवीरन्तदा तात्तिसृभिरेव स्तोत्रियं कृत्वाशिष्टाभिरनुरूपः कर्तव्य इत्येवमर्थं॥ १०॥

स्०वृ०५ संस्थितेषु सवनेषु षोडशिनि चातिरात्रे प्रशास्तः प्रसुहीत्युक्तः सर्पतेति प्रशास्तातिसृजे
२१७ द्धोता दक्षिणेनौदुंबरीमंजसेतरे परया द्वारोत्तरां वेदिश्रोणीमभिनिःसर्पंति। सवनेषु
संस्थितेषु मध्ये चातिरात्रे षोडशिनि समाप्तेऽतिरात्रविशेषणमतिरात्रेयः षोड
शीतस्मिंनेव समाप्ते न वाजपेयषोडशिनीत्येवमर्थः। एतेषु चतुर्षु कालेषु होता दक्षि
णेनौदुंबरीं गत्वा इतरे च स्वस्याधिष्ण्यस्यांजसा आर्जवेन गत्वा सर्वे परया द्वारा निष्क्र
म्य उत्तरां वेदिश्रोणीमभिनिःसर्पंति। तया श्रोण्या बहिर्वेदि प्राप्नुयुरित्यर्थः। यद्यस्मिन्
काले ध्वर्युः प्रशास्तः प्रसुहीति ब्रूयात्तदा प्रशास्ता सर्पतेति ब्रूयात्। ततो निःसर्पणं कुर्यु
रेतेष्वेव कालेषु। यद्यन्यस्मिन्काले ब्रूयात्तदा प्रत्यतिसर्जनमेव न तु निःसर्पणमस्म २१७
दीयानामिति। यद्यध्वर्युर्न ब्रूयात्। प्रशास्तापि नातिसृजेत्तेष्वपि कालेषु ततो न निःसृ

ष्याएवनिःसर्पेयुः।सर्वथातावदेतेषुकालेष्वतिसृष्टाअनतिसृष्टावाअस्मदीयानिः
सर्पेयुरेवनान्यस्मिन्कालइतिस्थितं।तृतीयसवनसमाप्तिरपिशास्त्रसमाप्तावेवास्मा
कंनहारियोजनांतेपत्नीसंयाजांतइतिस्थितं।पुनःसदसःप्रवेशोप्रयोजनाभावात्सव
नसंस्थास्तुनिःसर्पणस्यसदःप्रवेशपर्यंतत्वादिति।मृगतीर्थमित्येतदाचक्षते।संव्य
वहाराभावेपिसंज्ञायानित्यक्त्वापरिज्ञानार्थमुपदेशः।एतेननिष्क्रम्ययथार्थंनत्वेवा
न्यन्मूत्रेभ्यः।अतीर्थेननिष्क्रांतानांबहिस्स्थानामपिप्राक्केष्वेतादृशोनियमा।यथासं
भवमनुवर्ततइत्युक्तंप्राक्तदनेननिष्क्रांतानांनास्तीत्येवमर्थंयथार्थवचनं।यथा
र्थवचनात्स्वैरकर्माण्यपिप्रसज्येरन्नितितन्निवृत्त्यर्थंनत्वेवान्यन्मूत्रेभ्यइत्युक्तं।
तेनयदावश्यकंतावन्मात्रमेवभवति।अतोनान्यदिति।आवश्यकमपियत्शास्त्रा

स्म॰ दृ॰५ प्रासादूर्ध्वं कर्तुं शक्यते तदनेन निष्क्रम्य न कर्तव्यं तीर्थेनैव निष्क्रम्य तादृशं कुर्यात्॥ अने
२१८ नेन निष्क्रम्य ग्राम्याः प्रासादात् परस्तान्न गच्छेयुरिति वचनात्॥ एतेन निष्क्रम्य कृत्वोदका
र्थं वेद्यां समस्तानुपस्थायापरया द्वारा नित्ययावृता सदो द्वार्ये चाभिमृश्य तूष्णीं प्र
218 तिप्रसर्पन्ति॥ एते इति निष्क्रान्ताः निर्दिश्यन्ते॥ एते निष्क्रमणानन्तरं यत्किंचिदुदकका
र्यमस्ति चेत्तत्कृत्वा नास्ति चेदकृत्वा वेदिं प्रविश्य वेद्यां ये धिष्ण्यास्तेषां समस्तोपस्था
नं कृत्वा उपस्थितांश्चानुपस्थितांश्चेत्येतत्कृत्वेत्यर्थः॥ अपरया द्वारा नित्ययावृता
मन्त्रेण सदो द्वार्ये चाभिमृश्य तूष्णीं प्रतिप्रसर्पन्ति॥ कृत्वोदकार्थमित्यत्र न विधीय
ते॥ यथाप्राप्तमनूद्यते॥ एवावृत्सर्पतेति वचने॥ सर्पतेति वचन इत्यनेन पूर्वोक्ताश्च २१८
त्वारः काला उच्यन्ते तेषु तस्य वचनस्य संभवात्॥ अतस्तेषु सर्वेषु य एष उक्तः प्रयो

गोनिः सर्पणादिः प्रतिप्रसर्पणांतः स कर्तव्यः न केवलं प्रातःसवनांत एवेति। पूर्वयैव
गृहपतिः। यजमानस्तु पूर्वयैव द्वारा प्रतिप्रसर्पणं कुर्यादेकाहाहीनेषु। सत्रेषु गृहप
तिरेवेति॥११॥ एतस्मिन्काले ग्रावस्तुत्प्रपद्यते। अस्याप्यस्मिन्नेव काले प्रपदनं न प्रा
तरनुवाककाल इत्यच्छावाकेन तुल्यं। तस्योक्तमुपस्थानं। अस्यापि पूर्वोक्तमुपस्था
नं प्रसर्पणं च भवति तत्र विशेषमाह। पूर्वया द्वारा हविर्धाने प्रपद्य दक्षिणस्य हवि
र्धानस्य प्रागुदग्गुत्तरस्याक्षशिरसस्तूष्णीं निरस्य राजानमभिमुखोवतिष्ठते। प्रसर्प
णमेवात्र प्रपदनमित्युच्यते। असौ तु हविर्धानं पूर्वया द्वारा प्रपद्यते पूर्ववदेव। हवि
र्धाने इति द्विवचनं शालायामेवोपचारात्। शकटद्वयसंबंधादुपचारः। हविर्धान
शब्दः शालायामपि मुख्य एव योगस्याविशिष्टत्वादुभयोस्तत्प्रपद्य दक्षिणस्य शक

अतएवोपविशेदनिरस्यतृणमित्यत्रोपवेशनमंत्रोपिनभवतिः।३ =अत्रअवस्थानेउपवेशनःउपवेशनमंत्रोनेत्यर्थः २

सू०वृ०५ दस्यायउत्तरमक्षशिरस्तस्यप्रागुदग्योदेशस्तस्मिन्मंत्रेणनिरसनंकृत्वातत्रराजानमभि
२१८ मुखस्तिष्ठेत्।दक्षिणामुखःप्रत्यग्दक्षिणामुखोवा।नात्रोपवेशनः।निरसनोपवेशन
योःसाहचर्यप्रदर्शनार्थं।अप्राप्तएवोपवेशनमंत्रःप्रतिषिध्यते।योअद्यसोम्यइ
तितु।उपविष्टस्यविहितत्वात्तिष्ठतोनप्राप्नोतीतिविधीयते।अथास्माअध्वर्युरु
ष्णीषंप्रयच्छति।उष्णीषंशिरसोवेष्टनवासः।तदंजलिनाप्रतिगृह्यत्रिःप्रदक्षिणंशिरःस
मुखंवेष्टयित्वायदासौमांशुनभिषवायव्यपोहंत्यथग्रावाणोभिष्टुयात्।यदासोमलता
अभिषवार्थंअध्वर्यवोव्यपोहंतिविक्षिपंतितदाग्राव्णामभिष्टवनंकुर्यात्।मध्यम
स्वरेणेदंसवनं।इदमादीदंमाध्यंदिनंसवनंमध्यमस्वरेणप्रयोक्तव्यं।इदंग्रावस्तोत्र २१९
मारभ्यमाध्यंदिनंसवनंवर्तते।तत्रस्वरग्रहणंबाधकबाधनार्थं।बार्हस्पत्येष्टौसोमिक्य
अथग्राव्णाइतिवचनादसंप्रेषितएवब्रूयात्।तस्मादेषएतामसंप्रेषितःप्रतिपद्यतइतिश्रुतिः=४

= अभिहिंकारोनभवतिशस्त्रेष्वेवहोत्रकाणामितिप्रतिषेधात् = २

इतिप्रधानोपांशुत्वंप्राप्तंतस्यबाधनार्थं। तेनतस्यामिष्टोप्रधानमपिमध्यमस्वरेणभवति। ॐभिंत्वादेवसवितर्युंजतेमनउतयुंजतेधियआत्वनइंद्रक्षुमंतंमाचिदन्याद्विशंसततेवदंत्विस्यर्बुदं। एतत्सूक्तमर्बुदनामधेयंभवति। प्रागुत्तमायाआवकेंजसेप्रवोग्रावाणइति। सूक्तेआवपेतेतिशेषः। अर्बुदस्यप्रागुत्तमायाइत्यर्थः। सूक्तयोरंतरोपरिष्टात्पुरस्ताद्वापावमानीरोप्ययथार्थमावाग्रहग्रहणाछिष्टयापरिधायवेद्यंयजमानस्योष्णीषं। सूक्तयोरुपरुष्टात्पुरस्ताद्वेतिसंबंधः। सूक्तेइत्यध्याहत्यअंतराशब्देनसंबंधः। त्रयाणामन्यतमस्मिंस्थानेपावमानीरावपेतयथार्थंयावत्प्रयोजनमित्यर्थः। यादभिषवमिति। तदारंभेआरंभविधानात्तत्रैवग्राव्णांव्यापारसंभवात्अस्यचग्रावस्तोत्रत्वादिति। आग्रहग्रहणाद्वा। ग्रावस्तोत्रांतर्भावेपिपावमानीनांहूयमानसोमा

२= वेदयितव्यं यजमानस्या... इदमुष्णीषमिति। ततस्तेनानुज्ञा =२ २= अहर्गणामंत्रे नोतेषु-एकाहेपि सएवांत्य:+२=
२= तेन दीयात् आदायथार्थं कुर्यादित्येतस्य ग्रावस्तोत विषयतयाव्या =२
२= रव्यात इदं च नातभाष्ये।+२=

सू०ह०५ भिधानात्संप्रेष्यमानः सोमः स्ता वंतं कालमनुवर्ततत इति कृत्वेदमुच्यते। शिष्टयाऽदस्योत्तमया

२२० परिधाय वेष्ट्यं यजमानस्योष्णीषं यजमानाय दातव्यमित्यर्थः। औदायथार्थमंत्येष्वहः

सु। यजमानाय दत्तेतस्यार्थप्राप्तमुच्यते नाप्राप्तं विधीयते ऽनेन सूत्रेण दानमपवृत्तस्ता।

प्रस्तातरसंक्रमणमात्रं यजमानस्यैव तत्त्वमिति। प्रतिप्रयच्छेदितरेषु। अनंत्येष्वहः

सुयेनेदं दत्तं तस्मा एव पुनः प्रयच्छेदिति प्रति शब्दसंबंधादवगम्यते। अथापरमभिरू

पं कुर्यादिति गाणगारिः। अपरामिति अपरमिदं ग्रावस्तोत्रं न पूर्वमित्यर्थः। प्रकृता वि

दं न प्रवर्तत इति भिन्नविषयत्वादपरशब्दप्रयोगो युक्तः। कार्यविशेषे तल्लिंगस्य वि

धानादेवाभिरूपत्वे सिद्धे अभिरूपवचनं कार्यव्यत्यासेत्वव्यत्यासासिध्यर्थं। गाण

गारिवचनं पूजार्थं। आप्यायस्व समेतु त इति तिस्रोम्रजंतित्वाद्दशाक्षिपएतमुत्यंदश

२= आप्यायमाने प्रथममित्यादिना =२ ४= अथापरमितिवाचनात् प्रथमयत्नेगा=
=णगारिपक्षोनकर्तव्य इत्यर्थः=४

१= यत्कर्मणोक्तं तत्कुर्यागोपनस्तात्सिक... =१ ३= ...पदिति समारोपयुज्यते तत्तदभि... =३ ५= पंत्रयस्व्र+५ ५ २२०

एवमभिरूपं प्रथमपर्याये एव एमुत्तरेष्वपि पर्यायेष्विति वचनाभावात् = ननु उत्तरस्याभिषवस्य मध्यमे पर्याये बृहच्छब्दं कुर्वंति =
तत्किमर्थं वीप्साकरणमिति चेन्न। केषांचिदध्वर्यूणां सर्वेष्वभिषवेषु बृहच्छब्दोस्तीति तदपेक्षया वीप्सायाः सत्वात् = ८

क्षिप्रो मृज्यमानः सुहस्त्या दशभिर्विवस्वतो दुहंति सप्तैका मधुश्चासि पुनाभि षमा कल
शेषु धावति पवित्रे परिषिच्यत इत्येका कलशेषु धावतीत्येनो वर्मविगाहत इति द्वे। ए
तासामर्बुदस्य चतुर्थ स्मुत्यत्वचां तेषु त्वचा न वदध्यात्। एताद्वादश ऋचो नुक्रांता
स्ताश्चत्वारस्तृचा भवंति। एतासां पावमानीनां त्वचां तेषु अर्बुदस्य त्वचा न वदध्यात्। वि
परीतं वा। अत्र विशेषो न शक्यते वक्तुं दुरवगमत्वात्। आप्याय्यमाने प्रथमं। आप्या
यनमुदकसेकः। मृज्यमाने द्वितीयं। मार्जनं च दर्भमादाय हस्ताभ्यां पेषणं दुह्यमाने
तृतीयं। दोहनं प्रसिद्धं। आसिच्यमाने चतुर्थं। आसेचनमभिषवेषा द्रवीकृतस्या
धवनीये संभरणं। बृहच्छब्दे बृहच्छब्दे चतुर्थं। निमित्तावृत्तावावृत्त्यर्थं वीप्सावचनं।
माचिदन्यद्विशंसतेति यदि ग्रावाणः संक्रादेरन्। संक्रादनं शब्दनं। अत्रापि निमित्ता

स्रौ०सू० ५ २२१ ईत्ता वा इत्तिरस्ति। अस्याकृत्यो निमित्ताभावेपि प्रयोगः स्वस्थाने। चतुर्थ्या उच्चारवचनादिदम
वगम्यते। समानमन्यत्। अर्बुदपावमानीभ्योन्यत्सर्वं समानं भवतीत्यर्थः। अर्बुदमेवेत्येके।
अवधारणादिदमेव सूक्तं नान्यत्किंचित्। प्रवोग्रावा याइत्येके। अत्राप्यवधारणां उक्तं
सर्पणं। प्रसर्पणमत्र कर्तव्यमित्यर्थः। स्तुते माध्यंदिने पवमाने विहृत्यांगारान्। १२। दधि
घर्मेण चरंति प्रवर्ग्यवांश्चेत्। अंगारविहरणवचनं तत्कालपरिज्ञाने तद्व्यवायपरिहा
रयत्नकरणार्थं। दधिघर्मो नाम कर्मविशेषः। तेन च रंति प्रवर्ग्यवांश्चेदयं क्रतुः। न चे
न्न कर्तव्यो दधिघर्मः। तस्योक्तम् गावानं घर्मेण। तस्येति वचनं योगविभागार्थं योगवि
भागप्रयोजनम प्रवर्ग्येपि प्रापणार्थं। तेनोत्तिष्ठता वपश्यते त्यस्याः शंसत्यादिचोद २२१
नाभावेपि एकश्रुत्यं भवति। इज्या भक्षिणाश्च। इज्या च घर्मेणाव्याख्याता। भक्षिर्षेणो णाश्च घर्मेणैव व्याख्याता। भक्षि
२४ दधिघर्मस्य विधेः प्रापणार्थं। घर्मेणेति वचनं ऋगावानादन्यस्य घर्मेण संबद्धस्यैकश्रुत्यस्यापि २२

इष्टव्यो ३

२ अनेन प्राणभक्षो विहितो भवति। =

नकर्त्रुपलक्षणार्थं प्रयुज्यते कथं तर्हि स्यात्मनोपि विधेयत्वाय। तेन भक्षस्य भक्षकर्तॄणां
च घर्मवत्ता विधीयते। होतर्वदस्वेत्युक्त उत्तिष्ठता वषट्क्रियते स्वाहा। अस्या लिंगजनितमे
व कार्यं। आहेति वचनमस्या अनुवाक्यात्वं माभूदित्येवमर्थं। तेनोत्तरैवानुवाक्या भवति।
अनया ध्वर्युप्रैषरूपमभिधानं क्रियते। श्रातं हविरित्युक्तः श्रातं हविरित्यन्वाहा इय
मनुवाक्या। श्रातं मन्य ऊधनि श्रातमग्नाविति यजति। अग्ने वीहीत्यनुवषट्करोद्दधि
घर्मस्याग्ने वीहीति वा। मयित्यादिं इयं त्वं हं मायि द्युम्नमुत क्रतुः। त्रिष्टुर्बं विभातु मआ ४२ मे ४
कृत्या मनसा सह विराजा ज्योतिषा सह। तस्य दोहमशीय तेतस्य त इंद्र पीतस्य त्रिष्टु
प्छंदस उपहूतस्योपहूतो भक्षयामीति भक्षजपः। यं धिष्ण्यवतां प्रांच मंगारे रभि
विहरेयुः पश्चात्तस्य स्याधिष्ण्यस्योपेह वमिष्ठा परित्वाग्ने पुरं वयमिति जपेत्। धिष्ण्य
विस्योप

श्रौ०सू०५ वतां मध्ये यं कं चिद्धिष्ण्यवं तं धिष्ण्येभ्यः प्रांचं संतं यद्यं गारैरभिविहरेयुस्तस्य नैमित्तिक
२२२ मिदं। पश्चात्त्वस्य धिष्ण्यस्योपविश्योपहवं यजमानादिष्ट्वा परित्वाग्नेपुरं वयमिति जपेत्।
222 अनिष्ट्वा दीक्षितः। दीक्षितस्योपहवयाचन प्रतिषेधाद्दीक्षितस्योपहवयाचनं यजमाना
दिति गम्यते। अस्यैव नैमित्तिकस्य निमित्तापत्तिकालादन्यत्राम्नातं तृतीयसवने प्यस्य नै
मित्तिकस्य प्राप्त्यार्थं। सवनीयानां पुरस्तादुपरिष्टाद्वा पशुपुरोडाशेन चरंति। प्रकृति
पशु प्राप्तस्य पुरोडाशस्य कालविधिरयं। अक्रियामेकेन्यत्र तदर्थवादवदनात्। तस्य पुरोडा
शस्याक्रियामेके आचार्या मन्यंते हेतुबलात्सोयं हेतुः। अन्यत्र तदर्थवादवदनादिति।
तस्य योजनो वादस्तदर्थवादः तस्य वदनं तदर्थवादवदनं तत्संयोजनवादस्यान्यत्र वद २२२
नादित्यर्थः। अन्यत्रेति सूक्तवाकप्रैष उच्यते। तत्राविदृध तपुरोडाशैरित्याम्नातं। पुरो

डाशैरिति बहुवचनदर्शनात्स्तवनीयदेवताचाभिधीयते न पुरोडाशदेवतेति गम्यते। तेना
त्रप्रकृतिप्राप्तमभिधानमपश्यंतो करणनिमित्तमेवेदमभिधानमिति मन्यमाना अक्रि
यामुक्तवंतः। क्रियामाश्मरथ्योन्विताप्रतिषेधात्। अतिदेशप्राप्तस्य प्रतिषेधाभावादाश्म
प्रश्नु रथ्यः पुरोडाशस्य क्रियामेव मन्यते। आश्मरथ्यग्रहणं तस्य पूजनार्थं न विकल्पार्थं तस्मात्पु
रोडाशः कर्तव्य एव। यत्तु नारिदमन्यत्र तदर्थवादवदनादित्यनभिधानादकरणमुक्तं प्रा नदपुनं ५
प्तस्य प्रतिषेधाभावात्। करणमेवेति। अनभिधानं पुनर्यत्सूक्तवाकप्रैषउक्तं न तद्धेतुरेव।
प्रत्यक्षपठिते मंत्रेभिधानशक्तिर्नास्ति चेदनभिधानमस्तु किं कुर्मः। यथाकथंचिदभिधा
नं वा कल्पनीयं। पुरोडाशाद्युक्तमानाराशंससादनात्। न त्विहाद्विदेवत्याः। एतस्मिन्का
ले दक्षिणानीयंते हीनेकाहासु। अधिकृते काले पुनः कालविधानं यत्रानुसवनं दक्षि

स०द्द०५ णानयनंविहितंतत्रत्रिष्वपिसवनेषुनाराशंससादनोत्तरकालमेवदक्षिणानयनमित्येवम
२२३ र्थः। अहीनैकाहग्रहणंसत्रेष्वात्मदक्षिणापिनास्तीतिसूचनार्थं। कृष्णाजिनानिधन्वंतःस्व
यमेवदक्षिणापथंयंतिदीक्षिताःसत्रेष्विदमहंमांकल्याण्यैकीर्त्यैतेजसेयशसेमृतत्वा
223 यात्मानंदक्षिणांनयानीतिजपंतः। दीक्षितवचनंपत्नीनिवृत्त्यर्थं। सत्रवचनमसत्रेष्वस्य
समुच्चयनिवृत्त्यर्थं। आत्मानंदक्षिणांनयानीतिमंत्रवदः सत्राणामदक्षिणत्वंस्तुतिपर
त्वान्नात्मदक्षिणात्वंविधातुंशक्नोति। उन्नेष्यमाणास्वाग्नीध्रीयआहुतीर्जुह्वति। उन्नेष्य
माणासुदक्षिणासुदक्षिणाद्रव्येष्वित्यर्थः। केनचिन्मानविशेषेणदक्षिणाद्रव्याणिद
क्षिणाकालेनेतव्यानितत्क्षणात्पूर्वक्षणेसर्वेऋत्विजआहुतीर्जुह्वति। ददानीत्यग्निर्व
दतिवायुराहतथेतितत्। हंतेतिचंद्रमाःसत्यमादित्यःसत्यमोमापःस्तत्सत्यमाभरन्॥ २२३

५ = अनुमंत्रणाभिमर्शने सद्दस्येव भगलः नाग्नीध्रीये प्रतिगृह्या ग्नीध्रीयं प्राप्येति वचनात् =

दिशो यत्तस्य दक्षिणा दक्षिणानां प्रियो भूयासं स्वाहा। प्राचित्येधि प्राचि जुषाणा प्राच्या
ज्यस्य वेतु स्वाहेति द्वितीयं। द्वितीयाग्रहणं मंत्रभेदप्रदर्शनार्थं नद्वयोराकुत्योरेतावानेको
मंत्र आवर्तयितव्य इति। क इदं कस्मा अदात्कामः कामायादात्कामो दाता कामः प्रतिग्र
हीता कामं समुद्रमाविश कामेन त्वा प्रतिगृह्णामि कामैतत्ते। वृष्टिरसि द्यौस्त्वा ददातु पृ
थिवी प्रतिगृह्णात्वित्यतीतास्वनुमंत्रयेत प्राणि। विहारदेशमतीत्य नीतेषु दक्षिणाद्रव्ये
षु तन्मध्ये यत्प्राणिद्रव्यं तदेतेनानुमंत्रयते। अभिमृशेद प्राणि। तन्मध्ये यदप्राणि तद
भिमृशेत्। कन्यां च। अभिमृशेदिति शेषः। दैवेन विवाहप्रकारेण तदा यदि कन्या दीयते
तामप्यभिमृशेत्। अनेनैव मंत्रेण। न ब्राह्मादिष्विदमभिमर्शनमस्ति क्रतुसंबंधाभावा
त्। सर्वत्रैवेवं। सर्वत्रैव तानि केऽइष्टिपश्वादावेवं प्रतिगृह्णीयात्। नन्विहैवेति प्रसंगाभा

१ केचित्स्वीकारकरणाल्लौकिकेष्वपि प्रतिग्रहेषु समंत्रकत्वमिच्छंती। ति सिद्धांतभाष्ये =

सू०ह०५ वात्। प्रतिगृह्याग्नीध्रीयं प्राप्य हविरुच्छिष्टं सर्वे प्राश्नीयुः प्राश्य प्रतिप्रसृप्य।१३॥ मरुत्वती
२२४ येन ग्रहेण चरंति। मरुत्वद्देवत्यो मरुत्वतीयः। गतार्थं सूत्रद्वयं। इन्द्र मरुत्व इह पाहि सो
मं होता यक्षदिंद्रं मरुत्वंतं सजोषा इन्द्र सगणो मरुद्भिरिति। भक्षयित्वैतत्पात्रं मरुत्वती
यं शस्त्रं शंसेत्। भक्षयित्वेति वचनं शस्त्रकालोपदेशार्थं। मरुत्वतीयमिति शस्त्रनाम॥
अध्वर्यो शोंसावोमिति माध्यंदिने शस्त्रादिष्वाहावः। माध्यंदिने सवने यानि शस्त्राणि हो
तुर्होत्रकाणां च तेषामेवं रूप आहावो विधीयते। बहुवचनं होत्रकशस्त्रपरिहारार्थं। आ
त्वा रथं यथोतय इदं वसो सुतमंध इति मरुत्वतीयस्य प्रतिपदनुचरौ। पुनर्मरुत्वतीयव
चनं सर्वशस्त्राधिकारात्। प्रतिपदनुचराविति संज्ञे यथासंख्येन द्वयोस्तृचयोः। इन्द्र ने २२४
दीय एदिहीतीद्रनिहवः प्रगाथः। इदमपि संज्ञा। प्रनूनं ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यः।

प्रगाथ इति शेषः। इयमपि संज्ञैव। तृचाः प्रतिपदनुचरा तृचाः प्रगाथाः। अतोर्धर्चं सर्वं॥
शस्त्राणामादिभूतमाज्यमारभ्य आ स्माद्ब्राह्मणा स्पत्यात् सर्वमर्धर्चं भवति। आज्यमारभ्य
ब्राह्मणस्पत्यपर्यंतं सर्वमर्धर्चशस्यं भवतीत्यर्थः। सर्ववचनात्प्रकृतो विकृतो चात्रिष्टुबा
दीनि पंक्तिर्वा विछंदो वा अस्मिन्नवधौ यदागछति तत्सर्वमर्धर्चमिति गम्यते। स्तोत्रि
यानुरूपाः प्रतिपदनुचराः प्रगाथाः सर्वत्र। एते च सर्वत्रार्धर्चशः शस्याः। प्रगाथस्या
र्धर्चशंसनविधानं बृहतीकारपक्षे चतुर्थषष्ठयोः पादयोः पुनरादिरभ्यस्तयोरवसानवि
ध्यभावात्समाम्नायप्रसिद्धार्धर्चाभावादर्धर्चावसानं न प्राप्नोतीति तत्रावसानप्राप्त्यर्थं
सर्वत्रवचनं छंदोगप्रत्ययप्राप्यस्यापि प्रगाथस्याभ्यासेन शस्यमानस्य एतदवसानं भव
तीत्येवमर्थं। प्राक्छंदांसि त्रैष्टुभात्। गायत्र्यादीनि पत्त्यंतानि अर्धर्चशः शस्यानीत्यर्थः।

त्रिष्टुप्जगत्याति छंदः स्कअतिजगत्यादीनिअति छंदः शब्देनोच्यंते=२

स०सू०५ सर्वाश्चैवाचतुष्पदाः। गायत्र्यादीनांच समानामक्षरपरिमाणमेवप्रवृत्तिनिमित्तं न पादवि
२२५ न्यासः। तत्रवृहत्यंतानां पादविन्यासानपेक्षयासर्वप्रकारणामर्धर्चशंसनमुक्तं। पंक्त्याश्च
ष्पंचपदायाअर्धर्चशंसनमेवापंचपदायास्तु वक्ष्यति। तत्र पंक्त्याउत्तरेषुत्रिष्टुप्छंदः
सुयाअचतुष्पादास्तासामर्धर्चशंसन मनेन विधीयते। सर्वग्रहणं वृषाकप्यतिदि‍ष्टे
ष्ववयामरुत्त्यर्धर्चशंसनमेवेत्येवमर्थं। पंक्तिषुद्विरवस्येद्ध्र्योर्द्वयोः पादयोः अर्धर्च
शोवाश्विने। आश्विनेशास्त्रेयाः पंक्त्यस्तासामर्धर्चशंसनं पंक्तिशंसनं वाभवतीतिवि
कल्पोयंविधीयते। तत्रार्धर्चशास्यांतर्गतानामर्धर्चशंसनं स्वतंत्राणां पंक्तिशंसनमेवे
तिविनिवेशोयुक्तः। पच्छःशस्यगतांतु पच्छः। शंसनेक्रियमाणेयंविशेषः। सर्वत्रविष २२५
येपच्छःशस्यसूक्तगतायाएकस्याः पंक्तेः पच्छःशस्यतेव। तत्रसूक्तेमुखीयाउदाहरणं।

अयंविधिः पंचपदास्वेव पंक्तिषुर्द्वयोर्द्वयोः पादयोरवस्येदित्यस्यविधेस्तत्रैवसंभवात्।

इंद्रोमदायवावृधइति। =१

इयं महाबृहती पंक्तिमहाबृहतीपंक्त्यंतामित्यक्तत्वात् = १

अग्निनेंद्रेणेति सूक्तं अतिरिक्तो नास्य पच्छः शस्यं = १ सर्वाश्चैवेतिवचनात् = १

अर्वाग्रथमिति चैवमादि। नमो वाक इत्यर्धर्चशः शस्या स्वाहाकृतस्येत्यस्याः पंक्तिशंसनं॥

समासमुत्तमे पदे। पंक्त्याः पच्छः शंसने क्रियमाणे ये उत्तमे पदे अतिरिच्येते तयोः समासं

कृत्वा शंसेत्। उत्तमे पदे समस्य शंसेदिति वा योजना। पच्छोन्यत्। उक्तादन्यत्पच्छः शंसेत्।

यदिदमर्धर्चशंसनविधानं सामिधेन्यतिदेशप्राप्तमप्युपदिश्यते तत्पच्छः स्याविषय

नियमार्थेन स्वरूपविधानपरं। पादैरवसायार्धर्चांतैः संतानः। इदं पच्छः शस्यप्रकार

प्रदर्शनार्थं। अर्धर्चांतैः संतान इत्यर्धर्चांते प्रणवं कृत्वांतैः संतानः कर्तव्यः। अग्निर्नेता

त्वं सोम क्रतुभिः पिन्वंत्यप इति धाय्याः। धाय्या इति नाम। प्रव इंद्राय बृहत इति मरुत्वती

यः प्रगाथः। इदमपि नाम। जनिष्ठा उग्र इति। इदं सूक्तं। एकभूयसीः शस्त्वा मरुत्वतीयां

१ सर्वत्र निविदं दध्यात्। अर्धा इति ब्राह्मणाल्लभ्यते। तस्यार्धाः शस्त्वार्धाः परिशिष्य मध्ये निविदं

एतस्य सूक्तस्यार्धा एकाधिकाः शस्त्वा तदंतरालेद्वंद्वोमरुत्वानिसेतां निविदं दध्यात्॥ १

स०व्या०५ गेद्धातीति॥ सर्वं ग्रहणं स्तूक्तमनुरवीयायां सत्यामपि तां मुक्त्वा सूक्तस्यैवैकभूयसी कृत्वा शस्त्वानि
२२६ विशेषयेत्येवमर्थो। एवमप्सुजास्कृ माध्यंदिने। सवनवचनं विस्पष्टार्थो। एकां तृचो। जं धार्युम्मासु।
शस्त्वेत्यनुवर्तते। एकां शिक्षात्तृतीयसवने। निविदं दध्यादित्यनुवर्तते। अक्षिणी मृजानः प
रिदध्याद्ध्यायन्नेनआत्मनः। उभयं कुर्वन्परिदध्यात्। एतत्त्रिष्वपि वचनेषु कर्तव्यां। एनः
पापं। आत्मन इति वचनान्नयजमानस्येति गम्यते। अन्यत्राप्येतया परिदधदेवं। आति
देशप्राप्तायां वचनाद्द्वेतेभवति। इदं तु वचनं जनिष्ठा उग्र उग्रो जज्ञ इति मध्यंदिन इति उ
पदेशप्राप्तायां प्रापणार्थं। उक्थं वाचीन्द्रायश्टृष्वते त्वेति शस्त्वा जपेत्। ये त्वाहिहत्ये म
घवन्नवर्धन्निति याज्या। १४॥ निष्केवल्यस्य। अधिकारोयं निष्केवल्य इति शस्त्रनाम। २२६
अभित्वाशूर नोनुमोभित्वापूर्वपीतय इति प्रगाथौ स्तोत्रियानुरूपौ यादि रथंतरं पृष्ठं॥

रथंतरमितिसामविशेषः। पृष्ठमित्यस्मिंस्थानेज्योतिष्टोमांगभूतसामाभिव्यक्तऋगक्ष
रसंपाद्यस्तुतिजन्यंशास्त्रैकसमधिगम्यंकार्यमुच्यते। तत्रयद्विरथंतरंपृष्ठमित्ययमर्थः
। यदिपृष्ठकार्येरथंतरंसामकुर्युश्छंदोगाइति। एवंबृहत्पृष्ठंवैरूपंपृष्ठमित्येवमादिष्वपि
द्रष्टव्यं। सामानाधिकरण्यंत्वौपचारिकमितिमंतव्यं। प्रगाथवचनंद्वृचग्रहणार्थं। स्तो
त्रियानुरूपवचनंतृचत्वादिसिध्यर्थं। यद्युवैबृहत्त्वामिद्धिहवामहेत्वंह्येहिचेरवइतिप्र
गाथाएतेभवंति। सिद्धेसत्यारंभोनियमार्थः। यद्येतेषुछंदोगाद्विपदोत्तराकारंशंसेयुस्तदा द्वृचेषु द्व
इत्यर्थः। तांद्वेतिस्वरकारंशंसेत्। अनभ्यासेनतृचाकारस्तवनेद्वृचाएवनतृचाःकर्तव्या
इत्युक्तं। इदानींअभ्यासेनतृचाकारस्तवनेतान्प्रगाथान्द्वृचऋचोसत्योअभ्यासेनतृ
स्त्रऋचःकृत्वाशंसेत्। इतिसूत्रार्थः। तदेवंप्रकारमित्याह। चतुर्थषष्ठौपादौबार्हतेप्रगा

तृचंकृत्वास्तवंतिलथाप्यस्याभिधेर्चाएवकृत्वाशंसेयुः। नयथास्तुतंतृचाकारंद्व

१ पूर्वाबृहतीउत्तरासतोबृहती २ — २ पूर्वाककुप्उत्तरासतोबृहती १

सं॰ बृ॰ ५ येपुनरभ्यसित्वोत्तरयोरवस्येत्। बृहतीसतोबृहत्योर्योद्वृचः स बार्हतः प्रगाथ इत्युच्यते। ककु

२२७ सतोबृह[illegible]त्योः काकुभ इति। बार्हताधिकारे पुनर्बार्हतवचनमनधिकृतानामप्यस्य विधेः

227 प्रापणार्थं। तस्मिंश्चतुर्थषष्ठौ पादौ पुनरभ्यस्य सप्तमपंचमयोः पादयोरवस्येत्। अत्रा

वसानाभ्यासौ विधीयेते। एवं कृते पूर्वा बृहत्युत्तरे ककुभौ भवतः। बृहतीकारं चेत्तावेव

द्विः। बृहतीं कृत्वा शंसनं बृहतीकारमित्यर्थः। यदि तिस्रो बृहत्य एव चिकीर्ष्यंते तदा ता

वेव पादौ पुनर्द्विरभ्यस्य तत्रैवावस्येत्। तत्रैवावसानलाभार्थं प्रगाथस्यार्धर्चशंसन

विधानमित्युक्तं। तृतीयपंचमौ तु काकुभेषु। एतेष्वेतावभ्यस्योत्तरयोरवस्येत्। उत्तर

योरवस्येदित्यत्रानुवर्तते। तदनुवर्तमानमपि प्रगाथस्यार्धर्चशंसनविधिबलात्पूर्व २२७

त्रनिः प्रयोजनमेवावतिष्ठते। अत्र तु प्रयोजनमस्तीत्युक्तं। प्रत्यादानाद्युत्तरा। कुंभ

वतीतिशेषः। एवमेतस्मिन्पृष्ठेष्वहःस्विंद्रनिहवब्राह्मणस्पत्यान्। एतत्पृष्ठेष्विति समास
निर्देशादेतदेवेत्यवधार्यते। एतच्छब्देन प्रकृतत्वाद्बृहद्रथंतरे उच्येते। एतदुक्तं भवति।
येष्वहःसु बृहद्रथंतरं वा तयोः संहति वा पृष्ठकार्यं भवति तत्र यथा बृहद्रथंतरस्तोत्रि
यानुरूपयोः शंसनं भवति तद्वदिंद्रनिहवब्राह्मणस्पत्यां छंशेत्। तयोस्तु शंसनं यथा
स्तुतमिति वक्ष्यति। बृहतीकारमितरेषु पृष्ठेषु। बृहद्रथंतराभ्यामितरेषु पृष्ठेषु तान्
बृहतीकारं शंसेत्। इतरेष्विति समासनिर्देशादितरसत्तामात्रेपि बृहतीकारमेव भव
ति। तेनाप्तोर्यामे रथंतरे याग्रे ततो वैराजेन स्तत्र यद्यपि बृहद्रथंतरे पृष्ठे तथापि वैरा
जसंबंधाद्बृहतीकारमेव भवतीति। बृहद्रथंतरयोश्चलच्छयोः। यदा बृहद्रथंतरे
गायत्रीषु वान्यासु वानभ्यस्तासु तिसृषु ककुप्सु स्तुवते स्तयोनिषु वा द्विपदोत्तरकारं त

उक्तादन्यत्सर्वं यथास्तुतं शंसेत् । ३

२= अयं विधिर्बार्हतेषु न काकुभेषु इत्य ग्रेवक्ष्य=
=ति सर्वाः ककुभः सूत्र=२

स०वृ०५ हापीहनिहवब्राह्मणास्पत्यान्बार्हतीकारं शंसेत् । होत्रकाश्चये षां प्रगाथास्तोत्रियानुरूपाः ॥

२२६ ये षां होत्रकाणां प्रगाथास्तोत्रियानुरूपा भवंति ते पीहनिहवब्राह्मणास्पत्यवत्तां छंसेयुः ॥

सर्वमन्यद्यथास्कृतं शंसेयुः । सर्वग्रहणं बृहद्रथंतरयोस्तोत्रियानुरूपसंग्रहार्थं । प

226 रिमितशास्य एकाहः । परिमितः । परिमितः सर्वतो मितं शास्यं यस्याह्नः स परिमितशास्यः ।

एतदुक्तं भवति । यः स्वकीयैर्धर्मजातैरुपदेशात एव परिपूर्ण इति । स चैकेनाह्ना समा

प्यत इत्येकाहः । अनेन प्रकारेणापरिमितशास्यशब्देन प्रकृतिभूतोग्निष्टोम उच्यते ।

यो यमधिकृत एकाहः । अनेन सर्वत औपदेशिकस्य इत्यर्थः । एवं च छस्य विशेष

णं किमर्थमन्यदपि धर्मजातं तस्योपदेशादवगतं मेवा । अत्रोच्यते । सत्यमेवं किंत

त्र विशेषोस्ति सोमद्रव्यसंबंधिनो ये धर्मा उत्पत्तिविध्यनुप्रवेशिनस्ते चतुःसंस्थस्य २२८

ज्योतिष्टोमस्यसाधारण्यात्॥ येपुनरधिकारविध्यनुप्रवेशिनोदीक्षणीयादयःस्ततशस्त्रा
दयश्चतउपदेशतोग्निष्टोमस्यैवअतिदेशतएवोक्थ्यादीनामपिसंस्थानामित्यनेनवि
शेषेणशास्यविशेषणंकृतवानाचार्यः॥ तस्यचैकाहत्वंप्रसिद्धमेवोच्यतेतेनशब्देनास्य
व्यवहारार्थं॥ सयद्युभयसामायत्स्तवमानेतस्ययोनिरूपः॥ सप्रकृतएकाहोयद्युभय रत्नु४
सामास्यात्॥ बृहद्रथंतरसामास्यादित्यर्थः॥ उभयसामत्वंनामैवंभवति॥ बृहद्रथंतरं
वापृष्ठस्थानेभवतीतरत्स्तवमानइति॥ तत्रयस्तवमानेभवतितस्ययोनिंनिष्केवल्य
स्यानुरूपंकुर्यात्॥ सूत्रियस्यायमर्थः प्रत्यक्षाम्नातएवेदंतुसूत्रवचनंसर्वार्थत्वायो
च्यते॥ योनिस्थानएवैनामन्यत्रशंसेत्॥ अन्यत्रेत्युक्थ्यादीन्यपिगृह्यंते॥ अग्निष्टोमा
दन्योयःकश्चिदुभयसामैकाहःसंस्थावाबृहद्रथंतरसामास्यादित्यर्थः॥ तत्रयस्तव

३ = अथातस्तुतशस्त्रयोरेवेत्यस्मिन्खंडे = २

तस्य १

स्०वृ०५ मानेकृतं योनिं योनिस्थानएवशंसेत्।योनिस्थानमाह।ऊर्ध्वंधाय्यायायोनिस्थानं।निष्केव
२२६ ल्यधाय्यायाऊर्ध्वंयत्स्थानंतद्योनीनांस्थानंशंसनस्थानमित्यर्थः।अनेकानंतर्यसकृत्स्त
थग्वाह्वानं।अनेकासांसामयोनीनांसहशंसनेप्राप्तेआदावेवसर्वासामाहावःसकृ
त्कर्तव्यःप्रतियोनिवेतिविकल्पः।तेभ्यश्चान्यदनंतरमित्यनेनादौसकृदाहावःप्राप्तए
वोत्तरविकल्पेनविधीयते।एवमूर्ध्वभिंद्रनिहवामप्रगाथानां।ब्राह्मणस्पत्यमरुत्वती
यसामप्रगाथायदानेकेसहसंगच्छेयुस्तदातेष्वपिसकृत्स्तथग्वाहावःकर्तव्यः।अत्र
सर्वत्राहावेप्राप्तेअनेनाद्येष्वविकल्पोत्रविधीयते।यद्वावानेतिधाय्या।पिबासुतस्य
रसिनइतिसामप्रगाथः।संज्ञाशब्दावेतौ।इंद्रस्यनुवीर्याणीत्येतस्मिन्नैंद्रीनिविदंदध्या २२६
त्।इंद्रोदेवतायस्याइत्यैंद्रीनिवित्।अनुब्राह्मणंवास्वरः।उक्थंवाचीन्द्रायेत्यपश्यण्वते

त्वेति प्रा स्त्वाजपेत्। पिबा सोममिंद्र मंदतु त्वेति याज्या। होत्रकाणां माध्यंदिने पि शस्त्राणि
भवंतीत्युक्तं। तान्येतानीत्याह। १५। होत्रकाणां कयानश्चित्र आभुवत्कया त्वंनऊत्या कस्त
मिंद्र त्वावस्त्र सद्यो ह जात एवा त्वामिंद्र शंनु शुण: सुमनाउपाकइति याज्या। तंवोदस्ममृती
षहं तत्त्वा यामि सुवीर्यमिति प्रगाथौ स्तोत्रियानुरूपाउद्वेदभि श्रुतामधं वृषभं नर्यापसं
ब्रह्माण्यजीषी वज्री वृषभ स्तुरा षाळिति याज्या। तरोभिर्वो विदद्वसुं तरणिरित्सिषास
तीति प्रगाथौ स्तोत्रियानुरूपाउदिन्न्वस्य रिच्यते भूय इदिमा म्रुष्विन्द्र पोत्रमामुद्वरेत्स
र्वत्र पिबा वर्धस्व तव घा सुतास इति याज्या। अत्रोपोत्रमामुद्धरेत्सर्वत्रेत्युक्तं। तस्य सर्व
त्र ग्रहणस्य प्रयोजनमन्यत्राप्येतयेत्यनेनान्यग्रहणेन तुल्यं। अस्मिन्नवसरे सवनसं
स्थानिमित्तं कर्म कर्तव्यं। १६। अथ तृतीयसवनमुत्तम स्वरेण। स्वरग्रहणं पूर्ववद्धाथ का

स्र० इ० ५ बाधनार्थं। तेन पाशुके हविःसंप्रचारेष्वुत्तमः स्वरः सिद्धो भवति। आदित्ये [illegible] न ग्रहे याचरंति।
२३० आदित्यो देवता यस्य ग्रहस्य आदित्यग्रहस्तेन चरंति। आदित्यानामवसानूतेनेन होताय
क्षदादित्यान्प्रियान्प्रियधाम्न आदित्यासो अदितिर्मादयंतामिति नैतं ग्रहमीक्षेत हूयमानं। अ
त्र प्रतिषेधान्नियमेन नेक्षेत तेनान्यत्रानियमः। कृत आभवे पवमाने विहृत्यां गारान्मनो
230
तादि पाश्विकांतं पशुकर्म कृत्वा पुरोडाशायुक्तमानाराशंससादनात्। कर्तव्यमिति शेषः।
त० विहरणोपदेशस्तत्कालपरिज्ञानार्थं ध्यवाय परिहारार्थः। अत्रापि द्विदेवत्या न संति। पाश्वि
कांतं कर्मेत्येतावतैव सिद्धे पशुग्रहणं ब्रह्मणः पशुवदासनप्राप्त्यर्थं। तेनैतस्मिन्नवसरे
आहवनीयस्य दक्षिणात आसनं भवति। सं नेषु मार्दिष्ठान्पुरोडाशान्स्यति स्त्रस्तिस्त्र: पिं २३०
ज्या दक्षिणतः प्रतिस्वं चमसेभ्यः स्वेभ्यः पितृभ्य उपास्येयुरत्र पितरो मादयध्वं यथाभा

गमादृषायध्वमिति। नाराशंसेषुसादितेषुपुरोडाशस्यमध्येउत्तरात्अर्धदेशाद्गृहीत्वासर्वेचमसि
नःपुरोडाशंतिस्रःतिस्रःपिंडीःकृत्वास्वात्स्वाच्चमसाद्दक्षिणतःस्वान्स्वान्पितृनुद्दिश्यचमस
समीपेआस्येयुः। ताःपिंडीःप्रतिस्वमितिचमसेभ्यइत्यस्यविशेषणं। पितृशब्दस्यसंबंधि
शब्दत्वेयेवस्वत्वेसिद्धेयत्स्वशब्दग्रहणंकरोतितज्ज्ञापयतिसंबंधिपदार्थे। अपियत्वाद
तेयजमानस्यैवेति। तेनयस्यांदिश्यासीनतामित्यत्रयजमानदिश्यएवपरिशिष्यते। स्वयाद
तआग्नीध्रीयंप्राप्यहविरुच्छिष्टंसर्वेप्राश्नीयुः। प्राश्यप्रतिप्रस्थाय। १७। सावित्रेणग्रहेण
चरंति। एतदुभयंगतार्थं। सवितृदेवत्योग्रहःसावित्रग्रहः। अभूद्देवःसवितावंद्योनुनो
होतायक्षद्देवंसवितारंदमूनादेवःसवितावरेण्योदधद्रत्नादक्षपितृभ्यआयुनि। पिबा
त्सोमंममदन्नेनमिष्टयःपरिज्माचिद्रमतेअस्यधर्मणीति। वषट्कृतेहोतावैश्वदेवंग्रहंस्त्र

स०ह०५ शंसेत्। वषट्कृतवचनमत्रापि शस्त्रकालज्ञापनार्थं। होतृग्रहणमृत्विक्कर्मव्यतिकरविष
२३१ येपि होता वैश्वदेवं शंसेदित्येवमर्थं। वैश्वदेव [illegible] मिति शस्त्रनाम। सर्वा दिशो ध्यायेच्छं
सिष्यन्। यस्यां द्वेष्यो न तां। यस्यां द्वेष्यो न तां दिशं ध्यायेदिति वचनात्सर्वध्यानमत्र न सं
231 भवतीति प्राच्यादिशब्दैरेव ध्यानं कर्तव्यं। अध्वर्यो शोंशोंसावो मिति तृतीयसवने शस्त्रा
दिष्वाहावः। उक्तार्थमेतन्माध्यंदिने। तत्सवितुर्वृणीमहे अद्या नो देव सवितरिति वैश्वदेवस्य
प्रतिपदनुचरौ। अभूद्देव एकया च दशभिश्च स्वभूते द्वाभ्यामिष्टये विंशत्या च। तिसृभिश्च व
हसे त्रिंशता च नियुद्भिर्वायविह ता वि मुंच प्रद्यावेति दैर्घतमसं सुरूपकृत्नुमूतये त
क्षन्रथमयं वेनश्चोदयत्पृश्निगर्भा येभ्यो माता मधुमत्पिन्वते पय एवा पित्रे विश्वदेवाय २३१
वृष्ण्या आ नो भद्राः क्रतवो यन्तु विश्वत इति नव वैश्वदेवं। पुनर्वैश्वदेवग्रहणं शस्त्रादि

ष्विति व्यवायात्। एकया चेति कल्पजा दैर्घतमसेति वा सिद्धानि वृत्यर्थं। नवग्रहणं अस्य
सूक्तस्योत्तमावर्जस्यैव वैश्वदेवसूक्तत्वसिध्यर्थं। एतत्सार्वत्रिकं। उत्तमायाः परिधानी
यत्वेन सर्वत्र विनिवेशात्। वैश्वदेवाग्निमारुतयोः सूक्तेषु सावित्र्यादिनिविदो दध्यात्॥
सप्तसूक्तानि सप्तैव चानिविदो वधिष्यंते। उत्तमायाः षोडशिनि विनियोगात्। अतो य
थासंख्येन विनिवेशः सिद्धो भवति तदेव स्पष्टयति। च तस्रो वैश्वदेवे। शास्त्र इत्यर्थः॥
उत्तरास्तिस्र उत्तरे। आग्निमारुत इत्यर्थः। सूक्तानां तद्धि दैवतं। सूक्तानां यद्दैवतं भवति।
तद्देवा निविदो दैवतमित्यर्थः। हि शब्दो हेत्वर्थसूचकः प्रसिद्धिद्वारेण। तेनायमर्थः। य
स्मादनयोरेकदैवतत्वं प्रसिद्धं तस्मादग्निरुद्रादौ सूक्तानां देवताभेदे सति निविदऊहे
न तद्दैवत्याः कर्तव्याः। तास्वदेवतापदानामूहः कर्तव्य इत्यर्थः। दैवतेन सूक्तांतः। यदैत

सू०वृ०५ योः शास्त्रयोः सहैव सूक्तानि तदानि विद्भिर्यथासंख्यमुपपद्यंते। यदा पुनर्विकृतिषु स
२३२ घम्भोधिकानि तदा कथं यथासंख्यमिति तदुपपादनार्थमिदं सूत्रं दैवतेन सूक्तांत इति
।दैवतेनैव सूक्तानां नानात्वमवगंतव्यं न समाम्नायप्रसिध्या। एतदुक्तं भवति। एतयोः
232 शास्त्रयोः सहैव कार्याणि प्रकृतौ परिच्छिन्नानि। तत्रैकं कार्यमेकं वा सूक्तं कुर्यात् द्वे ब
हूनि वा। सर्वथा तावदेकसूक्तकार्यानुप्रविष्टमेकमेवेति कृत्वा यावतां सूक्तानामेकं
दैवतं तावदेकमेवेति मन्यमानो दैवतेन सूक्तांत इत्युक्तवानाचार्यः। धाय्याश्चात्रैक
पातिनीः। विद्यादिति शेषः। अत्रेति वैश्वदेवाग्निमारुतयोरित्यर्थः। अस्य विधेरुभया
र्थत्वाद्योत्तरसूत्रे वैश्वदेवशब्दं प्रयुक्तवानाचार्यः। अदितिर्द्यौरदितिरंतरिक्षमिति परि २३२
दध्यात्सर्वत्र वैश्वदेवैः पच्छोर्धर्चशः सकृदभिमुपस्पृशन्। सर्वत्र प्रकृतौ विकृतौ च

अनयोः शास्त्रयोर्या एकपातिन्य एकया चेत्यादयः ता धाय्या भवंतीत्यर्थः तेन तासु आ[illegible]हावः पुनः पुनः कर्तव्यः = ४

वैश्वदेवशास्त्रेऽअनयैव परिदध्यात्। इत्थं च परिदध्यादिदं न कुर्वन्परिदध्यादित्यर्थः। उ
कंठवाचीश्रयदेवेभ्य आश्रुत्येत्येतिशस्त्वा जपेत्। विश्वेदेवाः शृणुतेमं हवं म इति याज्या।
१८॥ त्वं सोम पितृभिः संविदान इति सौम्यस्य याज्या। सौम्यो नाम कर्मविशेषः श्वरुहविष्कः
सोमदेवत्यः। तं घृतयाज्याभ्यामुपांशुभयतः परियजंति। तं सौम्यमभितो घृतयाज्याभ्यां
उपांशु परियजंति। तत्रैव विशेषमाह। घृताहवनो घृतपृष्ठो अग्निर्घृतैश्रितो घृतम्व
स्य धाम। घृतप्रुषस्त्वा हरितो वहंतु घृतं पिबन्यजसि देव देवानिति पुरस्तात्। उरु विष्णो
विक्रमस्वोरु क्षयाय नस्कृधि। घृतं घृतयोने पिब प्रप्रयज्ञपतिं तिरेति परिष्टात्। अ
न्यतरतश्चेदग्नाविष्णू महि धाम प्रियं वामित्युपांश्वेव। यद्यन्यतरतो यजंति तदानया
यजेत्तदाप्युपांश्वेव। एवकारः पौनर्वचनिकः। आह तं सौम्यं पूर्वमुद्यातृभ्यो गृहीत्वा वे

स०वृ०५ क्षेतयन्तेचक्षुर्द्विविषत्स्फपर्णेयेनैकराज्यमजयोहिना। दीर्घयच्चक्षुरादितेरनंतंसोमोनृच
२३३ क्षामयितद्दधात्विति। अध्वर्युणाआहृतमुज्ञात्ेभ्यः पूर्वंगृहीत्वासोम्यमवेक्षेतमंत्रेण।
अपश्यन्त्वाहृदिस्थकतुस्थंग्वचोधावचोअस्मास्फधेहि। यन्मेमनोयमंगतंयद्वामेअपरा
२३३ गतं। राज्ञासोमेनतद्वयमस्मासुधारयामसि। भद्रंकर्णेभिःशृणुयामदेवाइतिच। तस्मिं
श्चरोघ्रतधुतेईक्षमाणःस्वछायांयदिनपश्येत्तस्यापश्यतोनैमित्तिकमिदं। हृदिस्थगि
त्यादियजुश्चभद्रंकर्णेभिरित्यृचंब्रूयात्। अंगुष्ठोपकनिष्ठिकाभ्यामाज्येनाक्षिणीअ
ज्यछंदोगेभ्यः प्रयछेत्। अंगुष्ठोपकनिष्ठिकाभ्यांचरुरुछेनाज्येनाक्षिणीअंत्काछंदो
गेभ्यः प्रदानार्थमध्वर्यवेप्रयछेदित्यर्थः। अंजनादिनित्यमेव। विहृतेषुशालाकेष्वा २३३
ग्नीध्रः पात्नीवतस्ययजत्येभिरग्नेसरथंयाह्यर्वाङित्यृपांश्वेव। शालाकादर्भेषीकाः

तेषुभवा अग्नयः शालाकाः। तेषुविहृतेष्वितिविहरणकालोपदेशस्तस्यव्यवायपरि
हारार्थः। शालाकाः धिष्ण्या अग्नयः। उपांश्वेवेत्यवधारणं तेषामुच्चैः संप्रैषेषूपांश्वे
वयष्टव्यमित्येवमर्थं। नेष्टारं विसंस्थितसंचरेणानुप्रपद्यतस्योपरुष्टउपविश्यभक्ष
येत्। नेष्टुर्विसंस्थितसंचरेणनेष्टारमनुप्रपद्यतस्यउपरुष्टउपविश्यभक्षयेत्पाली
वतं नेष्टर्यधिकृतेउपरुष्टइतिवचनात्तस्यैवेत्यवगतौसत्यां तस्येतिवचनं शास्त्रांत
रेणानोपरुष्टआसीतेतिप्रतिषेधेसत्यपिउपरुष्टएवोपविशेदित्येवमर्थं। अस्यसूत्र
कारस्यान्याकृतिर्मूलमस्तीत्यनुमिमीमहे। १६। अथयथेतं। अथानंतरमेवयथे
तं निष्क्रामेत्। सदसआग्नीध्रं प्रतिगच्छेत्। तस्मिन्नाग्नीध्रीयेयथेतंनिष्क्रांतएवाग्नि
मारुतमारंभेतिवचनप्रयोजनं। यथेतमितियेनैवमार्गेणागतस्तेनैवेति। स्वभ्यग्र

३५ णाद्वित्ति संत्वरा ग्रलिषे धाद नंतर मध्यमा वृत्तिः विहिता भवतितत आग्निमारुते मध्यमा ३

सू० द० ५ माग्निमारुतं। स्वभ्यंग्रंडत द्धत्येत्यर्थः। वा चस्तिस्त्र वृत्तयो विलंबिता मध्यमा द्रुता चेति। तत्र वि

२३८ लंबितायां यएक मात्रः स मध्यमायां द्विमात्रः एवं द्रुतायां त्रिमात्र इत्यासु विशेषः। एवं श्रूयते

।ते नासंत्वरमाणा अग्ने रेयुरित्यारभ्यात्रिषु सवने ष्वसंत्वरमाया अग्ने रेयुरितिश्रुते असंत्वरमा

मपाद्य द्रुताविधीयते। उच्च नीचभावे नैवशंस्तव्यं। त्रिषु सवनेषु मंद्रादयो यमाः आरोह

क्रमेणैव प्रयोक्तव्याः। आग्निमारुतमिति शस्त्रनाम। तस्याद्यां पच्छ ऋगावानं पच्छः शस्या

चेत्। तस्याग्निमारुतस्याद्यामृचमृगावानं शंसेत्। यदि सा पच्छः शस्या भवेत्तदा पादे पादे

संनेव वसायानु द्रुं शंसेत्। अर्धर्च ईतरां। यदि सार्धर्चेशस्या स्यात्तदा अर्धर्चे वसायानवान

मित्यर्थः। संतानमुत्तमेन वचनेन। ऋगावानवचनात्त्रिषु वचनेषु असंताने प्राप्ते उत्तमे २३८

नवचनेन द्वितीयया संतानं विधीयते। वैश्वानराय पृथुपाजसे शंनः करत्यर्वते प्रत्नस्य

सःप्रतवसोयत्तायत्तावोअग्नयेदेवोवोद्रविणोदाइतिप्रगाथौस्तोत्रियानुरूपौप्रतव्यसीं
नव्यसीमापोहिष्ठेतितिस्त्रोवियतमपउपस्पृशान्नन्वारभेध्वपाहृतशिरस्काइदमादिप्रति
प्रतीकमाक्रानसुतनोहिर्बुध्न्यःश्रृणोतुदेवानांपत्नीरुशतीरवंतुनइतिद्वेराकामहमिति
द्वेपावीरवीकन्याचित्रायुरिमंयमप्रस्तरमाहिसीदेमातलीकव्यैर्यमोअंगिरोभिरुदीरता
मवरउत्परासआहंपितृन्त्सुविदत्रांअवित्सीदंपितृभ्योनमोअस्त्वद्यस्वाउष्किलायमिति
चतस्त्रोमध्येचाक्रानंमदामोदेवमोदामोदैवोमित्यासांप्रतिगरोययोरोजसास्कभितारजां
सिवीर्येभिवरतमाशाविष्णो।यापत्नेतेअप्रनीतासहोभिर्विष्णूअगन्वरुणापूर्वहूतौ।
विष्णोर्नुकंवीर्याणिप्रवोचंतंतुतन्वन्नरजसोभानुमन्विहित्येवानइंद्रोमघवाविरप्शीतिप
रिदध्यात्।भूमिमुपस्पृशन्।अत्रवियतमपउपस्पृशान्निर्त्याहिष्ठीयेउक्ताः।वियतमिति पो

स्०सू०५ स्युपरतं। स्थित्वा स्थित्वा शंसेदित्यर्थः। अपश्रेयांपरस्थानशंसेत्। अन्वारब्धेष्वप्रावृतशिरस्काः
२३५ ऽउद्गात्रादिष्वात्मानं अन्वारब्धे शिरसः प्रावरणमपोहेत्। अनेनैव ज्ञायते स्तोत्रोपाकरण
काल एव सर्वे प्रावृतशिरस्का भवेयुरिति। इडमादिप्रतिप्रतीकमाकानमित्यत्रे इडमादीत्या
पोहिक्षीयादीत्यर्थः। अस्य विधेर्विषये धाय्यात्वादनंतरत्वाद्विशेषवचनाच्च काराहूत
वर्ज्यं अन्येषु सर्वेष्वाहावः प्राप्त एव किमर्थोयं महानप्रयास इति न विघ्नः। राकाहूचा
र्थमिति चेत्तदेवं वक्तव्यमापोदेवते च त्वं चे राकाहूचे चेति तत्रैव वक्तव्यमत्रैव वैतयो
राहावसिध्यर्थं इडमादीत्येतन्न वक्तव्यं स्यात् एवं लघुनोपायेनोभयोराहावे विधातुं
शक्येपि अब्दवतस्य यत्सुरस्तादाहावं विदधाति तज्ज्ञापयत्याचार्योस्य विधेरनित्यत्वं। २३५
तेन राकाहूचे आहावविकल्पः सिद्धो भवति। मदामोदैव मोदामोदैवोमित्यासां प्रतिग

रावित्यत्रेदं प्रतिगरद्वयमोथामोदैवेत्यस्यश्रुताश्रुतादिरूपद्वयविशिष्टस्यापवादः।
प्रथावे प्रणवआहावोत्तरइत्ययंप्रणवः श्रुतादेरपवादः न[illegible]मोदामोदैवोमित्यस्य।
अतःस्वाउष्किडीयास्वाहावोत्तरेपि न प्रणवः प्रतिगरो भवतीति सिद्धं। एवमादिप्र
योजनार्थप्रसंगादपवादो बलीयानित्युक्तं। भूमिमुपस्पृशन्परिदध्यात्। उत्तमेनव
चनेनऋत्वावनयनं कांक्षेत्। परिधानीयायाउत्तमेनवचनेनऋत्वावनयनंप्रतीक्षे
त। ऋत्वोनामग्रहः तस्यावनयनमवसेचनं होतृचमसे। तदस्मिंश्छस्त्रेअसमाप्त
एवकर्तव्यं। तत्पूर्वमनवनीतं चेत्परिधानीयायामध्यमेवचनेउत्तमं पादमवशि
ष्यास्थित्वातस्मिन्नवनीतेशेषंसमापयेत्। उक्तं वाचीशायदेवेभ्यआश्रुतायत्वेति
शास्त्वाजपेत्। अग्नेमरुद्भिः शुभयद्भिर्ऋक्वभिरिति याज्या। इत्युक्तोग्निष्टोमोग्निष्टो

सू० १०५ मः। इति शब्देन प्रकृतमाग्निमारुतमुच्यते। एतदंतः सोमयागोग्निष्टोमसंज्ञो भवतीत्य
२३६ र्थः। यद्यंतशब्दो नोच्येत यदिदमाग्निमारुतं तदग्नेः स्तोत्रमित्येवोक्तं स्यात्तच्च न वक्त
236 व्यं स्वरूपत एव तदग्नेरन्येषां च स्तोत्रमेव। अन्यनिवृत्त्यर्थमिति चेत्तदपि वक्तुं न श
क्यते। लिंगविरोधादैंद्रीवद्वचनाभावाच्च तेनेत्यंत इत्युक्तमेतदंतस्य नामधेयमेष
शब्द इति साधयितुं ॥२०॥ इत्याश्वलायनसूत्रवृत्तौ नारायणविरचितायां पंचमोध्या
यः ॥५॥ हरिः ॐ ॥ उक्थ्ये तु होत्रकाणां। तृतीयसवन इत्यनुवर्तते। उक्थ्ये त्वयं वि
शेषः। तृतीयसवने होत्रकाणामपि शस्त्राणि भवेयुः। तानीमानीत्याह। एन्द्राबृहस्पती वा
णि त आग्निरगामिभारतश्चर्षणीधृतमस्तभ्नाद्द्यामसुर इति त्वचा विंश २३६
वरुणा युवमा वां राजानाविंद्रावरुणा मधुमत्तमस्येति याज्या वयमु त्वामपूर्व्य योन

इदमिद्धं पुरेति प्रगाथौ सर्वाः ककुभः प्रमंहिष्ठायेत्युक्तो ह्याम इंद्रं ब्रहस्पतेयुव
मिंद्रश्च वस्वइति याज्या धाहोइगिर्वणइयंतइंद्रगिर्वण क्रतुर्जनित्रीन्तमर्तोभवामित्रः
संवांकर्मयोऽपविष्णुमदपतीमदानामिति याज्या। अत्र सर्वाः ककुभ इत्युक्तं। किमने
नोक्तं काकुभेषु तावत्प्रगाथेषु तृतीयपंचमयोरभ्यासे सति ककुभ एव सर्वा भवंति
तथैव स्तुवंति च छंदोगाः। अतोऽन्यस्य योजनमन्वेषणीयं तदिदमुच्यते। होत्रकाश्च
येषां प्रगाथा स्तोत्रियानुरूपा इतीदं निहव ब्राह्मणस्यत्यवछंस नो विहितं तत्र बार्हता
नामेवायं विधिरित्यनु क्त्वात्। काकुभेष्वपि प्राप्नोति तं निवृत्त्यर्थं ककुभ इति वच
नं। सर्वग्रहणं सर्वकाकुभ प्रगाथसंग्रहार्थं। तेन बार्हतेष्वेवासौ विधिरिति मंतव्यं।
इत्यंत उक्थ्यः। एवमंत उक्थ्यः क्रतुरित्यर्थः। इत्यंतोऽग्निष्टोम इत्यस्यानंतरं होत्रकाणा

स्तु० वृ० ६ मेतानिशास्त्राण्युक्त्वाइत्यंतउक्थ्यइत्येतावल्लक्ष्यमाणेपि एतानिशास्त्राण्युक्थ्यएवेतिगम्य
२३७ तेतत्किमर्थंउक्थ्येतुहोत्रकाणामित्यत्रोक्थ्यग्रहणमयमभिप्रायः। अथसोमेनेतिआ
रभ्यत्रिष्वाध्यायेषुज्योतिष्टोमाख्यःसोमयागोधिकृतः। सचसंस्थाभेदान्नामभेदाच्च
चतुर्धाभिन्नोप्युत्पादितोभवति। तत्रसर्वत्रसोमेनयजेतेत्येतद्विधिविहितएवैको
यागः केनचिदुपाधिवशेनाभ्यस्तोभिन्नोनामप्रतीयते। अतःसर्वेषांप्रकरणि
त्वप्राप्तेअग्निष्टोमएवप्रकरणीअन्येतस्यैवगुणविकाराइतिज्ञापयितुमुक्थ्यइ
त्युच्यतेउक्थ्यएतावदेवोपदेशिकमन्यत्सर्वमातिदेशिकमित्यर्थइति। १॥ अथषोळ
शी। अथशब्दआनंतर्यार्थः। षोळशीत्ययंशब्दःशस्त्रवाची। तच्छस्त्रंतस्यक्रतोरपि २३७
वाचकः। तत्रैकेनोच्चारणेनोभयमत्रविवक्षितमाचार्येण। तेनायमर्थोगम्यते॥

9̄37

यद्विषोडशी क्रतुः स्यात्तदा तृतीयसवने होत्रकशस्त्रानंतरं षोडशी नाम शस्त्रं भवती
ति तस्य विधिरुच्यत इति संबंधः। असावि सोम इंद्र त इति स्तोत्रियानुरूपौ। अस्मिन्ने
व प्रतीके षळृच इत्यर्थः। आत्वा वहंतु हरय इति तिस्रो गायत्र्यः। अत्र छंदो निर्देशः
संव्यवहारार्थः। उपोषु शृणुही गिरः सुसंदृशं त्वा वयं मघवन्नित्येकादश च पंक्तौ। पं
क्त्य इत्यर्थः। यदिंद्र पृतनाज्ये यं ते अस्तु हर्यत इत्यौष्णिह बार्हतौ तृचौ। आधूर्ष्व
स्मा इति द्विपदा। द्विपदावचनं पच्छः शंसनार्थं। ब्रह्मन्वीर ब्रह्मकृतिं जुषाण इति
त्रिष्टुप्। एष ब्रह्मा य ऋत्विय इंद्रो नाम श्रुतो गृणे। विस्कृतयो यथा पथ इंद्र त्वद्यंति
रातयः। त्वामिच्छवसस्पते यंति गिरो न संयत इति तिस्रो द्विपदाः। प्रते महे विदथे शं
सिषं हरी इति तिस्रो जगत्यः। त्रिकद्रुकेषु महिषो यवाशिरं। प्रोष्वस्मै पुरोरथमिति

स०वृ०६ तृचावातिछंदसो। अतिजगत्यादीनि छंदांस्यतिछंदः शब्देनोच्यंते त्रिकद्रुकेष्वित्य
२३८ त्र प्रथमाष्टिः उत्तरे अति [illegible] शाक्वर्यो प्रोष्वितितृचः शाक्वर एव तेनातिछंदसावि
238 त्युच्येते। पच्छः पूर्वं द्वेधाकारं। अनयोः पूर्वं तृचं द्वेधाकृत्वा शंसेत् एकैकामृचं द्वे द्वे
ऋचौ कुर्यादित्यर्थः। पच्छः शंसने न तत्संपद्यत इति पच्छ इत्युक्तं। एवं चेत्पच्छः शंस
नमत्र सिद्धमेव चतुःपादत्वात् तथापि पच्छ इत्युक्तं द्वेधाकारमित्यस्यार्धर्चशंसन
विधिपरत्वाशंकानिवृत्त्यर्थं। तेनैतास्तिस्रः षड् भवंतीति स्तोमातिशंसनकालेष
ण्याः। उत्तरमनुष्टुप् गायत्रीकारं। अस्य तृचस्य सप्तपदत्वादेकैकां ऋचमेका
मनुष्टुभमेकां गायत्रीं च संपादयतीत्येवमुक्तं। आद्यैश्चतुर्भिः पादैरनुष्टुभस्ति २३८
सृभिर्गायत्र्यः अनेन प्रकारेणैता अपि च षड् भवंति। प्रयोजनं पूर्ववत्। प्रचेतन

प्रचेतयायाहिपिबमत्स्व। ककुप्छंदस्कं तं त्वृहत्स्कन्नआघेहिनोवसविस्त्यनुष्टुप्॥
प्रप्रवस्त्रिष्टुभमिषमर्चतप्रार्चत। योव्यतींरफाणयदितित्वचाआनुष्टुभाः। अस्या
नुष्टुभवचनस्यपूर्वोक्तप्रयोजनस्यासंभवादन्यदुच्यते। निविद्दधातिपक्षेसत्यामन्यस्मि
न्नप्यानुष्टुभएवतृचेनिविद्धेयेत्येतत्प्रयोजनंनजागतेसवनछंदस्केतृचइति। ते
नैतत्साधितंभवति। यत्रछंदोनिर्देशमंतरेणसवनविरुद्धछंदसिसूक्तेनिविद्वि
हितास्यात्तत्रतस्मिन्निवद्दधातिपक्षेसत्यांसवनछंदस्कमेवनसूक्तमाहर्तव्यंनातिप
न्नोनिवित्सूक्तसमानछंदस्कमिति। उत्तमस्योत्तमांशिष्ट्वोत्तमांनिविदंदध्यात्। उत्त
मांशिष्ट्वेत्येतदेकांशिष्ट्वेत्यनेनैवसिद्धंपुनर्वचनंनिविद्धानीयोतृचएवनसूक्तमि
तिज्ञापनार्थं। तेनात्रनिविद्दधातिपक्षेतृचएवान्यआहर्तव्योनसूक्तमितिसिद्धं। उत्त

स०सू०६ मां निविदमिति प्रसिद्धानुवादः। तस्य प्रयोजनं स्वाध्यायकालेप्यस्याः शाखाया अंते निवि
२३६ दः पठितव्या इति। लिंगैः पदानुपूर्व्या व्याख्यास्यामो मत्स्यदाहं हूत्र मपां जिन्व उदार्यमुद्यां
२३७ द्विविसमुद्रं पर्वतां इह। अस्या निविदः पाठविप्रतिपत्तौ सत्यामविछिन्नसंप्रदायागतपा
४५ ठप्रदर्शनार्थोयमुद्देशः। उपध्वन्मस्य विष्टपमिति परिधानीया। एवात्येवैवाहाइं। एवा
हिशक्रो वशी हि शक्र इति जपित्वा पाः पूर्वेषां हरिवः सुतानामिति यजति। जपित्वा यज
तीति वचनात् उत्तरत्र च याज्यासंसर्गदर्शनाद्याज्यांगमयं जपो न शस्त्रांगजप इति गम्य
ते। तेनात्र शस्त्रांगजप उक्थं वाचीन्द्रायदेवेभ्य इत्ययं भवति। तदनंतरमेवाहाउति मंत्रमु
क्त्वा यजति॥२॥ विहृतस्येन्द्र जुषस्व प्रवहायाहि शूर हरी इह। पिबासुतस्य मतिर्नम २३६
ध्वश्च का[illegible]नश्चारुर्मदाय। इन्द्र जठरं नव्यं न पृणस्व मधोर्दिवो न। अस्य सुतस्य स्व

र्णोपत्वा मदाः स्वचान्चोअस्त्रुः । इंद्रस्तुराषाण्मित्रो नजघान वृत्रं यतिर्न । बिभेद वलं भृगु
र्न ससाहे शत्रून्मदे सोमस्य । श्रुधी हवं न इंद्रो न गिरो जुषस्व वज्रीन । इंद्र सयुग्भिर्दिद्युं
न मत्स्वा मदाय महे रणाय । आ त्वा विशंतु कविर्नस्कता स इंद्र त्वष्टान । पृथा स्व कुक्षी सो
मो ना विद्धि श्रूर धियाहियानः । साधुर्नगृध्नुर्कृभुर्नास्ते वश्वरस्वमसो न । या ते व भीमो
विष्णुर्न त्वेषः समत्सु कृतुर्नेति स्तोत्रियानुरूपो । विहृतस्य षोळशिन इंद्र जुषस्वेत्यादि
नाअत्रैवाम्नाताः षष्ठ च स्तोत्रियानुरूपो भवतः । तेन पूर्वोक्तावविहृतस्येति गम्यते ।
ऊर्ध्वं स्तोत्रियानुरूपाभ्यां तदेव शस्यं विहरेत् । अत्र द्वावर्थौ विधीयते शंस्तव्यमेतावदे
तावद्विहर्तव्यमिति । एतदुक्तं भवति । विहृतस्य स्तोत्रियानुरूपा उक्तौ ताभ्यामूर्ध्वमविह
तेयच्छस्यं तदेव शंस्तव्यं । स्तोत्रियानुरूपौ तु प्रत्याम्नानान्निवर्तेते इति । एवं शस्यप्राप्ति

सू०वृ०६ रेकोऽर्थः। अपरस्य विहृतस्येत्यधिकृत्य वचनात्सर्वत्र विहरणे प्राप्ते ऊर्ध्वं स्तोत्रियानुरूपा
२४० भ्यामिति विहरणस्याविषयो नियम्यत इति। अतः स्तोत्रियानुरूपौ नास्माभिर्विहर्तव्यौ वि
हृतावेव पठितव्यावनाचार्य इति गम्यते। तदेतदुक्तं ब्राह्मणे। तद्यदिनानदं कुर्युरित्यादि
नाविहृतास्तु स्तुवत इत्येवमंतेन। विहरणस्वरूपमाह। पादान्व्यवधायार्धर्चशः शं
सेत्। द्वाभ्यां पादाभ्यामनर्धर्चंतिथ्यवसानं भवेत्। तत्र अन्त्यगं तेऽपि प्रणव इत्येवमर्थमर्ध
र्चश इति वचनं। पूर्वासां पूर्वाणि पदानि। पाठत एवास्मिन्नर्थे सिद्धे पुनर्वचनं गायत्र्यः
पंक्तिभिरित्यत्र पंक्तिपदानां पूर्वप्रयोगे रेवाव्यवधानं भवति गायत्रीपाठक्रमानुसारे
यात्रयाणामव्यवधानं स्यात्। तदा पादान्व्यवधायेत्येतन्न दूरोत्सारितमिति पाठक्रम २४०
त्यागः स्यान्निवृत्त्यर्थमिदमुच्यते। गायत्र्यः पंक्तिभिः। विहर्तव्या इति शेषः। पंक्तीनां तु द्वे

द्विपदेशिष्येते ताभ्यां प्रणुयात् । इदं न वक्तव्यं । प्राप्त एवायमर्थ उच्यते । अभ्यासेन पंक्तिपा
दसाम्यं गायत्रीपादानां न कर्तव्यमित्येवमर्थं । तेनान्यत्र न्यूनाधिकपादयोर्विहारे कर्त
व्यभ्यासेन पादसाम्यमापाद्य पादयोर्विहरणं कर्तव्यं महाव्रतादावित्येतत्साधितं भव
ति । उष्णिहो बृहतीभिरुष्णिहां तूत्तमान्यादान्द्वौ कुर्यात् । अत्र च पादविभागे क्रियमा
णे व्यंजनान्युत्तरां गामिति स्मर्तव्यं । चतुरक्षरमाद्यं । ततोऽष्टाक्षरमिति शेषः । एवं चतुरोभा
गान्कृत्वा बृहतीपादैर्विहर्तव्यमित्यर्थः । द्विपदाश्चतुर्धा कृत्वा प्रथमांस्त्रिष्टुभोत्तरा जग
तीभिः । अत्र द्विपदाश्च तस्रस्ताः सर्वाश्चतुर्धा कर्तव्याः । प्रथमायां सर्वे भागा व्यूहेनाव्यू
हेन च पंचाक्षराः । उत्तरासु चतुरक्षरभागाः । तत्र च प्रथमांस्त्रिष्टुभा विहरेत् । उत्तरास्ति
स्रो जगतीभिः । विभागे क्रियमाणे व्यंजनान्युत्तरां गामिति स्मर्तव्यं । उत्तमायाश्चतुर्थमक्ष

सू० वृ० ६ रमंत्यं पूर्वः स्यायमुत्तरस्य । उत्तमायाद्विपदायायश्चतुर्थमक्षरं तत्प्रथमस्य भागस्यांतं भव
२४१ ति । तदेवाद्वितीयस्य चाद्यं भवति । अनुष्टुभमतिछंदः स्ववदध्यात् । प्रचेतने त्येतामनु
ष्टुभमतिछंदः स्तुत्यस्ववधायशंसेदित्यर्थः । इत्थमवदध्यादित्याह । द्वितीयतृतीययोस्तृ
841 तीययोः पादयोरवसानतउपरध्यात्प्रचेतनेति पूर्वस्यां प्रचेतयेत्युत्तरस्यां । अनुष्टुभः
प्रथमं पादं द्विधाकृत्वा धत्ति षीमान्त्साकं जातइत्यनयोर्ऋचोस्तृतीयपादावसानउप
धायतत्रावस्येत् । प्रचेतनेति द्वितीयस्यां प्रचेतयेति तृतीयस्यामित्यर्थः । उत्तरास्त्रि
तरान्पादान्षष्ठान्कृत्वानुष्टुप्प्रकारं शंसेत् । उत्तरास्कम्रो ष्वसमाइत्येतास्वित्यर्थः । इतरा
ननुष्टुभोद्वितीयतृतीयचतुर्थानित्यर्थः । एतान्पादानुत्तरास्वृक्षु यथासंख्येन षष्ठा २४१
न्कृत्वा एकैकामृचं द्वेद्वे अनुष्टुभौ कुर्यात् । ऊर्ध्वंस्तोत्रियानुरूपाभ्यामतो विहृतः ॥

स्तोत्रियानुरूपाभ्यामूर्ध्वंप्रोथ्वसाइत्येतदंतोयःशस्त्रावयवःसविहृतोभवतिएताव
तेवाविहृतत्वेसिद्धेविहृतवचनंविहृतधर्मस्यप्रतिगरादेरेनावस्त्येवनियमार्थं।तेन
स्तोत्रियानुरूपयोर्विहृतयोरपिविहृप्रतिगरोनभवति।आनुष्टुभानामपितृचानां ८३
विहृतस्येत्यधिकारातकथंचिद्विहरणंप्राप्नुयात्तन्निवृत्त्यर्थंच।तत्रप्रतिगरऽथा
मोदैवमदमदामोदैवोमथेति।द्वावेतौप्रतिगरौतत्रैकवचनंजात्यभिप्रायंतत्रगृह
पाऽभिप्रायाद्विहृते=४ णंयत्रयत्रविहृतोभवतितत्रतत्रैतौप्रतिगरोभवतइत्येवमर्थं।ओथामोदैवमद
मदामोदैवोमथेत्येवमेतौप्रतिगरौ।याज्यांजपेनोपसृजेत्।मिश्रयेदित्यर्थः।तमु
पसर्जनप्रकारंस्वयमेवपठति।एवात्येवापाःपूर्वेषांहरिवःसुतानामेवाहीन्द्रास्र
थोइदंसवनंकेवलंत।एवाहिशक्रोममधिसोमंमधुमंतमिंद्रवशीहिशक्रःसत्रा

सू० प्र० ६ वृषंजठरआवृषस्वेति। लक्षणात एवासिद्धस्य पुनः पाठप्रयोजनं च पदसंधिषु संध्यंय
२८२ दक्षरं तस्याव्यूहेनाप्रकरणे सत्यपि प्रपाठार्थं व्यूहादिन कर्तव्यमित्येवमर्थं। समानमन्य
त्। यायोयं विहृतस्य विशेष उक्तः ततोन्यत्सर्वमविहृतेन समानमित्यर्थः। स्तोत्रियाय
निविदे परिधानीयाया इत्याहावः। अयमपि विहृतस्यैव विशेषः। आहावनियमो
नुरूपतदनंतरयोः प्रतिषेधफलः। तेनाविहृतस्य पंचाहावत्वं भवति। आहृतं षोडशि
पात्रैमितिविशेषणात्। आहृतमिति प्राप्तानुवादः। समुपहावं वचनं ये एतं भक्षयंतिते
षां सर्वेषां परस्परमुपहवयाचनप्राप्त्यर्थं न वषट्कर्तृहोमकर्तैरिव परस्परमितिप्र
दर्शनार्थं। अत्रैते भक्षयितार इत्याह। घर्मे च भक्षियाः। प्रथमं तावेषट्कर्तृहोमकर्ता २८२
रौ घर्मे ये भक्षिणस्ते चेत्यर्थः। मैत्रावरुणस्त्वच्छावाकश्च्छंदोगाः सुब्रह्मण्यवर्जिताः इंद्रश्यो

× समुपहावं भक्षयंति। इदं विहृताविहृतयोः साधारणं षोडशिपात्रे ४

ळशि न्नोजस्विंस्त्वंदेवेष्वस्योजस्वंतंमामायुष्मंतंवर्चस्वंतंमनुष्येषुकुरु। तस्यतइंद्र

पीतस्यानुष्टुप्छंदसउपहूतस्योपहूतोभक्षयामीतिभक्षजपः। एषभक्षमंत्रः। इत्थं

तःषोळशीत्यध्याहारःकर्तव्यः॥३॥ अतिरात्रेपर्यायाणामुक्तःशस्योपायोहोतुरपि

यथाहोत्रकाणां। उक्तःषोळशी। इदानीमतिरात्रउच्यते। तस्मिन्नतिरात्रेवक्ष्यमाणो

विधिर्भवति। तदधिकारार्थमतिरात्रइतिवचनं। वक्ष्यमाणानिद्वादशरात्र्यापिप

र्यायाइत्युच्यंते। तेषामाद्यानिचत्वारिप्रथमःपर्यायः मध्यमानिमध्यमउत्तमान्यु

त्तमइत्येवंनामविशेषःपर्यायाणां। एषांशस्योपायउक्तः। तत्रहोतुर्होत्रकाणांच

२तेषांचराहाना यःसाधारणः नतत्रविधेयमस्तियःपुनर्होत्रकाननुद्दिश्यविहितःशस्योपायःस एषआहावः

नीसादि=२ यथाहोत्रकाणांभवतिहोतुरपितथैवभवतीत्यत्रविधीयते। उक्तग्रहयानुक्तस्ये गतःसवनर

सादि=२

स०वृ०६
२४३

वायमतिदेशोनवक्ष्यमाणस्येत्येवमर्थः।तेननिर्ऋक्सिहोतृसंबंधोनास्तीतिगम्यतेवक्ष्य
माणत्वादिति।प्रथमेपर्यायेहोतुराद्यांवर्जयित्वाप्रत्यृचंस्तोत्रियानुरूपेषुप्रथमानि
पदानिद्विरुक्त्वावस्यंति।प्रथमेपर्यायेयेस्तोत्रियानुरूपास्तेषामाद्यस्याद्यामृचंव
र्जयित्वाअन्यासुसर्वास्वृक्षुप्रथमानिपदानिद्विरुक्त्वातत्रैवावस्येयुरित्यर्थः।पदा
नीतिपादानीत्यर्थः।शिष्टेसमस्यित्वाप्रणुवंति।शिष्टौयौपादौतौसमस्यप्रणवंकु
र्वंति।ऋग्गंतेप्रणवविधानंसमाहार्यत्वादर्धर्चानांसंदेहनिवृत्त्यर्थं।सर्वेसर्वासां
मध्यमेमध्यमानिप्र[illegible]त्यादायऋग्गंतेःप्रणुवंति।प्रत्यृचंस्तोत्रियानुरूपेष्वित्य
नुवर्तते।सर्वइत्युक्तत्तरार्थं।सर्वासामितिहोतुराद्यांवर्जयित्वेत्येतन्निवृत्त्यर्थं।प्रत्या २४३
दायेतिवचनान्मध्यमानिपदानिसकृदुक्त्वावसायतान्येवप्रत्यादायतेऋग्गंतानि

संधायऋग्गतैः प्रणुवंतीत्यर्थः। उत्तमान्युत्तमे। सर्वत इति अत्र संबध्यते। तदत्राछा
वाकसंग्रहार्थं भवति। उत्तमे पर्यायेस्तोत्रियानुरूपेषु सर्वासामृचामुत्तमानिपदा
निसर्वेऽच्छावाकाद्विरुक्तानितैरेव प्रणुयुरित्यर्थः। चतुरक्षराणित्वछावाकः। उत्त
मेपर्यायेऽच्छावाकउत्तमे पादेऽन्ततश्चतुरक्षराणिद्विरुक्त्वाप्रणुयात्। अछा
वाकस्य पादाभ्यासश्चतुरक्षराभ्यासश्चोभयं विधीयते। तत्रार्थाद्विकल्पोभवति
। तत्रतुशब्देन व्यवस्थाविकल्पइत्ययंविशेषउच्यते। यत्रगायत्र्यस्तत्रपदाभ्यासः
यत्रोष्णिहस्तत्र चतुरक्षराभ्यासइति। चतुःशस्त्राःपर्यायाः। उक्तार्थमेतत्। हो
तुराद्यं। शस्त्रंभवतीतिशेषः। त्रिषुपर्यायेष्वेवंभवति। मुख्यत्वादेवहोतुराद्यमे
वभवति। वचनप्रयोजनमाद्यशस्त्रस्यहोत्रासंबंधकरणंतथेतरैरितरेषामिति।

सू० वृ० ६ तेनप्रथमाप्नोते । त्येवमाद्रौ स्वं स्वमेव शास्त्रं शंसुरित्येतत्साधितं भवति । अतिरिक्ते सुचाने
२६८ नक्के मेणाशास्त्रियां शास्त्रसंबंधः सिद्धो भवति । याज्याभ्यः पूर्वे पर्यासाः । याज्याभ्यः पू
244 र्वाणि यानि प्रतीकानि तानि पर्याससंज्ञानि भवंति । पांतमावो अंधसोपाउभिप्रंध
सस्त्यमुवः सत्रासाहमिति सूक्तशेषोभित्यंमेषमध्वर्यो भरतेंद्राय सोममिति याज्या वो ४
प्रवइंद्राय मादनं प्रकृतान्यूजीषिणः प्रतिश्रुतायवोधृषदिति पंचदशादिवाश्वि
दस्येति पर्यासः सनो नव्येभिरिति चास्य मदे सुरुवर्पांसि विश्वानीति याज्या व यमुत्वा
तदिदर्था वयमिंद्रत्वायवोभिवात्रेहत्वाये त्कतमामुक्षरेदिंद्रो अंग महद्भयमभिन्य
सुवा च मस्कधृतस्य हरिवः पिबेहेति याज्येंद्राय मद्वने स्कतमिंद्रमिन्नाथिनो बृहदें २६८
द्रसानसिमेतोन्विंद्रंस्तवामे शानं मानो अस्मिन्मघवन्निंद्र पिबतुभ्यं स्कतो मदाययेति

याज्यायंतइंद्रंसोमोयंतेमानुषेजनउद्दरभीत्कत्तमासुद्धरेरहंसुवमपाय्यस्यांधसोम
हायेतियाज्यात्वंनइंद्रस्कमंतमाप्रद्रवपरावतोनत्वयन्यंवव्राकरमित्तस्त्वावीरवयंतीरहं
द्रांपातास्कतमिंद्रोअस्त्कसोमंहंताहत्रमितियाज्याभित्वाहृषभासुतेभिप्रगोपतिंगि
रात्वंनइंद्रमघगितिसत्केअश्वावतिप्रोग्रांपीतिंवृष्णाइयर्मिसत्यामितियाज्ये दंव
सास्कतमंधइंद्रेहिमत्स्यंधसःप्रसम्राजमुपक्रमस्त्वाभरघ्वतातहस्मैनव्यमस्यपि
बयस्यजत्तानइंद्रेतियाज्येदंत्वयन्वोजसामहाँइंद्रोयऊजसासमस्यमेमन्यवेविशाइति
द्विचत्वारिंशाद्विश्वजितेतिवाहरीरथआसुज्यमानेतियाज्या
वेतानिषीदतात्वशात्रवागाहिनाकिरिंद्रत्वडुत्तरइत्कत्तमासुध
रेश्रृत्तेदधामीदंत्यसात्रमिंद्रपानमितियाज्यायोगेयोगेतवस्तरंयुंजंतिब्रध्नमरुषंय

सू०वृ०६ इंद्राहंमतेमहऊतीशाचीवस्तववीर्यमितियाज्येंद्रःसुतेषुसोमेषुयइंद्रसोमपातमआ
२८५ घायेअग्निमिंधतइतिसप्तदशायइंद्रचमसेष्वासोमःप्रवःसतांश्रोद्रोणेहरयःकर्मा
245 ग्मन्नितियाज्या।अत्रमध्येपर्यासवचनमनुक्तमस्यापिपर्यासत्वसिध्यर्थंपांतमावः
।प्रवइंद्राय।वयमुत्वा।इंद्रायमद्वनेसुतं।अयंतइंद्र।आतूनः।अभित्वावृषभासु
ते।इद्वसो।इंद्रत्वन्वोजसा।आत्वेतानिषीदत।योगेयोगे।इंद्रःसुतेषु।एतेत्रयः
६।रिं पर्यायाः।नकिंद्रत्वेतस्मादग्रहणेपिसूक्तमेवउत्तमामुक्थेरेदितिवाक्यशेषात्।इति
पर्यायाः।इत्येतेपर्यायसंज्ञाभवंतीत्यर्थः।पर्यासवर्जंगायत्राः।छंदोनिर्देशस्तो
मातिशंसनार्थमावापेकर्तव्येगायत्राणामेवावापसिध्यर्थं।।८।।संस्थितेष्वाश्वि २८५
नायस्तुवते।अतिरात्रेइत्यनुवर्तते।आश्विनइतिशस्त्रनाम।पर्यायेषुसमाप्तेषु

छंदोगा आश्विनामशास्त्राथस्तवते। अनेनाश्विनारंभकालो विहितो भवति। शंसिष्य

न्विसंस्थितसंचरे यानिष्क्रम्याग्नीध्रीये जान्वाच्याहुतीर्जुहुयादग्निरज्वीगायत्रेण

छंदसा तमश्यां तमन्वारभे तस्मै मामवतु तस्मै स्वाहा। उषा अश्विनी त्रैष्टुभेन छंदसा

तामश्यां तामन्वारभे तस्यै मामवतु तस्यै स्वाहा। अश्विनावाज्जिनो जागतेन छंदसा ता

वश्यां तावन्वारभे ताभ्यां मामवतु ताभ्यां स्वाहा। बण्महाँ असि सूर्येति द्वाभ्यामिदं

वो विश्व तस्परीति च। शंसिष्यन्निति वचनं प्रतिनिधिप्रवृत्तो यादिशंसेत् तदा जुहु

याद् इत्येवमर्थं। [illegible] विसंस्थितसंचर ग्रहणं संस्थितेष्विति संस्थितशब्देनासं 63

स्थाशंकाप्राप्नोतीति तन्निवृत्त्यर्थं। एताः षडाहुतयः। चशब्दो होमे मंत्रसमुच्चया

र्थः। तेनाज्यशेषप्राशनं तूष्णीमेव भवति। प्राश्याज्यशेषमपउपस्पृशेन्नाचामे

स०वृ० ६ छिद्यते देवरथो वा एष यच्छ्रोतानां समङ्गिः करवाणीति। होमार्थं शृतं यत् तस्य परिशि
२७६ ष्टं यदाज्यं तस्माश्नीयात् प्राश्य च अप उपस्पृशेत्। शुध्यर्थमाचमनं न कुर्यात्। अ
946 नाचमने कारणं तेन श्रुतिरेव दर्शिता। सैषा श्रुतिर्देवरथ इत्यादि। होता देवानां रथ
स्तस्य वक्रं चक्रं जिह्वा अक्षः मम देवरथभूतस्य होतुः रक्षभूतां जिह्वामाज्येन स्व
क्तां नाद्भिः प्रक्षालयामीति श्रुतेरर्थः। अनेन प्रकारेणाशुचित्वमेवात्र नास्तीति ग
म्यते। प्राश्य प्रतिप्रसृप्य पश्चात्त्वस्याधिव्ययस्योपविश्योत्समस्तजंघोरुररत्निभ्यां जा
नुभ्यां चोपरुंध्य कृत्वा यथा शकुनिरुत्पतिष्यन्। प्राश्य प्रतिप्रसृप्येति वचनमस्य प्रा
शनस्याशुचित्वकारणत्वाभावाद् ततः सदस्यपि प्राशनमविरुद्धमिति प्रसृप्यापि २७६
प्राश्नीयादिति तन्निवृत्त्यर्थमुच्यते। पश्चात्त्वस्याधिव्ययस्येति वचनं प्रातरनुवाक

न्यायविधानात्सविर्यानउपवेशनाशंकानिवृत्त्यर्थं। जंघाचऊरुश्चजंघोरु। प्राण्यंग
त्वादेकवद्भावः। जंघोरुजंघोरुचेतिजंघोरुणीतेसमस्तेयस्यसः समस्तजंघोरुः।
एवंभूतोरत्निभ्यांजानुभ्यांचोपस्थकृत्वाभूमिमाश्रित्येत्यर्थः। पादांगुलीभिश्चभूमि
माश्रित्यैवमुपविशेत्। एवमुपविष्टः शकुनिरिवोत्पतिष्यन्भवति। एतदासनंशस्त्रा
दौयआहावस्तउच्चारणसमकालमेवनोपरिष्टात्। एतत्तुशकुनिरिवोत्पतिष्य
न्नाक्रमीतेतिश्रुतिवचनाल्लभ्यते। उपस्थकृतस्त्वेवाश्विनंशंसेत्। उपस्थकृतइति
यथाप्रकृत्युपविष्टइत्यर्थः। आश्विनाधिकारेपुनराश्विनग्रहणंआहावादूर्ध्वंस
र्वमाश्विनंउपस्थकृतएवशंसेतइत्येवमर्थं। तेनशकुनिरिवोत्पतिष्यन्निति वचनं
प्रथमाहावस्यैवनपरिधानीयाहावस्येत्यवगम्यते। अग्निर्होतागृहपतिः सराजेति

सू० वृ० ६ प्रतिपदेकपातिनीपच्छः। प्रतिपद्वचनं ब्राह्मणोक्तस्य प्रतिपदं तरस्यानिवृत्त्यर्थं। एषैव प्र
२८७ तिपद्भवतीति। प्रतिपद्वचनात्तृचत्वार्थर्चशंसनप्राप्तौ तन्निवृत्त्यर्थमेकपातिनीपच्छ
इत्युच्यते। एतयाग्नेयं गायत्रमुपसंतनुयात्। एतया प्रतिपदा प्रातरनुवाकार्थस्य स
माम्नायस्याग्नेयं गायत्रं यत्तदुपसंतनुयात्। तेनापोरेवतीरिति इयमृङ्न भवति। आ
ग्नेयमित्येतावतैव सिद्धे गायत्रमितिवचनमाग्नेयस्य गायत्रस्य कृत्स्नस्य शंसनार्थं।
प्रातरनुवाकन्यायेन तस्यैव समाम्नायस्य सहस्रावममोदेतोः शंसेत्। प्रातरनुवाक
न्यायेनेति सप्तछंदः सूक्तग्रहणं नान्यैराग्नेयं गायत्रं यथास्थानं कृवाणि मांगला
निईळेघावीयमावर्तयेदा तमसोपघातादित्येवमादिः शस्याविषयो न्यायोतिदिश्य २८७
ते। न कर्तृविषय उत्सर्पणादिः। स्वरस्तु तृतीयसवनत्वात् उत्तम एव। तस्यैव समाम्ना

म

यस्येतिप्रातरनुवाकार्थस्येत्यर्थः।सहस्रावँमितियस्यशास्त्रस्यऋचांसहस्रमवमामा
त्रातत्सहस्रावममित्युच्यते।तदुदयास्तागेवशंसेत्।उदयोनामादित्यमंडलदर्शन
मात्रमदर्शनंअनुदयः।तेनात्राभिविधेरसंभवान्मर्यादैवगृह्यते।तेनोदितेयछस्य
तद्वर्जयित्वैवसहस्रावममित्युक्तंभवति।बार्हतास्त्रयस्तृचाःस्तोत्रियाःप्रगाथावाता
न्पुरस्तादनुदैवतंस्वस्यछंदसोयथासूक्तंशंसेत्।बार्हताबृहतीछंदस्कानामतेत्रय
स्तृचाअग्न्युषोश्विदैवत्याःसंधिसाम्नःस्तोत्रियाश्छंदोगैःक्रियंते।बार्हतावाप्रगाथा
स्तांस्तृचान्प्रगाथान्वायथादेवतंबृहतीछंदसःपुरस्ताद्यथासूक्तंशंसेत्।सर्वमन्यद्य
थाम्नातमित्यनेनैवसिद्धेपुनर्यथासूक्तवचनमत्राम्नातानांयथाम्नातत्वेनस्वस्यछं
दसःपुरस्ताद्यथादेवतंशस्तानांपुनःस्वस्थानेशंसननिवृत्त्यर्थं।येष्वान्येषु।अन्ये

सू०ट्टि०६ षुवायेषु केषुचिच्छंदःस्वयदिस्तृयुः तथापियथादैवतंस्वस्यछंदसएवपुरस्ताच्छंसेयुरि
२४८ त्यर्थः। पच्छोद्विपदाः। द्विपदाः पच्छः शंसेत्। अत्रद्विपदानांबहुत्वासंभवात्सर्वार्थोयंविधि
रित्यवगम्यते। उपसंतनुयादेकपदाः। एकपदाः पूर्वेणप्रणवेनोपसंतनुयात्। ताभ्य
श्चोत्तराः। ताभ्यएकपदाभ्योयाउत्तराऋचः ताश्चएकपदांतगैःप्रणवैरुपसंतनुया
त्। एकपदानामप्यत्रबहुत्वासंभवादयमपिविधिःसर्वार्थएव। एकपदानांप्रातरनु द्विपदा ८
वाकेदृष्टस्योपसमासस्यापवादार्थोयंयत्नः। विछंदसउद्धरेत्। विछंदसोविरुध्यधा
स्यछंदसः ताश्चैवंप्रकारावेदितव्याः। अर्धर्चशस्येषुपच्छःशस्याः। पच्छःशस्येषुचा
र्धर्चशस्याइतिताउद्धरेत्। अपिवातन्यायेनशंसनं। अपिवानैवोद्धारःकर्तव्यः त २४८
न्यायेनशंसनमुद्धरोवेतिविकल्पइत्यर्थः। एवंविकल्पेप्राप्तेअर्धर्चशस्यगतानां

248

पष्ठःशस्यानांसूक्तन्यायेनार्धर्चशंसनमविरुद्धंक्वचिद्दृष्टपूर्वत्वादिति।तत्रोद्धारन्या
यशंसनयोर्विकल्पउपपद्यते।एवंपष्ठःशस्यगतानामपिअर्धर्चस्यानामुद्धारपष्ठः २।२
शंसनयोर्विकल्पेप्राप्तेतंनिवृत्त्यर्थमाह।नतुपष्ठोन्यास्त्रिष्टुप्जगतीभ्यः।अत्रायंवि
२। शेषः।पष्ठःशस्यगतानामर्धर्चस्यानांपष्ठःशंसनेकर्तव्येत्रिष्टुप्जगतीभ्योन्यायात्र्यृ
चस्त्रिष्टुप्जगतीसूक्तमध्यगतास्ताःपष्ठोनशंस्तव्याइत्यर्थः।कथंतर्हितासांकर्तव्य
मितिउद्धारस्तच्छंदोन्यायेनवाशंसनं।एतदुद्धारवचनंसूक्तन्यायशंसनवचनंचाश्वि
नएवशास्त्रे।अन्यत्रसर्वत्रतच्छंदोन्यायशंसनमेवेतिसिद्धं।विच्छंदसउद्धरेत्।अपि
वातन्यायेनशंसितिनं।एवंवानयोःसूत्रयोरर्थः।प्रातरनुवाकार्थेसमाम्नायेगायत्र्यादि
वचनेष्वसत्स्वपितासांस्वरूपतएवगायत्र्यादित्वेसिद्धेपुनर्गायत्र्यादिवचनमाश्विने

स०वृ०६ गायत्र्याद्यंतर्भूतानामन्यछंदसामुद्धारार्थमिति मन्यमानो विछंदसऋक्सूक्तानाचार्यः
२८६ स्वयमेव। एवं प्राप्ते आह। अपि वा तन्न्यायेन शंसनं। अपि वेति पक्षव्यावृत्त्यर्थः। नैव गाय
त्र्यादिवचनादेवोद्धारः कर्तुं शक्यते। तत्र प्रकरणे उद्धारवचनाभावात्। गायत्र्यादि
वचनस्य श्रुत्यनुवादत्वेन प्रापकत्वसंभवाच्च। अतस्तासां तन्न्यायशंसनं कर्तव्यं।
तत्र यासां सूक्तन्यायशंसनमुपपद्यते तासां तथा भवति। यासामेवं न संभवति तासां
छंदोन्यायशंसनमिति सिद्धं भवति। पांक्तेनोदिते सौर्याणि प्रपद्यते। उदित आदित्ये प्र
ति प्रियतमामित्यस्योत्तमेन प्रणवेन सूर्यो नो दिव इत्येतत्संधाय तदादीनि सौर्याणि
सूक्तानि शंसेदित्यर्थः। उदिते सौर्याणीत्यनेनैवास्मात्प्राक्तनमुदयात्प्रागेवेति सिद्धे २८३
यदादेतोः शंसेदिति वचनं तस्यैतत्प्रयोजनमोदेतोः शंसेद्वनो परमेदिति। तेनैवं

घावीयावर्तनेनान्येनवाओदयादनुपरमनुशंसेत्। अयमेवार्थोभगवतापस्तंबेनोक्तः।
यस्याभिविनेशस्यमानेसूर्योनाविर्भवतिसर्वाअपिद्राशतयीरनुब्रूयादिति। सौर्याणीति
वचनमेषांचतुर्णांसूक्तानांसौर्याणीतिसंज्ञाकरणार्थं। तेनैतानिदिवैवाध्येतव्यानि
। सौर्याणीत्यक्ते एतान्येवमन्येतव्यानिचेति। सूर्योनोदिवउदुत्यंजातवेदसमितिनव
चित्रंदेवानांनमोमित्रस्य। इंद्रक्रतुंनआभराभित्वाशूरनोनुमोबहवःसूरचक्षसइति
प्रगाथाः। महीद्यौःपृथिवीचनस्तेहिद्यावापृथिवीविश्वशंभुवा। विश्वस्यदेवीमृचयस्य
जन्मनोनयारोषातिनग्रभदितिद्विपदाः। द्विपदावचनंपच्छःशंसनार्थं। बृहस्पतेअति
यदर्योअर्हादितिपरिधानीया। परिधानीयावचनंविस्पष्टार्थं। प्रतिपदेपरिधानीया
याइत्याहवः। प्रतिपद्यप्राप्तआहावोविधीयते। अनुचराभावात्तृचलाभावाच्चनेयं

सू० वृ० ६ लाक्षपिकाप्रतिपत्। परिधानीयाया विधानं प्रगाथस्तोत्रिये प्वाहावनि वृत्यर्थो। बृहत्सा
२५० मचेत्तस्ययोनिं प्रगाथे षुद्दितीयां तृतीयां वा। संधिस्तोत्रे रथंतरं सामेत्कत्सर्गः। तत्र यदि
बृहत्सामकुर्युस्तदा तस्य बृहतो योनिं त्वामिद्धि हवामह इति दृचमेतेषु प्रगाथे षु द्वितीया
यामिंद्र क्रतुमित्यस्योपरिष्टात्तृतीयामभित्वेत्यस्योपरिष्टादित्यर्थः। एतयोरन्यतरास्मि
न्कमेशंसेत्। न वा। कृतेपि बृहत्सामनि बृहतो योनिं शंसेदित्यर्थः। आश्विनेन ग्रह ७५
पासपुरोळेन चरंति। आश्विनेनेत्याश्विदेवत्येनेत्यर्थः। ग्रहे योति प्रदर्शनार्थं। ग्रहेण
वा चमसेन वा सपुरोळाशेन चरंतीत्यर्थः। इमे सोमास स्तिरोअह्न्यास स्तीव्रास्तिष्ठंति
पीतये युवभ्यां। हविष्मता नासत्या रथेनायातमुप भूषतं पिबध्याइत्यनुवाक्या होता २५०
यक्षदाश्विना सोमानां तिरोअह्न्यानामिति प्रैषः प्रवामंधांसि मद्यान्यस्थुरुभा पिबत

मश्विनेतियाज्येअध्वर्युर्धामनवानं।अत्राच्छचोरेवद्वित्वंनयाज्याकार्यस्य।अत्राश्वि
नेनेतिदेवताविधानंनेयंशस्त्रयाज्येतिज्ञापनार्थं।यद्येतस्यपुरोरुक्शास्यास्त्विष्टकृ
ताचरेयुः।पुरोरुक्अग्नेपचतोग्नेवृधानआकृतिमितिसंयाज्ये।इत्यंतोतिरात्रश्तिशे
षः॥५॥यदिपर्यायानभिशुच्छेत्सर्वेभ्यएकंसं रेयुः।एवंतावच्चतुर्विधःसोमयागो
ज्योतिष्टोमाख्यउक्तः।तस्यैवविशेषमुपरिष्टाद्वक्ष्यति।अत्रांतरालेपर्यायाश्विन
प्रसंगेनतेषांनैमित्तिकमपिवक्तुंप्रारभते।यदिपर्यायानभिशुच्छेदिति।अस्यायमर्थः।
यदासर्वेपर्यायाःप्रयुक्तानभवंति।यद्येवमाशंकास्यादतिक्रांतमायारात्रिःसापर्या
याणामाश्विनस्यचापर्याप्तेतितदासर्वेभ्यःपर्यायेभ्यःएकंपर्यायंसंभृत्यकुर्युरित्य
र्थः।एतमेवार्थंविवृणोति।प्रथमाद्धोताद्वितीयान्मैत्रावरुणोब्राह्मणाछंसीचोत्तमा

स०वृ०६ दच्छावाकः। प्रथमात्पर्यायाद्धोता स्वं शस्त्रमाददीत। मैत्रावरुणब्राह्मणाच्छंसिनौ द्वितीयात्स्वे
२५१ शस्त्रे। उत्तमादितरः स्वमेव शस्त्रमिति। द्वौ चेद्द्वौ प्रथमाद्द्वा उत्तमात्। प्रथमः पर्यायः प्रयुक्तः
मध्यमोत्तमा व प्रयुक्तौ तयोराश्विनस्य चापर्याप्ता रात्रिरित्याशंकायां तदैवं कुर्युः। द्वौ हो
तृमैत्रावरुणौ प्रथमाद्ब्राह्मणाच्छंस्यच्छावाकावुत्तमादिति। अत्र प्रथमादिति वचनम
प्रयुक्तयोरेव प्रथमान्मध्यमादित्यर्थः। अत्र द्वयोरधिकृतत्वाद्द्वित्व...स्य द्वितीयत्वेप्युत्त
मशब्दप्रयोगादन्यत्रापि द्वयोरंत्यस्योत्तमत्वं साधितं भवति। तेनान्यत्राह्न उत्तमादित्य
यं विधिर्द्विरात्रे ध्यं तेभवन्ति। अपि वा सर्वे स्युः स्तोमनिर्कृत्ताः। अपि वा सर्वे स्तोमानिर्कृ
त्ता भवेयुः न संभरणमिति। सर्ववचनं पूर्वोक्तयोर्द्वयोरभिस्तुष्ट्योः संभरणनिवृत्त्यर्थः। २५१
अयं स्तोमनिर्कृत्सो होत्रकाणामेव भवति। न होतुरित्यर्थः। उक्तः शस्त्रोपाय इत्यत्र उक्तेय

भव १

निर्ऋ्त्सा० ह्येनेनस्तोमँइत्येनेनैताद्विधीयते पूर्वंपंचदशस्तोमाः संतः पंचदशस्तोमाभुवेयुरिति। हो
तुस्त्कपंचदशस्तोमाएवसर्वत्रस्तोमनिर्क्रोसेसत्येवंशास्यनिक्रासइत्याह। ऊर्ध्वस्तोत्रिया
नुरूपेभ्यः प्रथमोत्तमांस्तृचांछंसेयुः। स्तोत्रियानुरूपास्तावद्यथापूर्वंभवंति। तेभ्यऊर्ध्वं
यच्छस्यमस्ति तस्यादितस्तृचान्निर्ऋ्त्सोयुरंततश्च। एवंचत्वारस्तृचाभवेयुः। एतत्समाया
निहोत्रकशस्त्राणिभवेयुः। होतुस्तुपूर्ववदेव। निर्क्रासएवैकस्मिन्। पूर्वयोरभिप्लुष्योः
संभरणानिर्क्रासयोर्विकल्पउक्तः। अत्रसंभरयोसंभवेनिर्क्रासएवैकोविधीयते। अव स्मा
धारणवचनंअस्मिन्पक्षेनिर्क्रासएवअसाधारणोधर्मइतिज्ञापयितुं। तेनोत्तरसू
त्रेविहितं। तेनोत्तरसूत्रेविहितंहोतृवर्जनंसर्वास्वभिप्लुष्टिषुसाधारणंभवतिनानं
तरायामेवाभिप्लुष्टो। होतृवर्जमित्येके। एकेशाखिनोहोतृवर्जमेवनिर्क्रासंकुर्वंति॥

स०वृ०६ आश्विनायैकस्तोत्रियोग्नेविवस्वदुषस इति। इदं चाभिव्युष्टिनिमित्तमेव। तं पुरस्तात्स्तु
२५२ दैवतं स्वस्य छंदसो यथास्क्तं शंसेत्। तं स्तोत्रियमाग्नेयक्रतोर्बृहती छंदसः पुरस्तात्स
क्रुछंसेत्। अनुदैवतमिति नात्र वीप्सा विवक्षिता। यथास्क्तमिति पूर्ववदेव। त्रीणि ष
252 ष्टिशतान्याश्विनं। आश्विनोद्देशेनास्याः संख्यायाः विधानात्सति पन्मांगतसोर्यादि
नि च तस्यामेव संख्यायामंतर्भवंतीत्यवगंतव्यं। प्रायश्चित्तप्रसंगादन्यान्यपि सोम
प्रायश्चित्तान्यत्रैवोच्यंते। विमतानां प्रसवसंनिपाते सं[illegible]सवो नं तर्हि तेषु न द्यावा
पर्वतेन वा। विमता विरुद्धमतयः। विद्विषाणा इत्यर्थः। प्रसवशब्देन सुत्या लक्ष्य
ते। न द्यावापर्वतेन वा। अव्यवहिते देशे विमतानामेकस्मिन्नहनि सुत्यासंनिपाते स २५२
ति संसवो नाम दोषो भवतीत्यर्थः। न द्यावापर्वतेन वेत्युभयत्र वाशब्दप्रयोगादन्यदपि

व्यवधायकं शास्त्रांतरोक्तमस्तीति गम्यते तच्च शास्त्रांतरादवगंतव्यं। अप्येकं तर्हि तेष्व
पि। विमतानां न घ्यादिभिरनं तर्हि तेष्विति च विशेषणाद्व्यमुक्तं तदुभयव्यभिचारायअ
पि शब्दद्वयेन संमतानामपि संसवदोषो स्तीत्येकोर्थः। अं तर्हि तेष्वपि देशेणुसंसवोस्ती
त्यपरोर्थः। एवमेके शाखिन आमनंतीत्यर्थः। तथा सति संत्वरादेवतावाहनात्। एवं स
तिआसवने देवतानामावाहनात्संत्वरा कर्तव्या। एतदंतं कर्मकायिकं वाचिकं च द्रुतया
वृत्त्या कर्तव्यमित्यर्थः। लघवश्चोपायाः शातप्रभृत्यादयः प्रयोक्तव्याः किंच। कयाशुभे
ति च मरुत्वतीयपुरस्तात्सूक्तस्य शंसेत्। इदं च तस्मिन्निमित्ते कर्तव्यं। मरुत्वतीयेशास्त्रे
यस्मिन्सूक्ते निवि धीयते तस्य सूक्तस्य पुरस्तादिदं सूक्तं शंसेत्। चशब्दो निविधानी
यत्वसमुच्चयार्थः। तेन तस्य मरुत्वतीयस्य पूर्वावस्थायामेकसूक्तत्वेनेकं चेत्तस्य मेषा

ऋ०वृ०६ हावइत्ययमाहावः कयाशुभीयादौ भवति। द्वित्र्यादिसूक्तत्वे कयाशुभीयस्यानाद्यत्वात्तस्या
२५३ दौ न भवति। तत्र सर्वेषामाद्ये भवति आहावः। योजात एवेति निष्केवल्ये। चशब्दः पुरस्ता
त्सूक्तस्येति चानुवर्तते। तेनात्रापि पूर्ववद्देवार्थो योजनीयः। ममाग्ने वर्च इति वैश्वदेव
253 सूक्तस्य। अत्रापि पदत्रयमनुवर्तते। वैश्वदेवशस्त्रे वैश्वदेवसूक्तस्य पुरस्तादित्यर्थः।
अपि वैतेष्वेव निविदो दध्यादुद्धरेदितराणि। अपि वा एतेष्वेवागंतुषु निविदो दध्यात्।
येभ्यः पुरस्तादिमानि सूक्तानि विहितानि तान्युद्धरेत्। सर्वेषां निविद्धानसूक्तानामुद्धा
रसंयोगेनैतेषु निविदो दध्यादिति यद्धि दधाति तत्स्थापयति यस्मिन्निविद्धीयते तस्या
व्यवधानेन पुरस्तादेतानि भवंति न निविद्धानीयानां पुरस्तादिति। स्थानं चेन्निविदोऽति
हरेन्माप्रगामेति पुरस्तात्सूक्तं शस्त्वान्यस्मिंस्तद्देवते दध्यात्। निविदः स्थानं यद्यतिहरे २५३

तद्दा यस्मिन्सूक्ते निविद्दति पन्नात तत्सर्वोपरभूतं समाप्यागंतुकात्तद्देवतात्पुरस्तान्मा
प्रगामेतीदं सूक्तं अखंडितं शस्त्वान्यस्मिन्नागंतुके तद्देवते तां निविदं दध्यात्। निविद
स्थानातिहारो नामैवंरूपः। सूक्तस्य यस्मिन्नंतराले निविधीयते तस्माद्यावत्सर्वा ऋक्कृत
दंतगते न प्रणवेनाहावमकृत्वैवानंतरामेव ऋचं संधाय तस्यामृचि चोदितेवसानेव
सानपर्यंतमुक्त्वा यद्दावस्येत्। एवं प्रकार एव निविद्दतिहारो नान्यप्रकार इति।
अतोन्यथा यः प्रमादः स ऋग्दोष एव न निविद्दतिहारः। पुरस्ताद्वचनं माप्रगामीयस्य
पुरस्तादिति पंचनिविद्युक्तं समाप्य माप्रगामीयं शस्त्वान्यत्तद्देवतमानीय तस्मिन्निविधी
येत्येवमर्थः। सूक्तग्रहणं बृहस्पतिसवादिष्वपि हीनस्तोमे। पुमाप्रगामीयस्याखंडना
र्थं। अत्र किंचिदुच्यते। यदि पर्यायानित्यत्र पर्यायानिति कर्मप्रवचनीययुक्ते द्वितीया॥

स्०सू०६ अभीतिकर्मप्रवचनीयो लक्ष्यलक्षणसंबंधद्योतकः। उछ्छिविवासे पूर्वः। संभावनायां लिङ्
२५४ । अत्र पर्यायालक्षणं व्युष्टिर्लक्ष्या। एतदुक्तं भवति। यदि पर्यायोपक्रमे तेषु वाशस्यमा
नेषु उषःकाल आगछेत्तदा वक्ष्यमाणं नैमित्तिकं कर्म कर्तव्यमिति॥६॥ सोमातिरेके
254 स्तुतशस्त्रोपजनः। सोमातिरेको नाम सवनार्थो यः सोमः स सवने परिसमाप्ते यद्यति
रिच्येत। तदा सोमातिरेक इति उच्यते। तदा स्तुतशस्त्रयोरुपजनो भवति। छंदोगैः स्तो
तव्यमस्माभिः शंस्तव्यमित्यर्थः। प्रातः सवने त्ति सोमो अयं स्तुतो गोर्थयातिमरुतामि
ति स्तोत्रियानुरूपो महाँ इंद्रो य ओजसा तो देवा अवंतु न इत्यैंद्राभिर्वैष्णावीभिश्च स्तोम
मति शस्यैं याय जेत। पादग्रहणे पैंद्राभिर्वैष्णावीभिश्चेति बहुवचननिर्देशाद्यावदर्थ २५४
मुभय्यो गृहीतव्याः। ऐंद्राभिर्वैष्णावीभिश्चेति शब्दसामर्थ्यात्समुच्चिताभिरेवोभयीभिः

सोमातिरेकनिमित्तं स्तोममतिशस्यएकया द्वाभ्यां वा प्रातःसवने परिमिँरुत्तरयोः सवनयो लाभि॰
रित्सनेनन्यायेन। ययाकयाचिदैंद्र्या गायत्र्यायजेत्। प्रातःसवनत्वाज्ञायत्र्येति विशेष्यते।
वैष्णव्या वा। गायत्र्येतिशेषः। ऐंद्रावैष्णव्येति गायागारिदैंवतप्रधानत्वात्। यद्यैंद्र्यावैष्ण
व्यावायजेत तदायथावावषट्कारमेवं याज्येत्येतद्विरुध्येताथ यद्यैंद्र्या वैष्णव्यावायजेतत
दातद्देवत्यायाः गायत्र्यायाः अभावात् गायत्रं प्रातःसवनमित्येतद्विरुध्येत तत्रैकस्यूता
गेसातिछंदएवसक्तव्यं। बहिरंगत्वाप्राधान्यात्तस्येति देवतायास्त्वभिधेयत्वादंतरंगते
तिमन्यमानोगाणगारिदैंवतप्रधानत्वादित्युक्तवान्। सेवांकर्मणासमिषाहिनोमीति
। सेषाऐंद्रावैष्णवी त्रिष्टुप्। अनयैवयष्टव्यमितिसिद्धांतितं। माध्यंदिने वण्महाँअसि
सूर्येउत्यद्दर्शतंवपुरिति प्रगाथौ स्तोत्रियानुरूपौ। महाँइंद्रोनृवदिष्णोर्नुकं या विश्वा

सू० वृ० ६ सांजनि ताराम तीनामिति याज्या। ऐंद्राभिर्वैष्णावीभिश्चेत्याद्यत्राप्यनुवर्तते। अतो हीनपाद
२५५ ग्रहणमत्राक्षरलाघवार्थमेव न कृत्स्नसूक्तग्रहणार्थं। तृतीयसवन उत्तरोत्तरां संस्थामु
पेयुरातिरात्रात्। तृतीयसवने यदि सोमो तिरिच्येत तदा उत्तरोत्तरां संस्थां कुर्युरातिरात्रा
त्। एतदुक्तं भवति। यद्यग्निष्टोमे तृतीयसवने तिरेकः स्यात्तदोक्थ्यं कुर्युः। यद्युक्थ्ये षो
ळशिनं। यदि षोळशिन्यतिरात्रमिति। यद्यतिरात्रे तत्र वक्ष्यतीति। एवं चेदातिरात्रादि
तिवचनमुत्तरोत्तरां संस्थामित्यत्र संनिहिता एव च तस्र्यः संस्थागृह्यंत इत्येवमर्थं।
इतरथाग्निष्टोमेतिरेके त्यग्निष्टोमः प्रसज्येत। षोळशिनि वाजपेयः। अतिरात्रे प्तो
र्याम इत्येतं निवृत्त्यर्थमातिरात्रादित्युक्तं। अतिरात्राच्चेत्स्तत्तत्त्वे अद्याशिपिविष्टनाम २५५
प्रतद्विष्णुस्तवते वीर्येणेति स्तोत्रियानुरूपो माध्यंदिने न घोषः। महाँ इंद्रो नृवदित्या

द्वियाज्यांतः शेष इत्युच्यते। त्वेषमित्थासमरणंशिमीवतोरिति वा याज्या। इयं वा याज्या
माध्यंदिनोक्ता वा भवति। अत्यग्निष्टोमवाजपेयाप्तोर्यामेषु तृतीयसवनेषु सोमाति
रेके इदमेव शस्त्रं भवति। सोमातिरेकादन्येन वा निमित्तेन शास्त्रांतरोक्तेन यदि स्तुतश
स्त्रोपजनः स्यात्तदा यथेनैनैव सोमातिरेकोक्तेनानुसवनं शस्त्राणि संपादनीयानि॥
स्तोत्रियस्तु स्त एव तदनुसारेणानुरूपः कल्पनीयः। एतच्च सोमातिरेके प्रातःसवने
स्ति सोम इत्येतावतैवास्यार्थस्य सिद्धौ सत्यां शस्त्रोपजन इत्यस्माद्वचनाल्लभ्यते। एत
दुक्तं भवति। यत्र यत्र नैमित्तिकः शस्त्रोपजनस्तत्र तत्रानुसवनमेतेन विधानेन शस्त्रा
णि कल्पनीयानि। स्तोत्रियानुरूपौ छंदोगप्रत्ययतदनुसारकल्पनाभ्यामिति॥ ७॥ क्री
ते राजनि नष्टे दग्धे वा। प्रायश्चित्तं वक्ष्यत इति शेषः। नष्ट इत्युक्ते नाशप्रकारविशेषा

ग्रहणात्सर्वप्रकारोनाशोग्रहीतोभवति। किमर्थं दग्धवचनमिति। तस्य प्रयोजनमु
च्यते। लतावस्थे सोमे द्वादशाभ्यो वसाशुकादिभ्यो मलेभ्योन्येन केशकीटादिना दुष्टे
तस्य त्यागो न कर्तव्य इत्येवमर्थं। अन्यदपि दग्धवचनप्रयोजनमस्ति। केचिदेवं व
दंति दग्धे सोमे तदेव भस्माभिषुत्य तेन यष्टव्यमिति तन्निवृत्त्यर्थं चेति। सोमनाशे प्रा
यश्चित्तं वक्तुं प्राप्ते सद आदीनां शालानां दाहे प्रायश्चित्तस्याल्पत्वात्तदेव प्रसंगादाह
। अपि दग्धानि सदोहविर्धानान्यनादृता क्रियेरन्। अनादृता अमंत्रकमित्यर्थः॥

भसमंत्रकं वे
त्यर्थः ३

आदृता वान्यायविकल्पोयं। शालास्तावद्दृष्टार्थाः। तेनास्य मंत्रव्यापारः केवलम
दृष्टार्थ एव। तस्यादृष्टार्थस्याश्रयभूता शाला प्रधानसंबंधेऽक्षारभूतेत्यर्थः। सचक्षा
रभावोदाहासांगेवनिर्दृत्तशतिनपुनः क्रियामंत्राणामिति पूर्वः पक्षः। उत्तरस्त्वप

अर्थात्तदभिषवे सिद्धेऽपि पुनर्वचनमभिषुणुयुरेव न क्रयादिसंस्कार इति सिद्धं। = ८

क्षोयत्कार्यार्थं यद्द्रव्यमुपादीयते तस्य तत्कार्यजनने सामर्थ्यजननाय मंत्रादयः संस्काराः प्रयुज्यंते। तद्यदि स्वकार्यमकृत्वैव नश्येत्तदा तत्त्वकः कथं प्रधानेन संबध्नीयादिति पुनरपि मंत्राः प्रयोक्तव्या इति सिद्धं। इदानीं सोमनाशे प्रायश्चित्तमाह। अन्यं राजानमभिषुणुयुः। अन्यं राजानमानीय तमभिषुत्य तेन यजेतेत्यर्थः। अनधिगमे पूतीकान्फाल्गुनानि। सोमानधिगमे पूतीकान्फाल्गुनानि च संसृष्टान्यभिषुणुयुः। पूतीका नामलतारूपाः सोमसदृशाः। फाल्गुनानि नाम स्तंबरूपा ओषधिविशेषाः अप्रसिद्धाः पदार्थाः अभियुक्तेभ्यः शिक्षितव्याः। अन्या वा ओषधयः पूतीकैः सह। फाल्गुनानामभावे अन्या वा ओषध्यः कुशादूर्वाद्याः पूतीकैर्मिश्रयित्वाभिषोतव्याः। अन्या ओषधयः पूतीकैः सहेति पूतीकानां स्थायित्वदर्शनात्सर्वसूत्रोक्तामेभिः सहितानामेव वा पूतीकानामनधिगमे फाल्गुनानि न समुच्चयः। उत्तरसूत्रेऽपि लब्धानां पूतीकानां सामर्थ्याभावे न्या ओषधयो ग्राह्या इत्यर्थः इति सिद्धं। तत्रापि।

स्क० वृ० ६ तिनिधित्वमवगम्यते। अत एवाचार्याः सोमप्रतिनिधौ न केवलमेकद्रव्यमिच्छंति। अन्या
२५७ वाऽऽपधयः पूतीकैरिति सहभावे सिद्धे यत्सहेति वचनं तज्ज्ञापयति पूतीकानामप्य
भावे द्रव्यांतराणि सह मिश्रयित्वाभिषुत्य तैर्यष्टव्यमिति। प्रायश्चित्तं वा कृत्वोत्तरमा
257 लभेत। उत्तरसूत्रस्य सकलाविषयत्वादिदं दीक्षोपसद्विषयं भवति दीक्षासु क्रीते
नश्येद्वा सोमलाभाद्दीक्षा वर्धयेत्। उपसत्सूपसदो वर्धयेत्तत्र सर्वत्र प्रधानकाला
विरोधेनाहर्वर्धनं कर्तव्यं। अहर्वर्धने क्रियमाणेऽपि प्रधानकालाविरोधेनालभ्य
माने प्रतिनिधिमुपादाय पूर्वसंकल्पितकाले प्रधानयागं संपादयेत्। इत्थं वा कुर्या
त्। प्रायश्चित्तं कृत्वारब्धं प्रयोगं विसृज्य सोमं संपाद्य तस्मादेव कर्मणो प्रयोगांतरमा य २५७
रभेत। भक्ष्याहेतीदं प्रायश्चित्तमित्यु(च्य)ते। अथवास्याम अवरुद्धायां शास्त्रांतरे प्रायश्चि

त्तविशेषोस्ति चेत्तत्कर्तृ। ऋत्व्यास्तत्कमेव मन्येत। ऋत्व्यास्फन ष्टे राजनि तद्दलाभेऽप्यृक्तमेव।
प्रतिनिधिप्रयोगमेवेत्यर्थः। तत्कर्तव्यत्वेन मन्येतेत्यर्थः। नात्राह दृष्टिः प्रयोगत्यागो
वा कर्तव्य इत्यर्थः। प्रतिधुक् प्रातःसवने। प्रतिधुगिति स योऽदुग्धं पय उच्यते। तत्प्रातः
सवने प्रतिनिधिद्रव्यमभिषुत्य तद्रसेनाभिश्रयेदित्यर्थः। शृतं माध्यंदिने। क्वथितं प
यः शृतमित्युच्यते। तेन मध्यंदिने प्रतिनिधिद्रव्यरसं श्रीणीयात्। दधि तृतीयसवने।
पूर्ववदभिश्रयेदित्यर्थः। श्रायंतीयं ब्रह्मसाम यदि फाल्गुनानि वारवंतीयं यज्ञायज्ञी
२८७ यस्य स्थाने। यदि फाल्गुनानि प्रतिनिधित्वेन प्रविष्टानि तदैते सामनी श्रायंतीयवारवं
तीये ब्रह्मसामाग्निष्टोमसामकार्ययोर्भवतो यथासंख्येन। श्रायंतीयमेके। एके शाखि
नः श्रायंतीयं यज्ञायज्ञीयस्य कार्ये भवतीत्याहुः। ब्रह्मसाम तु प्रकृत्यैवेति। एक दक्षि

उद्वसायतदानीं दीक्षेत पूर्वपक्षोत्तरायणादिकालं नापेक्षेतेति सिद्धांतभाष्ये =१

सू० ३० ६ । णं यत्तं संस्थाप्योद्वसायपुनर्यजेत । एवं प्रतिनिधिना क्रियमाणं मन्त्रप्रयोगमुद्वसानीया
२५८ पर्यंतं समाप्य तस्माद्देशादुद्वसाय सोमं संपाद्य तमेव यज्ञं पुनः प्रयुंजीत । तस्मिन्सर्वस्य
दक्षिणां दद्यात् । तस्मिन्पुनः प्रयोगे ता दक्षिणा दद्यात् । यत्संख्याकाः पूर्वस्मिन्प्रयोगे सं
कल्पितास्तत्संख्यका एव दद्यात् । न वैकल्पिकसंख्यांतरयुक्ता इत्यर्थः । पूर्वस्मिन्प्रयोगे
एकैव गौर्दक्षिणा । सोमाधिगमे प्रकृत्या । यद्युपात्तेपि प्रतिनिधौ यागात्प्राग्यदि सोमो
लभ्येत तदा प्रतिनिधिद्रव्यं त्यक्त्वा सोमेनैव यष्टव्यं । प्रतिनिधिनिमित्तानि सोमस्याय
पानि च न भवंति । एतच्चैकाहेषु । अहर्गणेषु तंत्रमध्ये उद्वसायपुनर्यागो न शक्यते कर्तु
मिति । सर्वाहः साधारणत्वात्प्रयोगस्य । यदा पुनरहर्गणेषु मुख्यसंभवात्प्रतिनिधिनै २५८
वैकमहः क्रियते तदा सत्रप्रयोगं समाप्य उद्वसाय तदेवाहः पुनः प्रयुंजीरन् सत्रि

नष्टस्यैव सोमस्याधिगमे प्रकृत्या भवति । अन्यस्य सोमस्याधिगमे पुनर्याग एवेत्येके इति सिद्धांतभाष्ये =५

स्था

पाः संहता एव। तदर्थमेव यज्ञं सं[illegible]प्येति यज्ञग्रहणं कृतं तस्यायमभिप्रायः। आरब्धो यो
यज्ञः फलसाधनं तस्य प्रयोगसमाप्त्ये तत्कर्तव्यं नान्तरमेकस्याहः प्रयोगमिति। एका
हस्तु प्रतिनिधानं तु पात्रे प्रतिनिधिनैव कृत्वा पुनर्यष्टव्यमेव॥ ८॥ दीक्षितानामुपतापे परि
हिते प्रातरनुवाकेनुपाकृते वा पुष्टिपते पुष्टिं चक्षुषे चक्षुः प्राणाय प्राणं त्मने त्मानं वाचे
वाचमस्मै पुनर्धेहि स्वाहेति ब्रह्मा कृतं हुत्वाशीतोष्णा अपः समानीयैकविंशतिमासु य
वान्कुशापिंजलांश्चावदायताभिरद्भिरवधर्यं कुर्वन्तं ताभिरेनमाप्लावयेज्जीवा नाम स्थ ता
३ इमममुं जीवयत जीविका नाम स्थ ता ३ इमममुं जीवयत संजीवा नाम स्थ ता ३ इमममुं
संजीवयत संजीविका नाम स्थ ता ३ इमममुं संजीवयतेत्योषधिसूक्तेन च। दीक्षितानां
मध्ये यः कश्चिद्दीक्षित उपतपेद्व्याधिः पीडेत्यर्थः। तत्र नैमित्तिकमुच्यते। परिहिते प्रातर

स० दृ० ६. नुवाके प्रागेवापोनञ्चायारंभादेतस्मिन्काले अनुपाकृते वा प्रातरनुवाके एतयोरन्यतरस्मि
२५६ न्काले पुष्टिपत इत्यनेन ब्रह्माहुतिं हुत्वा शीतोष्णा अपो मिश्रयित्वा तास्वेकविंशतिं यवा
न्क्षिप्य एकविंशतिकुशपिंजूलांश्चाधाये ताभिरुपतमं दीक्षितमाप्लावयेत्स्नापयेत्।

जीवानामस्थ तेत्येवमादिभिश्चतुर्भिर्मंत्रैर्या ओषधीः पूर्वाजाता इत्यनेन सूक्तेन च। सर्वे
षां मंत्राणामंते सकृदेव प्लावनं कर्तव्यं न प्रति मंत्रं। एतत्सर्वं ब्रह्मणा कर्तव्यं। अस्य सूत्र
स्य मध्ये ताभिरद्भिरवार्थं कुर्वीतेत्युक्तं तदोषधिसूक्तेन चेत्यस्मादुपरिष्टात् द्रष्टव्यं। तत्र ब्र
ह्मणः कर्तृत्वाभावात्। अस्यायमर्थः। ताभिरेवाद्भिरुपतप्तस्याचमनवर्जमुदककार्यं शौ
चादिकर्तव्यमिति तस्य कर्तार्थात्स्वयमेवाशक्तावन्यो यः कश्चन परिचारकः। अतो नात्र २५६
ब्रह्मानियम्यत इत्यत्र केचित्तु क्तएव। आप्लाव्यानुमृजेत्। आप्लावने प्रकृते प्याप्लाव्येति

१ स्नानोत्तरमेव स्नातस्यांग[illegible] स्पृष्टाभिरद्भिरनुलोममंगमपनयेदित्यर्थः =

वचनमाप्लावनानुमार्जनयोः समानकर्तृकत्वसिध्यर्थं। तेनैतदपि व्रत्येव करोति। उपांश्वं
तर्यामौ ते प्राणापानौ पातामसौ। उपांशुसवनस्ते व्यानं पात्वसौ। वैश्वानायवस्ते वाचं पात्वसौ।
मैत्रावरुणस्ते चक्षुषी पात्वसौ। वाश्विनस्ते श्रोत्रं पात्वसौ। वाग्रयणस्ते दक्षक्रतू पात्वसौ। उ
कथ्यस्ते गानि पात्वसौ। ध्रुवस्त आयुः पात्वसाविति। उपांश्वंतर्यामावित्यादिभिरष्टभिर्मंत्रै
रनुमृजेत्। असावित्यस्य स्थाने उपतप्तस्य नाम संबुध्यागृह्णीयात्। प्रथमेन नासिकाम
नुमृजेत्। द्वितीयेन सर्वशरीरं सर्वशरीरव्यापित्वात्प्राणस्य। यस्य मंत्रस्य स्थानविशेषसंबं
धोलिंगेनावगतः। तेन तदेवानुमृजेत्। अन्येन सर्वशरीरं। यथासनमनुपरिक्रमणं। उप
तप्तस्यैतस्मिन्कर्मणि कृते ततः सर्वे दीक्षिता यथास्वमासनमनुपरिक्रमेयुर्गच्छेयुरित्य
र्थः। अतोवगम्यते पूर्वस्मिन्कर्मणि क्रियमाणे सर्वे दीक्षिता ब्राह्मणा सहतत्रैवासत इति।

स्त० सू० ६ त्रातारमिंद्रमवितारमिंद्रमिति तार्क्ष्यादिः। इयमृक् तार्क्ष्यस्याद्याभवति। अनयासह तत्सूक्त
२६० मस्मिन्निमित्ते तार्क्ष्यकार्यं करोति। यद्यप्यन्यदैकाहिकाद्वैश्वदेवं स्वस्त्यात्रेयेनिविद्दध्या
त्। यद्यप्यानोभद्रीयादैकाहिकादन्यत्तस्मिन्नहनि वैश्वदेवसूक्तं भवति निविद्धानीयं तदा
तदुद्धृत्य स्वस्त्यात्रेये तच्चैनिविदं दध्यात्। स्वस्त्यात्रेयशब्देन तच्च एवात्र गृह्यते तच्च एवा
न्यत्र प्रवृत्तिदर्शनात्। स्वस्त्यात्रेयस्य निविद्धानत्वे विधानात्तस्मिन्नहनि पूर्वस्य निविद्धान नू५
स्यो धारो भवति। प्रकृत्यागदे। अगदे व्याध्यपगम इत्यर्थः। तदाने मेविकाराः कर्तव्या इ
त्यर्थः॥ ६॥ संस्थिते तीर्थेननिर्हृत्यावभृथे प्रेतालंकारान्कुर्वन्ति [illegible] संस्थिते। मृते इत्यर्थः।
तस्मिन्नुपतप्तेमृते तमतीर्थेननिर्हृत्य निर्गमय्यावभृथार्थे संकल्पिते देशे निधाय प्रेतालं २६०
कारान्कुर्वन्ति। ये लोके प्रेतस्यैते लंकारा इति प्रसिद्धास्ते प्रेतालंकारास्तैरलंकुर्युरित्यर्थः।

नोधार इति सिद्धांत भाष्ये = ७ यावदगदो भवति तावत्प्रागुक्तस्य कर्मणः प्रत्यहमावृत्तिरिति भावः = ७

अत्राकिंचित्संस्थितेअतीर्थेनेतिपदछेदः।निर्हृत्यावभृथेअवभृतार्थेदिशाआवभृथस्तस्येद
प मित्यण्।अथवाऽवभृथइत्येनावपदछेदेसतिअवभृथशब्दस्तदर्थेदेशेलक्षणयावर्तते॥
केशश्मश्रुलोमनखानिवापयंति।प्रेतस्यकेशादीनांवापनंकर्तव्यं।नलदेनानुलिंपंति॥
नलदोनामद्रव्यविशेषः।सचाभियुक्तेभ्यःशिक्षितव्यः।तत्कृतेनानुलिंपनेनानुलिंपंति।
नलदमालांप्रतिमुंचंति।मालाचतत्कृतास्यप्रतिमोक्तव्या।निष्पुरीषमेकेकृत्वापृषदा
ज्यंपूरयंति।प्रेतस्यशरीरेयान्यात्राणितानिनिष्पुरीषाणिकृत्वापृषदाज्येनपूरयित्वापु
नःशरीरेबंधयितव्यानीतिमन्यंतेकेचिच्छाखिनः।अहतस्यवाससःपाशतःपादमात्र
मवछिद्यप्रोर्णुवंतिप्रत्यग्दशेनाविःपादं।अहतमनिवसितंवाससोवपनारंभप्रदेशः
पाशइत्युच्यतेसमाप्तिप्रदेशोदशा।पाशप्रदेशेपादमात्रमवछिद्यतत्पादमात्रमवछे

तदवच्छेदं प्रेतस्य पुत्रा उपमाकुर्वीरन्।

स्मृ० सू० ६ दं निधाय तेन वाससा प्रत्यग्देशेन प्राग्ग्रीवं संप्रेतमाविष्याहं प्रच्छादयन्ती त्यर्थः। अवछेदमस्य
२६१ पुत्रा उपमाकुर्वीरन्नं स्वीकुर्वीरन्नित्यर्थः। अग्नीनस्य समारोप्य दक्षिणतो बहिर्वेदि दहेयुः॥
अस्य प्रेतस्य अग्नीन् द्वयोररण्योः समारोप्य देवयजनस्य दक्षिणतो बहिर्वेदिं प्रेतमानीया
ग्निं मथित्वा विहृत्य तत्रैव दहेयुः दहनविधिनैव। आहार्येणानाहिताग्निं। यो नाहिताग्निः
सत्री भवति तस्मिन्मृते अयं विशेषः आहार्येणाग्निना तं दहेयुः। आहार्यशब्देनोपासन
मुच्यते। पत्नीं चादीक्षितस्य पत्नी यदि म्रियेत तां चाहार्येणैव दहेयुः। आहार्यशब्देना
त्र लौकिको ऽग्निरुच्यते। अत्रायं विशेषः। येनाहिताग्निना सर्वाधानं कृतं तस्य पत्नी लौकि
केन। यस्यौपासनश्चास्ति तस्य पत्नीमौपासनेन। अतो ऽवगम्यते। आहार्यशब्देन श्रौतो २६१
ग्निर्लक्ष्यत इति। प्रत्येत्याहुः समापयेयुः। प्रत्येत्य दहनदेशाद्यत्सर्वाः परीभृतमहस्तत्समा

पयेयुरित्यर्थः। प्रातरनभ्यासमनभिहिंकृतानि शस्त्रानुवचनाभिष्टवनसंस्तवनानि। यस्मि
न्नहनि दीक्षितदहनं कृतं तस्मात्परमनंतरमहः प्रातरित्युच्यते। तस्मिन्नहनि शस्त्रादीन्य
भ्यासाभिहिंकारवर्जितानि भवेयुः। तत्राभिष्टवेयाव्यां पूर्वमेवाभिहिंकारो नास्ति आद्ये
च शस्त्रे। तत्राभ्यासमात्रस्यैव निषेधः। एवमन्यत्र यथासंभवं निषेधः कल्पनीयः। सुराग्र
हग्रहणात्तीर्थेन निष्क्रम्य त्रिः प्रसव्यमायतनं परीत्य पर्युपविशंति। तस्मिन्नेव प्रातरनभ्यास
मित्युक्तलक्षणेहनि ग्रहग्रहणात्प्रागेव तीर्थेन निष्क्रम्य त्रिः प्रसव्यप्रदक्षिणं श्मशानायत ना
नं परितो गत्वा तद्दायतनं परित उपविशंति। पश्चाद्धोता। श्मशानायतनादिति शेषः॥
उत्तरोध्वर्युः। तस्य पश्चाच्छंदोगाः। तस्य ग्रहणमध्वर्योरिव पश्चाच्छंदोगा उपविशंति ना
यतनस्येत्येवमर्थं। ब्रह्मणो दक्षिणत इति सिद्धत्वान्नोक्तं। आयं गौः पृश्निरक्रमीदित्येषां

स्०सू०६
२६२
शुस्तुवते। आस्वक्ष छंदोगा उपांशुस्तुयते। स्तुते होता प्रसव्यमायतनं परिव्रजन्स्तोत्रिय
मनुब्रवेदप्रणुवन्। होताऽप्रणुवन्स्तुते छंदोगैस्त्रिः प्रसव्यं प्रधानायतनं परितो व्रज
न्स्तोत्रियमनुद्रवेत्। वक्ष्यमाणाश्च ऋचः। उपांशु स्तुवत इति स्तुता उपांशुत्वविधानं
होतुरनुद्रवणेप्युपांशुत्वप्रापणार्थं। स्तोत्रियवचनमृगुपलक्षणार्थं। याः स्तुवते
ताऽनुब्रूयादिति। शंसत्यादिचोदनाभावादेवसामिधेनीधर्माभावे सिद्धे पुनः स्तोत्रि
यशब्दसंबंधाच्छस्त्रधर्मप्राप्त्याशंकास्यात्। तन्निवृत्त्यर्थं प्रणवप्रतिषेधः। अथैतदनु
द्रवणं किंरूपमिति। अनुमंत्रणमिति ब्रूयात्। प्रेतस्याभिधानमत्र चिकीर्ष्यते। तच्च मं
त्रलिंगादवगतं। ग्रामीणेषु स्पष्टमेवैतत्। सापरेतास्तीषु चानयैव दिशा प्रेताभिधानं कल्प २६२
नीयं। अत्र च ब्रूयादिति वक्तव्ये अनुद्रवेदित्यनुशब्दसंबंधात् ज्ञायते अनुमंत्रणम

कारोयमिति। तथा च वक्ष्यति। तं दह्यमानमनुमंत्रयत इति। तेनानुमंत्रणधर्मा एव। सुकृ
र्तव्याः। यामीश्च। ताश्च इमाश्च तथाभूते न वक्तव्याः। यमेन यामायनेश्चैता ऋचो दृष्टाः सू
क्तं तु यमदृष्टं तेनैता याम्य इत्युच्यंते। न यमदेवत्या इति। प्रेहि प्रेहि पथिभिः पूर्व्येभिरिति
पंचानां तृतीयमुत्तरे ता। मैनमग्ने विदहो माभिशोच इति। षट्। पूषा त्वेतश्च्यावयतु प्रवि
द्वानिति च तस्र उपसर्प मातरं भूमिमेतामिति च तस्रः सोम एकेभ्यः। इदं सूक्तं। उरूणसा
वसुतृपा उदुंबलाविति च। समाप्य संचित्य तीर्थेन प्रपाद्य यथासनमासादयेयुः। एतद
नुद्रवणं समाप्यानंतरमस्थिसंचयनं कृत्वा तमस्थिकुंभं तीर्थेन प्र
वेश्य यद्दस्य मृतस्य पूर्वमासनस्थानं तत्रास्थिकुंभमासादयेयुरित्यर्थः। भक्ष्ये
ष्वन्नाणभक्षान्भक्षयित्वा दक्षिणे। मार्जालीये निनयेयुः। दक्षिणस्यां वा वेदिश्रोण्यां। अत्र

स्०वृ०६ वानिनयेयुर्मार्जालीयेवानिनयेयुरितिप्रदर्शनार्थं।इवंनिनयेयुरितरस्मिन्क्षिपेयुरित्य
२६३ र्थः।सप्तदशमहर्भवतित्रिवृतःपवमानारथंतरपृष्ठोऽग्निष्टोमः।यस्मिन्नहनिदीक्षितः
२६३ प्रमीयतेतदहरुक्तेनप्रकारेणसमाप्यतदनंतरंसप्तदशास्तोमंत्रिवृत्पवमानकंर
थंतरपृष्ठमग्निष्टोमसंस्थमहरंतरंदीक्षितमरणनिमित्तंसत्रमध्येसात्रिभिःकर्त
व्यं।संस्थितेवभृथमेकेगमयंत्येतस्यैतदहरभिशब्दयंते।एतस्मिन्नहनिसमाप्ते
एतान्यस्थीन्यवभृथकालेऽवभृतार्थसंकल्पितास्वप्सुकुंभेनसहप्रक्षिपेयुः।एत
स्यप्रेतस्यैतदहरितिवदंतःसर्वेसात्रिणइतिसूत्रार्थः।एकेसंस्थितइत्यस्येदंप्रयो
जनंसंस्थितेतीर्थेनेत्यारभ्यउक्तेनप्रकारेणएतदंतंकर्मदीक्षितमरणनिमित्तंसात्रि २६३
भिःकर्तव्यं।अतःपरंप्रेतस्यसंबंधोनास्तीत्येकेशाखिनआमनंति।तेनातःपरंस

त्रिणः सत्रमेव समाप्य यथेष्टं गच्छेयुः। निर्मथ्य न वा दग्ध्वा निखा[illegible]य संवत्सरादेनम
ग्निष्टोमेन याजयेयुः। इदानीं दहनादारभ्य पक्षांतरमुच्यते। मृतेप्यग्नयः पूर्ववदेवनु
गता एवातिष्ठंति। स्वयोररण्योरुक्तमथनेनाग्निं सद्य उत्पाद्यते न पूर्वोक्तदेशोपात्रं च यत्न
वर्जं दग्ध्वास्थीनि संचितानि निखाय। विकृतं सत्रं समाप्य सत्रसमाप्तिकालादारभ्य सं ५
वत्सरे पूर्णे तान्यस्थीन्यादाय तानि यजमानं कृत्वाग्निष्टोमेन प्रातरनभ्यासमित्येव
मादिविशेषणाविशिष्टेन याजयेयुः। त एव सात्रिणा इत्ययमपरः पक्षः। अस्मिन्पक्षे पू
र्वस्मिंश्च पक्षे सत्रसमापने मृतपुरुषन्यूना एव समापयेयुः। नेदिष्ठिनं वा दीक्षये
युः। शेषसमापने मृतस्य संस्थापूरणार्थं मृतस्य संनिकृष्टं दीक्षयित्वा सत्रसमापनं
कुर्युः। निर्मथ्यदहनपक्षे नेदिष्ठप्रवेशो सत्यप्यस्थियज्ञो नित्य एव। अपिवोत्थानं गृह

सू० वृ० ६ पतौ। गृहपतेर्मृतौ तदहः प्रवृत्तं समाप्यावभृथं कृत्वा सद सो दहनं कृत्वा सत्राउत्थानं
२६४ भवति नपुनः शेषं समापयेयुरित्यर्थः। उक्तस्तत शास्त्राविकारः। यः संवत्सरे स्थिय
264 तः यस्मिंश्चाहनि गृहपतिर्म्रियेत तयोः शास्त्राविकारउक्तः। अनभ्यासमित्यादयो
येविकाराउक्तास्ते तयोर्द्वयोरपि भवंतीत्यर्थः। एकाहेषु यजमानासने शयीत एका
हेषु यजमानः पूर्वं यस्मिन्नासन आस्ते मृतोपि तत्रैव शयीत यावत्स एकाहः परि
समाप्यते। मृतेपि तस्मिन्नासनस्थे तदहः परिसमापनं कुर्युरित्यर्थः। संस्थिते पा
ये ३ यतीष्ववभृथं गमयेयुरित्यालेखनः। तस्मिन्नहनि संस्थिते अवभृथकाले अपाय
तीष्वपगच्छंतीषु वहंतीष्वित्यर्थः। तास्वस्वावभृथं कर्म कृतं प्रेतं तत्र प्रक्षिपेयुरित्य
र्थः। एवमालेखनआचार्यआह। पूर्वेद्यासदोदहेयुरित्याश्मरथ्यः। तस्मिन्नहनि २६४

समाप्ते वभृथकाले सर्वे यासदो योदेशस्तस्मिंदेशे तंप्रेतं सर्वैर्यज्ञपात्रैः सहतैरेवा
ग्निभिर्दहेयुरित्याश्मरथ्य आह। एष एवावभृथः। अस्मिन्पक्षेऽन्योवभृथो न कर्तव्यः
।एष एवावभृथो भवेत्। यदेनमेभिरग्निभिर्यज्ञसाधनैश्चास्मिंदेशे दहनेन समापन
मो मिति॥१०॥ अग्निष्टोमोत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोतिरात्रोप्तोर्याम इति सं
स्थाः। अत्यग्निष्टोमो नाम संस्थाविशेषः। अत्यग्निष्टोमे राजन्यस्य षोडशिनं गृ
ह्णीयादिति वचनादाग्निमारुतादूर्ध्वं षोडशिग्रहस्य स्तुतशस्त्रे यदा भवतस्तदा
सोऽत्यग्निष्टोम इत्युच्यते। वाजपेयाप्तोर्यामौ वक्ष्येते। इतरे अत्रैवोक्ताः। सोमया
गात्रप्रकृतस्तेन तस्यैते संस्थाविशेषाः सर्वे सोमयागाः। सर्वे संस्थयास प्तविधा
एवेत्यर्थः। तासां यामुपयंति तस्यामंते यज्ञपुच्छं। तासां संस्थानां मध्ये यां संस्थामु

स०वृ० ६ पर्यंतिकुर्वंति तस्या अंते यत्तत्पुच्छं नाम वक्ष्यमाणं कर्म कर्तव्यं। एवं स्थिते यां कांचित्संस्थाम
२६५ कल्प्य प्रवृत्तानां संस्थांत्यत्वेन क्लृप्तात् छस्त्रादधिकं निमित्तवशेन शास्त्रांतरमापद्यते यदा
तं तदाँ न्निमित्तबलात्तच्छास्त्रांतेव सा संस्था विपरिणमत इति तस्मादेव शास्त्रादूर्ध्वं यत्पु
२६५ छं नाम कर्म कर्तव्यमित्येवमर्थं तां सा यामुपर्यंति तस्या अंत इत्युक्तं। अनुयाजाद्युक्तं प
शुनाशंयुवाकात्। तदिदं यत्पुच्छमुच्यते। अनुयाजादिशंयुवाकपर्यंतं तद्वाद्विहकर्त पत्नीसंयाजान्तं।
व्यं। उत्तमास्विहसूक्तवाकप्रैष इति प्रैषविशेषविधानादेव पाशुकमेवात्रातंत्रं भवति
नैष्टिकं। अतः पशुनेत्यस्येदं प्रयोजनं पशोर्यद्ध्रासनं दाक्षिणत आहवनीयस्य तद
त्र कर्तव्यमिति। तेनानुयाजादोमनोतादौ चैवं भवति पशुपुरोडाशे सदस्येवासीतेति
सिद्धं। आशंयुवाकादिति। आशंयुवाकात्पाशुकं कर्म कर्तव्यं नोर्ध्वमित्येवमर्थं। उत्तम २६५

स्त्विह सूक्तवाकप्रैषः। प्रैषसमाम्नाये ह्येष सूक्तवाकप्रैषाम्नातो तयोरुत्तरइत्यर्थः। अवी
रा वृधतेति पुरोळाड्देवतां पशुदेवतां। अवीवृधतेति पुरोळाशदेवतां पशुदेवतां चेत्यध्याह
र्तव्यं। अस्मिन्सूक्तवाकप्रैषे अवीवृधत पुरोळाशैरित्याम्नातं। तत्र पशुदेवता अग्निः पु
रोळाशानां देवता इन्द्रश्चेति द्वे देवते सन्निहिते तत्रावीवृधतेत्येकवचनांतं पदं कां देवताम
भिधत्ते। पुरोळाशैरिति बहुवचनं केवलपशुदेवताभिधानेन घटते। केवलैन्द्राभिधाने च
प्रकृतिप्राप्तं पशुदेवताभिधानं न कृतं स्यात्। अतः संनिधानाविशेषादुभे अपि देवते अ
भिधत्ते तंत्रेणेति मन्यमानः पुरोळाशदेवतां पशुदेवतामित्युक्तवानाचार्यः। एवं सति पु
रोळाशैरिति बहुवचनं पुरोळाशं धानादिपंचकं चाभिप्रेत्योपपन्नं भवति। एवं सति अ
पशु। क्रियामेके न्यत्र तदर्थवादवदनादिति पुरोळाशाकरणे यत्पशुदेवतानभिधानमस्मिन्मं

सू० १० ६ त्रेहेतुत्वेनोपवर्णितं तदपि परिहृतं भवति। तेन पशुपुरोळाशश्च कर्तव्यो भवति। अवीवृ
२६६ धतां पुरोळाशैरित्येवास्मिन्मंत्रे वक्तव्यं च भवतीति सिद्धं। एके यदि सवनीयस्य पशोः पुरो पशु २
266 ळाशं कुर्युरवीवृधेतां पुरोळाशैरित्येव ब्रूयात्। मंत्र इत्या[illegible]हुरिति वाक्यशेषः। अक्रि
यामेके इति एके आचार्याः पशुपुरोळाशाक्रियामुक्तवंतस्त एवात्रेके इति प्रत्यवतिष्ठंते
पशु ।त एवमाहुः। यदि सवनीयस्य पशोः पुरोळाशं क्रियेत तेन दाहृयोर्देवतयोः पुरोळाशेन
वर्धने कर्तव्ये अवीवृधेतां पुरोळाशैरिति द्वयोरभिधानाय मंत्रो ब्रूयान्न तथा ब्रवीति।
पशु अतः पुरोडाशदेवत्राभिधीयते न पशुदेवता अतस्तस्या अनभिधानात्पशुपुरोडा तैका ३
शस्याक्रियैवेत्येक आहुरित्यर्थः। एवमेकीयपक्षमुपन्यस्यात्मीयपक्षेभिधानानि २६६
र्वाहमुपपादयति। सवनीये रेवेंद्रो वर्धते पशुपुरोळाशेन पशुदेवता। अवीवृधेतेति

देवतायागसंबंधउच्यते। सचोभयोरविशिष्टः संनिधानं चाविशिष्टमस्मिन्मंत्रे तथा दर्श
नात्। एवं सत्येकवचनस्याविवक्षयाप्युभयोरभिधानमेवयुक्तं नैकस्याएवेति। अस्मिन्नु
पपन्ने पुरोडाशैरितीदमप्यनयैवदिशा घटत इत्युक्तं सवनीयैरेवेंद्रो वर्धते पशुपुरो
ळाशेन पशुदेवतेति। ऊर्ध्वं शंयुवाकाद्धारियोजनः। शंयुवाकांतस्येवातिदेशमुक्त्वा
हारियोजन उच्यमानस्तस्मादूर्ध्वमेव भवति। तत्किमूर्ध्ववचनेन तस्येदं प्रयोजनं तृ
तीयसवनं तावच्छस्त्रांतमेव। यत्पुनः शस्त्रादूर्ध्वमनुयाजादि शंयुवाकांतं तद्दैष्टिक
त्वादुत्तमस्वरं भवति। तस्मादूर्ध्वं यत्सौमिकं तत्र स्वरविधानाभावादनियतस्वरं भवती
ति तस्य स्वरविधानार्थमूर्ध्ववचनं। शंयुवाकशब्देनात्र शंयुवाकस्वर उच्यते। स चोत्तम
स्तेनायमर्थः। उत्तमादप्युत्तमस्वरे याहारियोजनः प्रयोक्तव्य इति। अपाः सोममस्तमिंद्र

स०वृ०६ प्रयाहि धानासोमानामिंद्राह्रि चापिब चमुनाज्मिते ब्रह्मणाकेशिनाहरी इति। हरियोजन
२६७ स्यानुवाक्या प्रैषयाज्याः। इज्यानुवाक्ये अंत्येष्वहःसु। एते याज्यानुवाक्ये अहर्गणेषु यान्यं
267 त्यान्यहानि तेषु भवतः। अंत्यवदेकाह इति न्यायादेकाहेष्वपि भवतः। तिष्ठासु कं मघवन्मा
परागा अयं यज्ञो देवया अयंमियेध इतीतरेषु। अहर्गणेष्वेवांत्येभ्यो यानीतराणि तेष्वेते
भवतः। अनंत्येष्वित्यर्थः। परायाहि मघवन्नाचयाहीति वानुवाक्योत्तरवत्स्वहःसु। हारि
योजनविषयत्वादस्य विधेरहःशब्देनात्र सुत्याहान्येवोच्यंते। तेन सारस्वतसत्रादिषु
यानि सुत्याहान्यसोम्याहोभिरुत्तरवंति तेष्वनंत्येष्वियमनुवाक्या भवति। तिष्ठासु कं
मितिवा। अयं यज्ञ इत्येषैव याज्या। अनु ननु वषट्कृते इति प्रैषं मैत्रावरुण आह २६७
हमदएवमघवन्निंद्र तेष्व इति। हारियोजनाधिकारात्तस्यैवानुवषट्कारात्स्यागे वाति

प्रैषनामकमिह मद इत्यादिकं प्रैषं मैत्रावरुण आह। मैत्रावरुणग्रहणमननुवषट्कृत इति वचनाच्छ्रोतुः प्राप्तिशंकानिवृत्त्यर्थं। आहेति वचनं जपादिषु कव्यावृत्त्यर्थं। अस्य तु विषयं वक्ष्यति। तायमाने रूपाणां प्रथमाद् ऋतः प्रवर्तते भ्यासाति प्रैषावितिं। अप्येत्यति रात्रे। अतिरात्रे कृतो वक्ष्यमाणाश्वःशब्दस्य स्थाने अद्यशब्दः कर्तव्यः। समर्थनिगमत्वा देवोहे प्राप्ते पुनर्वचनमस्य प्रैषस्याहर्गणेष्वनंत्याहरर्थं तयोत्पत्तेरहर्गणानां च द्वाद शाहप्रकृतित्वाद्द्वादशाहस्य चातिरात्रादित्वात्तत्सम्भृतित्वादस्य प्रवृत्तेः सैवास्य प्रकृति रितिकृत्वानूहं मन्यमानस्योत्तरमप्येत्यतिरात्र इति। अयमभिप्रायः। सत्यं द्वादशाहे नंत्यान्यहान्यस्य प्रकृतिरिति। किंतु तेष्वेवयस्मिन्नहनि प्रकृतित्वेन गृहीतमंत्रस्य यथार्थमभिधानं संभवति तदेवास्य प्रकृतिरिति कृत्वातिरात्र ऊह एव युक्त इति। अ

स०वृ०६ ग्रस्तुत्यामिति च। इदमपि पूर्ववदेव द्रष्टव्यं। तस्यां तं श्रुत्वाग्नीध्रः श्वः सुत्यां प्राह श्वः स्तुत्यां वा
२६८ एषां ब्राह्मणानां तामिंद्रायेंद्राग्निभ्यां प्रब्रवीमि मित्रावरुणाभ्यां वसुभ्यो रुद्रेभ्य आदि
त्येभ्यो विश्वेभ्यो देवेभ्यो ब्राह्मणेभ्यः सोम्येभ्यः सोमपेभ्यो ब्रह्मन्वाचं यच्छेति। अतिप्रै
षस्यां तमाग्नीध्रः श्रुत्वा श्वः स्तुत्यां संज्ञकं श्वः सुत्यां वा एषामिति एतं मंत्रं प्राह। आ
हत्येतावतैव जपादिषु श्रव्या वृत्त्योपांशुत्वे निवृत्ते प्रकर्षवचनादुत्तम एवात्र स्वरो भ
वति। तस्यां तं श्रुत्वेति वचनमतिप्रैषश्वः स्तुत्ययोः संबंधकरणार्थं। तेन तस्मिन्नति
प्रैषेद्येत्सहविधिः श्वः स्तुत्यामंत्रेपि भवति। श्वः सुत्यामंत्रेपि प्राहेति वचनाद्य उत्तम
स्वरो विहितः सोतिप्रैषेपि भवति। अनुवषट्कारास्त्राग्नीत्ययमपि श्वः स्तुत्यामंत्रेपि २६८
त भवति। उपांशुत्वव्यावृत्तौ सत्यां हारियोजनोर्भावो मंद्रादीनामपि अनियमं व्यावर्त्य

उत्तमस्वरं नियमयतीति अयमभ्युच्चयहेतुः ॥११॥ आहृतमुन्नेत्रा द्रोणकलशमिव्वा

भिव प्रतिगृह्योपहवमिष्ट्वा वेक्षेत। उन्नेत्राहृतमुन्नेतरुपक्कयस्वेक्ष्यत्वा वेक्षेत तूष्णीं

द्रोणकलशस्थं सोमं। हरिवतस्ते हारियोजनस्य स्तुतस्तोमस्य शस्तोक्थस्येष्टयजुषो

योभक्षो गोसनिरश्वसनिस्तस्य त उपहूतस्योपहूतो भक्षयामीति प्राणभक्षं भक्षयि

त्वा प्रतिप्रदाय द्रोणकलशमात्मानमाप्याय्य यथाप्रस्तं विनिःसृप्याग्नीध्रीये विनिः

सृप्ताः कुर्वीजुह्वत्यथं पीतइंडुरिंद्रं मदेधाद्दयं विप्रो वाचमर्चन्नियच्छन्। अयं कस्यचि

द्रुहता दभीके सोमो राजान सखायं दिषे धात्स्वाहा। इदं राधो अग्निना दत्त मागाद्यशो

भर्गः सह ओजो बलं च। दीर्घायुत्वाय शतशारदाय प्रतिगृभ्णामि महते वीर्याय स्वा

हेति। हरिवत इति प्राणभक्षमंत्रः। आत्माप्यायनं मुखहृदयाभिमर्शनं मंत्राभ्यां। यथा

स्म० सू० ६ प्रस्थत्रामितियोयेन पथासदो हविर्धानं प्रस्थतः सतेनविनिःस्थ्येत्यर्थः। विनिःस्थ्या हुतिरि
२६६ तिहोमयोर्नाम। अयं पीतः इद्दंराध इतिहोममंत्रौ। आहवनीये षड् षड् शकलान्यभ्याद
२०१ धाति देवकृतस्यैनसोवयजनमसिस्वाहा। पितृकृतस्यैनसोवयजनमसिस्वाहा। मनु
ष्यकृतस्यैनसोवयजनमसिस्वाहा। पितृकृतस्यैनसोवयजनमसिस्वाहा। एनस एन
सोवयजनमसिस्वाहा। यद्यो देवाश्चकृमजिह्वयागुर्विति च। आहवनीयवचनंआग्नी
ध्रीयाधिकारात्। शकलाभ्याधानं पंचभिर्यजुर्भिरेकयर्चा। होयाकल्पशाखानाग्रहोला
वेक्षेरन्नापूर्यास्था मापूरयतप्रजयाचधनेनच। इंद्रस्यकाममद्दुघारुच्छकामान्मेधुक्ष्व
प्रजांचपशूंश्चेति। आपूर्याइत्यवेक्षणमंत्रः। अथवा पूर्वभागे वेक्षणार्थः। उत्तरोवघ्रा २६६
णार्थइति। अवघ्रायांतःपरिधिदेशेनिवपेयुः। तूष्णीमवघ्रायतायानां अंतःपरिधि

देशे निवपेयुः। अत्र देशग्रहणात्सरित्थ्यभावेपि सदेशो गृह्यते। प्रत्येत्य तीर्थदेशे पांसुर्यां
श्चमसास्तांस्तान्सव्यावृत्तो व्रजंति आहवनीयदेशात्सर्वे दक्षिणावृतः प्रत्येत्याग्नीध्रीयं गच्छे
युः। विनिःसृत्याहुति प्रभृति एतावत्सर्वैः कर्तव्यं। सर्वे चाग्नीध्रीयदेशं गच्छंतस्तेषु चम
सिनस्ते सव्यावृतो भूत्वा तीर्थदेशे चमसानद्भिः पूर्णानध्वर्युभिः स्थापितान्व्रजेयुः। हरित
तृणानि विसृज्य प्रतिस्वं चमसेभ्यस्त्रिः प्रसव्यमुदकैरासनः पर्युक्षंते दक्षिणैः पाणिभिः
।तांश्चमसान्व्रजित्वा हरिततृणान्यार्धतृणानीत्यर्थः। तानि च तद्वीजातीयानि शस्त्रांत
रेविशेषदर्शनात्। तानि तृणानि निष्पीड्य स्वे स्वे च मसे अंतरा प्रक्षिप्य सर्वे चमसिनः स्वा
त्स्वाच्चमसाद् दूर्वा रस युक्ता अपो गृहीत्वा ताभिरद्भिः स्वं स्वमात्मानं दक्षिणैः पाणिभिरभि
प्रदक्षिणं पर्युक्षंते। दक्षिण ग्रहणं पाणीश्चमसेष्वित्यत्र सव्याधिकारानिवृत्त्यर्थं। हत

स०वृ०६ रैर्वाप्रदक्षिणां।सव्यैर्वापाणिभिःप्रदक्षिणंपर्युक्षंते।स्वधापित्रेस्वधापितामहायस्वधाप्र
२७० पितामहायेति।एतेत्रयःपर्युक्षणमंत्राः।उक्तंजीवन्मृतेभ्यः।पिंडदानेयदुक्तंविधानंत
270 दत्रापिप्रत्येतव्यं।तत्रजुहुयाज्जीवेभ्यइत्यपायांतरमस्ति।अत्रोपायांतरस्यासंभवाद्य
स्यप्रेतास्त्रयोभवेयुःसएवपर्युक्षणंकुर्यान्नान्यः।तद्वर्जमन्यत्सर्वेकुर्युः।पाणींश्चम
सेष्ववधायायस्कधृतस्यदेवसोमतेमतिविदोन्नृभिःसुतस्यस्कतस्तोमस्यशस्त्वोक्थस्ये
ष्टयजुषोयोभक्षोगोसनिरश्वसनिस्तस्यतउपहूतस्योपहूतोभक्षयामीतिप्राणभक्षा
न्भक्षयित्वामामाहंप्रजांपरासिचमित्येतेनाप्यात्मंनिनीयाच्छायंवोमरुतःश्लोकएत्वित्ये
तयाभिमृशंति।चमसिनःस्वेस्वेचमसेस्वंस्वंदक्षिणंपाणिमवधायततःस्वस्वचमसा २७०
द्दर्वारसयुताअपआदायावजिघ्रंत्यस्कधृतस्येतिमंत्रेण।ततोमाहंप्रजामित्यनेना

भ्यात्मं स्वचमसस्थाअपोभ्मौनिषिंचेयुः। एतेनेतिवचनमनुष्टुभोभ्युद्धारेपिअस्याअनु
ष्टुभोनुद्धारार्थं। ततोछायंवइत्येतयर्चाचमसस्थाअयोभ्मौनिषिक्ताअभिमृशंति। द
धिक्राव्णोअकारिषमस्याग्नीध्रीयेदधिद्रप्साम्राश्यसख्यानिविसृजंतउभाकवीयुवाना
सत्याद्वाधर्मणस्पती। परिसत्यस्यधर्मणाविसख्यानिसृजामहइति। दधिक्राव्णाइत्येत
धि६२ याआग्नीध्रीयेदैप्साम्राश्नीयुः। सयजमानाःसर्वर्त्विजः। ततःसख्यविसर्जनमपिकु
र्युः। उभाकवीतिमंत्रेण। सख्यविसर्जनंनामतान्तनप्त्राभिमर्शनाद्येतावंतंकालंसखि
त्वेनवर्तितव्यं। तत्साखिलमस्मिन्कालेविसर्जनीयमित्यर्थः। तच्चपरस्परंहस्तसंस्पर्श
नेनविसर्जनीयं॥१२॥ पत्नीसंयाजेसं[illegible]श्चरित्वावभृथंव्रजंति। यथाप्रसृप्तमित्यत्रे
वेदा[illegible]युषेत्यनेनहोताहोमार्थंनिःसर्पतिसइदानींवेदंगृण्ह

सू० वृ० ६ तिततः पत्नीसंयाजेष्वरित्वा पत्न्यै वेदप्रदानादि शूर्पपात्रानिनयनांतं कर्म अकृत्वैव वेदस्तर
२७१ णं कृत्वा अकृत्वा वा प्रायश्चित्तानि जुहुयात्। इतरैरन्वारब्धः। ततो हृदयशूलोद्वासन
271 मंत्रेव कर्तव्यं। यद्यनूबंध्या पशुर्नकारिष्यते तदा तदुद्वासनं पशुकर्तृभिरेव कर्तव्यं। त
त्र संस्थाजपमेवावस्थाप्यावभृथदेशं परिव्रजंति। व्रजंतः साम्नो निधनमुपयंति। सा
मपंचभक्तिकं तस्यां त्या भक्तिर्निधनमित्युच्यते तदवभृथं गच्छंतो ब्रूयुरित्यर्थः। ततस
र्वैर्त्विजामेतत्कार्यं। अवभृथेष्ट्यातिष्ठंतश्चरंति। अवभृथेष्टिर्नाम जले क्रियते त
यां तिष्ठंतश्चरेयुः। प्रयाजाद्यनुयाजांतानास्यामिक्वान बर्हिष्मंतौ प्रयाजानुयाजौ।। अप्सुमंतौ।
आज्यभागौ भवत इत्यर्थः। गायत्रौ। गायत्रीचेतौ भवतः। सूत्रभेदकरणं यत्र यत्रासु २७१
मंतौ तत्र तत्र गायत्रौ भवत इत्येवमर्थः। वारुणं हविः। हविर्ग्रहणं हविर्दोषे सति यागा

वसरेघुनर्हविरेवो त्वायष्टव्यं। नतु पुनराज्येनेष्टा पुनर्यष्टव्यमित्यर्थः। अवतेहेडोव
रुणनमोभिरिति द्वे। अग्नीवरुणौ स्विष्टकृदर्थौ। स्विष्टकृदर्थइतिस्विष्टकृद्यागेग्नी
वरुणौ देवताभवतीत्यर्थः। तेनास्विष्टकृछब्दो न प्रयोक्तव्यः। अत्रानिगदे एवाग्नीव
रुणाविस्यादिर्प्रयसत्वंनइत्यृचा यष्टव्यं। त्वंनोअग्नेवरुणस्यविद्वानितिद्वे। संस्थिता
यांपादानुदक्रांते वदध्युर्नमो वरुणायाभिष्ठितो वरुणस्यपाशइति। संस्थितायामव
भृथेष्टोसर्वेस्मदीयानमो वरुणायेत्यनेनमंत्रेणदक्षिणान्पादानुदक्रांते वदध्युः। उ
दक्रांतेतीरसमीपवर्तिन्युदकइत्यर्थः। संस्थितवचनमवधानादीनामिष्टिसंबंधि
त्वज्ञापनार्थं। तेनेष्टेराक्रियापक्षे अवधानादयोपिनभवंति। ततआचामंतिभक्ष
स्यावभृथोसिभक्षितस्यावभृथोसिभक्षंकृतस्यावभृथोसीति। ततइतिसू ३५ वैयेदं

स्न० प्र० ६ संबंधमितिदर्शयति। आचामंतिआपः पिबंतीत्यर्थः। त्रिभिर्मंत्रैः पिबंति। सर्वत्र शोचार्थमा
२७२ ति चमनंकर्तव्यं। प्रोथ्य प्रथमेन प्रश्नीवं प्रागिरं त्युत्तराभ्यां। तेषु पानेषु विशेष उच्यते। प्रथमे
२७२ नपीता अपः प्रोथ्य प्रश्नीवंति प्रोथनमित्यंतरास्यशोधनार्थः क्रियाविशेष उच्यते। तं
कृत्वा निष्ठीवेयुरित्यर्थः। उत्तराभ्यां पीताः प्रोथ्य प्रागिरंति। आचमनविधानादेव प्रागि
रंतीति सिद्धे पुनः प्रागिरंतीति वचनमत्रापि प्रोथनप्राप्त्यर्थं। तत आचम्या प्लवंत
आपो अस्मान्मातरः शुंधयंत्विदमापः प्रवहत स्कमित्यान आपश्च षधयः संत्विति
। ततश्शेति पूर्ववत्पदार्थसंबंधार्थं। आचम्येति वचनं शोचार्थमाचने कृते पुनराप्लव
नांगमाचमनं कृत्वा प्लवेरं नित्येवमर्थं। स्नानमाप्लवनमित्युच्यते। तदेभिर्मंत्रैः कुर्यु २७२
रित्यर्थः। एतयाहृताभ्युक्षेरन्नेवाप्यदीक्षिताः। अनयाहृताभिर्मंत्रैरित्यर्थः। एतया
ऐ

इतात्रदीक्षिताअभ्युक्षेरन्नेवनाश्नावेशरन्। अपिशब्दाद्दाभुवनमप्यनुकृष्यते। अस्यचा
वधारयासंबंधोभवति। तेनायमर्थः। अदीक्षिताअभ्युक्षेरन्नेववाआश्नवेरन्नेवेत्येवं
विकल्पोभवति। उंनेतैनानुंनयति। उन्नेतास्वशास्त्रोक्तविधिनासर्वानुदकाउत्तारयति
। उंनेतरुंनोंनयोंनेतर्वस्रोअभ्युंनयानइत्यंनीयमानाजपंति। उन्नेत्राउन्नीयमानाउ
न्नेतरित्येतंमंत्रंजपंति। उद्वयंतमसस्परीत्यृदेत्य। ब्रह्मुरितिशेषः। उदेत्योदकाउत्तीर्येत्य
र्थः। इयमप्यृऽ्मंत्रसंज्ञाभवति। तेनोपांशुप्रयोक्तव्या। लिंगादेवऋत्वप्रकारःकल्प्यः।
समानमतऊर्ध्वंहृदयशूलेनासंस्पृशजपात्। अस्याऋचऊर्ध्वंयत्कर्तव्यंतद्धृदयशूलो
द्वासनेनसमानंभवति। अत्रहृदयशूलोद्वासनाभावादनुमंत्रणमपामुपस्पर्शनंसंस
र्शनपरिहारार्थमर्थलुप्तत्वादकर्तव्यं। अनवेक्षमाणाइत्यादयःसर्वैःकर्तव्याःसमिदा

स्० सू० ६ धानांताः पदार्थाः। आसंस्थाजपादिति वचनं हृदयश्लोकासनेन संस्थाजपस्य संबंधाभा
२७३ वात्तस्यापि प्राप्णार्थं। संस्थाजपेनोपतिष्ठंते येयेपवृत्तकर्माणः। अवधानादय एते
273 पदार्थाः सर्वैरस्मदीयैः कर्तव्याः। संस्थाजपस्त्वपवृत्तकर्मभिरेव कर्तव्य इत्येवमर्थं वच
नं। इदं चान्यत्प्रयोजनमपवृत्तकर्माणः संस्थाजपं कुर्युरिति संस्थाजपस्य कर्तृसंबंधं
ब्रुवन्कर्तृद्वारेण प्रयोगांगत्वमस्य दर्शयति। तेन सोमप्रयोगे यत्कर्तृसंबंधि सोमप्रयो
गावयवाः संतिष्ठंते तस्यैव संस्थाजपो भवति। तेन दीक्षणीयादिषु संस्थाजपस्य प्रसंग
एव नास्तीति सिद्धं। १३। गार्हपत्य उदयनीयया चरंति सो [illegible]॥ गार्हपत्ये शाला
मुखीय इत्यर्थः। सत्युत्तरवेदिप्रणयनादूर्ध्वं सोमस्य गार्हपत्यो भवति वचनाद्यतः प्र २७३
णयति स गार्हपत्य इति। उदयनीया नामेष्टिः तस्याः शालामुखीय एवाहवनीयो भवति।

साम्नायणीययोक्ता।साग्रहणंप्रायणीययाजस्यावैलक्षण्यप्रदर्शनार्थंतच्चवैलक्षण्यं
शंय्वंताकृत्स्नसंस्थावेत्येवमादि।तस्याअध्वर्युप्रत्ययत्वान्नास्माभिर्निश्चीयते।शंनेस्त
रामित्येषस्वरोत्रनातिनिदिश्यते अवधिस्वरत्वात्तस्य।पदार्थस्यधर्मोत्यातिदेशेन प्राप्य ते
नावधिधर्मइति।पथ्यास्वस्तिरिहोत्तमाज्यहविषां।सर्वसाम्ये विशेषउच्यते।तत्रचत
स्त्रआज्यहविषोदेवताः अदितिःपंचमीचरुहविः।पथ्यास्वस्तिस्तत्रप्रथमाइहचतु
र्थइभवतीत्यर्थः।।विपरीताश्चयाज्यानुवाक्याः।तत्रयायाज्यासेहानुवाक्या।तत्रया
नुवाक्यासेहयाज्याभवतीत्यर्थः।तेचैवकुर्युर्येप्रायणीयां।तत्रयेकर्तारस्तएवात्रनि
यम्यते।तत्रयदिप्रतिनिधिभूतःकुर्यात्सएवात्रकुर्यादित्यर्थः।प्रकृत्यासंयाज्ये।वि
परीताश्चयाज्यानुवाक्याइत्यस्यप्रतिप्रसवोयं।संस्थितायांमैत्रावरुण्यनूबंध्या।।

स० दृ० ६ उदयनीयायां समाप्तायां मित्रावरुणदेवत्यो नूबंध्यानाम पशुः कर्तव्यः। सदस्य के। सप
२७४ शुः सदस्यासीनैर्होत्रादिभिः कर्तव्य इत्येक आहुः। अस्मिन्नपि पक्षे दंड प्रदानांत मुत्तरवे
द्यामित्युक्तं। उत्तरवेद्यामेके। एके शाखिन उत्तर वेदि समीपे आसीनैरित्याहुः। हुतायां
वपायां यद्येकादशिन्यग्रतः कृताग्नीषोमीयेण संचरेणाव्रजित्वा गार्हपत्ये त्वाष्ट्रेण पशु
नाचरंति। अनूबंध्याया वपायां हुतायामिदं नैमित्तिकं कर्मोच्यते। यदि यास्मिन्कृताव
ग्नीषोमीयस्य स्थाने सवनीय स्थाने वा पश्वेकादशिनी प्रयुक्तास्यात्तदा तस्मिन्कृतावस्मि
न्काले ग्नीषोमीयेण संचरेण। अग्नीषोमीय प्रणयने यः संचरस्तेनेत्यर्थः। तेन संचरेण
शालामुखीयं गत्वा तत्र त्वाष्ट्रेण त्वष्टृदेवत्येन पशुना यजेयुरित्यर्थः। अंजनादि पर्यग्नि २७४
कृत्वोत्सृजंत्यपुनरायनाय। तं त्वाष्ट्रं पशुं यूपांजनादि पर्यग्निकरणांतं कृत्वोत्सृजंति।

अधुनरायनायअधुनरागमनायेत्यर्थः। तावानेवायंपशुयागोभवति। नातऊर्ध्वंकर्तव्योभवती
त्यर्थः। यदिलध्वर्यवआज्येनसमानुयुस्तथैवहोताकुर्यात्। उक्तःपक्षउत्सर्गोनामायमपरः
पक्षउच्यते। यद्यध्वर्यवआज्येनतंपशुयागंसमापयेयुस्तदाहोतापितथाकुर्यात्। होतृ
ग्रहणंमैत्रावरुणस्यापिप्रदर्शनार्थं। तथैवेत्यस्यविवरणार्थमाह। संप्रैषवदादेशान्॥
आज्येनसमापनेअनेकेपक्षाःसंभवंति। आज्यशब्देनसंव्यवहारमात्रंकृत्वापशुदेवक्रि
यतइत्येकःपक्षः। संव्यवहारोपिपशुशब्देनेत्यपरः। इष्टिवदाज्येनत्वाज्ययागइत्ययम
प्यपरःपक्षः। इष्टिपक्षेपिवपापुरोडाशहविस्थानेषुत्रिष्कृत्वःक्रियतइत्यपरःपक्षः। य
द्यन्यथापिकुर्युस्तस्यतस्यानुगुणमादेशान्ब्रूयात्। एतदुक्तंभवति। यथायथाध्वर्यूणां
संप्रैषेषुदेवतादेशाइत्यादेशाश्चकृताः। तद्वदेवद्रव्यदेवतानामादेशानस्मदीयाःकुर्यु

सू० हृ० ६ रित्यर्थः। पशुवन्निपातान्। मिपातानामेवं प्रकाराः। मेदउद्धृतं पार्श्वतः श्रोणित इति ये पशु
२७५ समवेताभिधायिनोऽन्यांतरसमवेताभिधायिनो वा मंत्रमध्ये निपतितास्तेनिपाताउच्यं
275 ते। नानाज्येन क्रियमाणे पशुवत्क्रियायां पशौ दैवत्यारित्यर्थः। यद्यन्वं ध्ये पशुपुरोळा व
शमनुदेविकाहवींषिनिर्वपेयुर्धातानुमतीराकासिनीवालीकुहूः। यद्यन्नदेविकाहवी
ष्यनुनिर्वपेयुरन्वायातयेयुरित्यर्थः तद्धात्रादयः पंचदेवतायष्टव्याः। ते यागादेवि
काइत्युच्यंते। स्थानेपदेशाश्चान्वायात्यत्वं स्पष्टयति। धाताददातु दाशुषे प्राचीजीवा
तुमक्षितां। वयंदेवस्य धीमहि सुमतिं वाजिनीवतः। धाताप्रजानामुतरायईशे धातेदं
विश्वंभुवनं जजान। धाताकृष्टीरनिमिषाभिचष्टे धात्रइद्धव्यं घृतवज्जुहोतेति। धा २७५
तुरिहैवाम्नातइतरेषामहष्टादेशान्यायेनान्वेषणीयाः। देवीनांचेत्स्यर्थो द्योरुषागोः पृथि

वी। एषां च पंचानां द्रव्य इति समाख्या। यद्येता अन्वायातयेयुस्तद्दैवता देवता भवंति। स्म नी
त्सुरंधिर्न आ गृहाणीति ह्व आद्यांतनो विरश्मिभिरावहंतीपोष्या वार्याणि न ता अर्वा रेणुक
काटो अश्नुते न तान् शंतिनद्रभाति तस्करो वल्हिस्या पर्वतानां ह्व ल्वाचिद्या वनस्पतीन्॥
सूर्यस्य चातुर्मास्येभ्यो गृहीतव्ये याज्यानुवाक्ये। पश्वलाभे पयस्या मैत्रावरुण्य अनूबंध्या
स्थाने। अनूबंध्यायाः पशुद्रव्यालाभे मैत्रावरुणी पयस्या कर्तव्या। देवताभिनिर्देशः प्र
कृतायाएवानूबंध्यायाः पश्वलाभे पयस्याकर्तव्या। नान्यासामनूबंध्यानां। अन्यासा
मनूबंध्यानामयं पक्षो नास्तीत्यर्थः। स्थानग्रहणं तत्कार्यकरीयं पयस्या न पश्वलाभे
नैमित्तिकं कर्मांतरमिति प्रदर्शनार्थं। आज्यभागप्रभृति वाजिनांता। एषायस्यैतद्व
द्धिरेतद्देवता भवति। अध्वर्युप्रत्ययादन्यथा वा भवति। कर्मिणो वाजिनं भक्षयेयुः। उत्त

स० वृ० ६ रविवक्षार्थमेतत्।सर्वेतुदीक्षिताः।सत्रविषयेयजमानत्वात्सर्वेभक्षयेयुः।सर्वेतुदीक्षि
२७६ तोत्थिताः पृथगग्नीन्समारोप्योदग्देवयजनान्मथित्वोदवसानीययायजेते।तुशब्दो
विशेषविध्यर्थः।तेनास्मिन्सूत्रेर्थद्वयमस्ति।सामान्यतोविशेषतश्च।सामान्यतस्ताव
दयमर्थः प्रकृतेनज्योतिष्टोमाख्येनसोमेनयजमानोदीक्षणीययादीक्षांप्रविष्टःस
न्सोमेनेष्ट्वाअवभृथेष्टोदीक्षामोचनंकृत्वातस्मादुत्थितएवानूबन्ध्यांतंप्रयोगंसमा
प्यतदंतेग्नीनरण्योःसमारोप्यउदग्देवयजनाद्योदेशस्तस्मिन्नग्नीन्मथित्वोदवसा
नीययायजेतइत्येकोर्थः।अपरस्तुयदिसर्वेदीक्षिताःस्युःसत्रंचेदित्यर्थः।दीक्षिता
उत्थिताइतिपाठःकर्तव्यः।समासपाठेर्थस्यदुर्गमत्वात्।यदिसर्वेदीक्षितास्युःतदा २७६
पूर्ववदेवानूबन्ध्यांतंकर्मकृत्वासर्वेस्वान्स्वानग्नीन्स्वेष्वेवारणीषुपृथक्पृथक्स

मारोप्य पूर्ववन्मथित्वा पृथगेवोद्वसानीयया यजेरन्निति विशेषतोऽर्थः। मंथनस्यार्थ
२७७ सिद्धत्वे सत्यपि मंथनवचनं तदानीमेव मथित्वा सद्य उद्वसानीया कर्तव्येत्येवमर्थं।
तेनोद्वसानीया सोमांगं इत्युक्तं भवति। तेनाग्निहोत्रकाले प्राप्तेपि अस्यामिष्टौ अ
न परिसमाप्तायां तत्रैव होतव्यमिति सिद्धं भवति। अनूबंध्यां ते प्रायश्चित्तानि कृत्वा संस्था
जपं च कुर्युः पूर्वमकृतवंतः संस्थाजपं। पौनराधेयिक्यविकृताविकृता। सेयमुद्वसा
नीया एवंरूपा भवति। पौनराधेयिकी पुनराधेये याम्नातेष्टिस्तद्रूपेत्यर्थः। किंचाविकृ
ता। विभक्त्याज्यभागविकारोपांशुत्वरहिता केवलमग्निर्देवता प्रधानस्विष्टकृतोर्याज्यानुवा
क्याश्चातिदिश्यंते नान्यदित्यर्थः॥१४॥ इत्याश्वलायनसूत्रवृत्तौ नारायणीयायां षष्ठोध्या २७७
यः समाप्तः॥ श्रीमल्लारिमार्तंडप्रसंनोस्तु। श्रीरस्तु। लेखकपाठकयोः शुभंभवतु॥

॥ आश्वलायनश्रौतसूत्रवृत्तिः ॥